रसेन्द्रसारसंग्रह : with सुबोधिनी Commentary of Mm. गोपाल भट्ट – Edited by Pt हृदयनाथ कविराज – ~~slightly~~. ~~pinholes~~ some scattered Notes in Bengali by some unknown पंडित – slightly pinholes in first and last few pages and neatly repaired.

Calcutta, 1885.

(55)

Bill No. 3/07-08

170

2008-0336

सटीक रसेन्द्रसारसंग्रहः ।

महामहोपाध्याय श्रीयुक्त गोपाल
भट्टेन विरचितः ।

श्रीहृदयनाथ तर्करत्न कविरत्न कविराजकृत
सन्दर्भसहितस्तेनैव संशोधितश्च ।

प्रकाशक श्रीयुक्त भुवनचन्द्र वसाकः ।
(कलिकाता ८ नं० निमतलाघाट ष्ट्रीट हइते प्रकाशित)

कलिकाता ।

नूतन वाल्मीकि यन्त्रे श्रीउदयचरण पालेन मुद्रितः ।
वाहिर सिमला ३९ नं० शिवनारायण
दासेर लेन ।

१८८५

विज्ञापनमिदम्।

रसेन्द्रसारसंग्रहो नाम निबन्धः पण्डिताग्रगण्येन गोपालभट्टेन संगृहीतः तस्य टीका च तेनैव विरचिता, संप्रति बहुदर्शिनः श्रीयुक्त बाबु भुवनचन्द्रवसाकस्य आदेशेन मयापि यथासाध्यं अस्य सन्दर्भः संप्रकाशितः यदि च भ्रमात् प्रमादाद्वास्मिन् पाठस्यासंलग्नः [illegible] तदा पण्डितैः क्षन्तव्य इति।

श्रीहृदयनाथतर्करत्न

कविरत्न कविराजः।

आरोग्यनिकेतनाध्यक्षचिकित्सकस्य

[illegible]

...পুর — ৪৮

...চন্দ্র — ২২ টাকা

...পাধ্যায় [illegible] ১৪। ১৪৭ শোকসূত্র

...নি কাব্য — ১৩

...চন্দ্র — রণসিংহের দেশ

...চন্দ্র — [illegible] পুত্র

...সিংহ —

...চন্দ্র —

...পুর —

...সিংহ — ২

...সুরা যন্ত্রপাতের নিয়ম। উহার বাবুরা
...ন দিল যখন ঐ হইবেন তখনই পার...
...ত হইবে। কিন্তু, তাহা পারে [illegible]
...সময় এবং উহাতে শব্দ হয় না।

सूचीपत्रम् ।

विषयः	पृष्ठा	श्लोकं
मङ्गलाचरणं	१	१।२
रसप्रसंसा	२।३	३।५
रसपर्य्यायकथनं	४	६
रसलक्षणं	४	७
रसेदोषकथनं	४	७
रसकार्य्ये परिमानकथनं	५	७
रसपूर्व्वकर्त्तव्यम्	५	८
तप्तखल्वनियमः	५।६	९
रक्षामन्त्रः	६	९
रसनिगाड़	६	९
रसस्य साधारणशुद्धिः	६	१०
विशेष शुद्धिः	७	१०
मतान्तरे शुद्धिः	७	११
मतन्तरे ऐ	८	११
मतान्तरेशुद्धिः	८	१२
मतान्तरेशुद्धिः	८	१३
मतान्तरेशुद्धि	९	१३
ऊर्द्धपातनं	९	१४
अधःपातनं	१०	१५
तिर्य्यक्पातनं	१०	१६
रसबोधनं	१०	१७
हिङ्गुलोत्थरसनियम	११	१८
अष्टकर्म्माणि	११	१९

विषयः	पृष्ठा	श्लोक
मतान्तरे हिङ्गुलोत्थरसः	१२	२०
रसमूर्च्छणं	१३	२१
मतान्तरं	१३	२२
मतान्तरं	१४	२२
मतान्तरं	१४	२३
सूतभस्म	१४	२४
रससिन्दूरक्रमं	१४	२५
मतान्तरं	१५	२६
मतान्तरं	१६	२७
रसकर्पूरः	१६	२८
सुधर्षनिधिरसः	१७	३०
सर्वाङ्गसुन्दरोरसः पीतभस्म वा	१७	३१
कृष्णभस्म	१८	३२
मूषाकरणं	१८	३३
नियामकगणः	१९	३४
रसमारकवर्गः	२०	३५
अम्लवर्गः	२०	३६
लवणवर्गः	२०	३७
मूत्रवर्गः	२१	३८
द्रावकपित्तवर्गौ	२१	३९।४०
क्षारवर्ग	२१	४१
रससेवाक्रमकले	२१	४२

विषयः	पृष्ठा	श्लोकं
पथ्यापथ्यकथनं	२२	४३।४४
उपरसनामकथनं	२२	४५
गन्धकोत्पत्तिशोधनञ्च	२३	४६
गन्धकसंख्याकथनं अशुद्धगन्धकदोषकथनञ्च	२३	४७
गन्धकशुद्धिः	२३	४८।४९
गन्धकगुणकथनं	२४	५०
वज्रशोधनं	२५	५१
मतान्तरं	२५	५२।५३
वज्रमारणं गुणकथनञ्च	२७	५४।५५
वैक्रान्तशोधनमारणञ्च	२७	५६
अभ्रनामसंज्ञागुणाः	२८	५७
धान्याभ्रकथनं	२९	५८
अभ्रशोधनं	२९	५९।६०
अभ्रमारणं	३०	६१
मारकगणाः	३१	६२
मतान्तरे अभ्रमारणं	३१।३२	६३।६५
हरितालपर्य्यायशोधनञ्च	३३	६६।६८
हरितालमारणं	३४	६९।७०
रसमाणिक्यं	३५	७१
मनःशिलानामशोधनञ्च	३६	७२।७३
मतान्तरं	३६	७४।७५
खर्परशोधनमारणञ्च	३७ २८	७७।७९
तुत्थपर्य्यायशोधनमारणादीनि	३९	८०।८०

विषयः	पृष्ठा	श्लोक
विमलशुद्धिः	३९	८४
माक्षिकपर्य्यायशोधनमारणानि	४०|४१	८४|८८
काशीशशुद्धिः	४२	९०
सकान्तपाषाणसपर्य्यायशुद्धिः	४३	९१
वराटिकायानामलक्षणशोधनमारणानि	४३|४४	९१|९२
रसाञ्जनशुद्धिः	४३|४४	९४
सपर्य्यायहिङ्गुलशोधनं	४५	९४|९७
शिलाजतुनामशोधनञ्च	४६	९७|१००
सौवीरादीनां तथा कुङ्कुष्ठादीनाञ्च		
साधारणशुद्धिः	४६|४६	१०१
टङ्कणशुद्धिः, शङ्खशुद्धिश्च	४८	१०२|१०३
स्वर्णादीनां साधारणशोधनं	४९	१०४
अशुद्धस्वर्णदोषः विशेषशुद्धिकथनञ्च	५०	१०५|१०६
मतान्तरानि	५१	१०६|१०९
स्वर्णमारणं मतान्तरञ्च	५२	१०९|१११
रजतशोधनं ✕	५३	११२|११३
मतान्तरे	५३|५४	११४|११५
रजतमारणं	५३|५४	११६
अशुद्धताम्रस्य दोषकथनं मतान्तरञ्च	५५	११६|११८
ताम्रशोधनं ✕	५५	११६|११९
मतान्तरं अन्यमतञ्च	५६	१२०
ताम्रमारणं	५७	१२०|१२२
पित्तलकांस्य मारणं	५८	१२०|१२२

विषयः	पृष्ठा	श्लोकं
नागवङ्गशुद्धिः	५८	१२३।१२४
नागमारणं मतान्तरञ्च	५९	१२५।१२६
वङ्गमारणं मतान्तरे च	६०	१२७।१२९
लौहशोधनं	६१	१३०।१३१
भानुपाकविधिः	६२	१३१।१३२
स्थालीपाकविधिः	६४।६५	१३३।१३४
पुटपाकनियमः पुटपाकक्रमञ्च	६६।७१	२३४।१४७
लौहनिरुत्थीकरणं	६६।७१	१४८
मतान्तरं	७२	१४९
लौहस्य गुणाः	७३	१५२
लौहमारणं	७३	१५४
किट्टशोधनं मारणञ्च	७४	१५४।१५५
मणिमुक्ताप्रवालादीनां साधारणशुद्धिः	७५	१५७
प्रवालमारणं	७६	१५९
मुक्तादिशोधनमारणं	७६	१६०
विषोपविषसाधारणशोधनं	७६।७८	१६१।१६२
उपविषशुद्धिः	७६।७८	१६३
जैपालशुद्धिः	७६।७८	१६४
स्नुहीक्षीरशुद्धिः	७९	१६५
जलौकाशोधनं	७९	१६६
वृद्धदारशोधनं	८०	१६७
धन्वन्तरिप्रणामः	८१	१
अथ विरेचनचिकित्सा	८१	२

विषयः	पृष्ठा	श्लोक
इच्छाभेदीरसः	८२	३
इच्छाभेदीरसः	८२	४
गुदसुरारि इच्छाभेदी	८२	५
रूक्षीग्रोरसः	८३	६
इच्छाभेदीगुड़िका	८३	७
इच्छाभेदीरसः	८४	८
पुष्परेचणीगुड़िका	८४	९
सर्वाङ्गसुन्दरीरसः	८५	१०
अविरेच्यकथनं	८५	१०

अथ ज्वरचिकित्सा

नवज्वराङ्कुशः	८६	१
हिङ्गुलेश्वरः	८६	२
ज्वरधूमकेतुः	८६	३
मृतुञ्जयरसः	८७	४
जयावटी	८८	५
जयान्तीवटीका	८८	६
जयाजयन्तीवटी	८९	६
स्वच्छन्दभैरवः	८९	६
ज्वरसुराारिरसः	९०	७
नवज्वरेभाङ्कुशः	९०	८
त्रैलोक्यसुन्दररसः	९०	८
प्रतापमार्त्तण्डोरसः	९०	८

विषयः	पृष्ठा	श्लोकं
तरुणज्वरारिरसः	८१	९
गदमुरारि	८१	१०
विद्याधररसः	८१	११
अमृतमञ्जरी	८२	१२
महाज्वराङ्कुशः	८२	१२
ज्वरकेशरिका	८३	१३
नवज्वरेभसिंहः	८३	१४
उदकमञ्जुरीरसः	८३	१५
चन्द्रशेखरीरसः	८४	१६
पञ्चवक्त्रंरसं	८४	१६
पर्पटीरसः	८४	१७
वातपित्तान्तकोरसः	८५	१८
विश्वेश्वररसः	८५	१९
वातारीरसः	८५	१९
चिन्तामणिरसः	८६	२०
चिन्तमणिरसः	८७	२१

अथ सन्निपातज्वरचिकित्सा

कुलवधूः	८७	२२
जयमङ्गलः	८७	२३
नस्यभैरवः	८८	२४
अञ्जनभैरवः	८८	२४
अञ्जनीरसः	८८	२५
अञ्जनीरसः	८८	२६

विषयः	पृष्ठा	श्लोकां
त्रैलोक्यसुन्दरः	९९	२७
स्वच्छन्दभैरवः	९९	२८

अथ शीताङ्गसन्निपातललक्षणं

तस्य चिकित्सा च

आनन्दभैरवः	१००	२९।३०
आनन्दभैरवी	१०१	३१
प्राणेश्वरः	१०२	३२
सन्निपातभैरवः	१०३	३३
शीतभञ्जीरसः	१०३	३४
उन्मत्तरसः	१०३	३५
मृतसञ्जीवनीरसः	१०४	३६
स्वल्पवड़वानलोरसः	१०४	३७
वृहद्वड़वानलोरसः	१०५	३८
सूचिकाभरणोरसः	१०५	३९
पञ्चाननोरसः	१०५	४०
त्रिदोषणीहाररसः	१०६	४१
रसराजेन्द्रः	१०६	४२
मृतसञ्जवनीरसः	१०७	४३
गन्धककज्जलीविधिः	१०८	४४
वेतालोरसः	१०९	४५
चन्द्रशेखरः	१०९	४६
कस्तूरीभैरवः	१०९	४६
वृहत्कस्तूरीभैरवः	११०	४७

विषयः	पृष्ठा	श्लोकं
सौभाग्यवटी	१११	४८
सन्निपातहरः	१११	४६
सन्निपातवड़वानलोरसः	११२	५०
सिंहनादरसः	११२	५०
सन्निपातसूर्य्यः	११३	५१

अथाभिन्यासज्वरचिकित्सा ।

स्वच्छन्दनायकः	११३	५२
सन्निपातान्तकोरसः	११४	५३

अथ जीर्णज्वरचिकित्सा ।

जीर्णज्वरलक्षणं	११४	५४
ज्वराङ्कुशोरसः	११४	५४
ज्वरारि अस्त्रं	११५	५४
ज्वराग्निरसः	११६	५५
अर्द्धनारीश्वरोरसः	११६	५५
चन्दनादिलौहं	११६	५६
ज्वरारिरसः	११७	५७
सर्वज्वरहरलौहं	११८	५८
वृहत्सर्वज्वरहरलौहं	११९	५९
महाराजवटी	१२०	६०
चिन्तामणिरसः	१२१	६१
त्रैलोक्यचिन्तामणिरसः	१२१	६१
वृहत्चिन्तामणिरसः	१२२	६२

विषयः	पृष्ठा	श्लोकां
पुटपाकविषमज्वरान्तकलौहं	१२२	६३
वृहत् विषमज्वरान्तकोरसः	१२३।१२४	६४
शीतभञ्जीरसः	१२३।१२४	६५
चिन्तामणिः	१२५	६६
ज्वराङ्कुशः	१२५	६६
मेघनादोरसः	१२५	६६
शीतज्वरहरः	१२६	६७
शीतभञ्जीरसः	१२६	६८
पञ्चाननोरसः	१२७	६९
मुंष्टियोगः	१२७	७०
विश्वेश्वरोरसः	१२७	७१
त्र्याहिकारीरसः	१२८	७२
चातुर्थकारी	१२८	७३
चिन्तामणिरसः	१२८	७३
वृहत्ज्वरचिन्तामणिरसः	१२९	७४
महाज्वराङ्कुशः	१३०	७५
तन्त्रान्तरोक्तमहाज्वराङ्कुशः	१३०	७५
सर्वतोभद्ररसः	१३१	७६
वृहत्ज्वरान्तकलौहं	१३२	७७
चूड़ामणिरसः	१३३	७८
भानुचूड़ामणि	१३४	७९
वृहत्ज्वरचूड़ामणिः	१३५	८०
वृहत्ज्वरचूड़ामणिः	१३६	८१

विषयः	पृष्ठा	श्लोकं
	अथातिसारचिकित्सा	
मृतसञ्जीवनीवटी	१३७	८२
आनन्दभैरवोरसः	१३७	८३
अमृतार्णवः	१३८	८३
सिद्धप्राणेश्वरोरसः	१३८	८४
अभ्रवटीका	१३९	८५
कनकसुन्दरोरसः	१४०	८६
कनकप्रभा	१४०	८७
कारुन्यसागरः	१४१	८८
वृहत्कणकसुन्दरः	१४१	८९
मृतसञ्जीवनोरसः	१४२	९०
प्राणेश्वरोरसः	१४२	९१
	अथातिसारचिकित्स	
अतिसारवारणोरसः	१४३	९२
पूर्णचन्द्रोरसः	१४३	९३
कषाद्यलौहं	१४४	९४
वृहद्गगनसुन्दरः	१४४	९५
लोकणाथोरसः	१४४	९५
चिन्तामणिरसः	१४६	९५
अहिफेणवटीका	१४५	९५
महागन्धकःसर्वाङ्गसुन्दरस्य	१४६	९७
	अथग्रहनीचिकित्सा	
जातीकलादिग्रहनीकपाटः	१४७	९८

विषयः	पृष्ठा	श्लोकं
ग्रहणीकपाटीरसः	१४८	९९
जातीफाद्यावटीका	१४९	१००
घूर्णफलावटी	१५०	१०१
वज्रकपाटीरसः	१५०	१०२
जातीफलरसः	१५१	१०३
ग्रहणीगजेन्द्रवटीका	१५२	१०४
पीयुषवल्लीरसः	१५२	१०५
ग्रहनीशार्दूलरसः	१५३	१०६
वैद्यनाथवटी	१५४	१०७
रसपर्पटिका	१५४	१०८
विजयपर्पटी	१५५	१०८
स्वर्णपर्पटी	१५५	१०९
पञ्चामृतपर्पटी	१५६	११०
अग्निकुमारीरसः	१५७	१११
वड़वामुखीरसः	१५७	११२
ग्रहणीकपाटीरसः	१५८	११३
बृहत ग्रहणीकपाटः	१५८	११३
ग्रहणीकपाटीरसः	१५९	११४
विजयावटीका	१५९	११५
ग्रहणीकपर्द्दपोट्टली	१४९	११५
हंसपोट्टली	१६०	११६
ग्रहणीकपाटः	१६०	११६
ग्रहणीकपाटः	११८	११७

विषय:	पृ:	श्लोकम्
ग्रहणीवज्रकपाट:	१६१	११८
ग्रहणीकपाट:	ऐ	११९
पानीयभक्तवटी	ऐ	ऐ
जम्बूकादिवटी	१६३	१२०
हिरण्यगर्भपोट्टलीरस:	ऐ	ऐ
रसाभ्रवटी	१६४	१२१
अग्निकुमार:	ऐ	१२२
नृपतिवल्लभ:	१६५	ऐ
राजवल्लभोरस:	१६६	१२३
वृहत् नृपवल्लभ:	ऐ	ऐ
संग्रहग्रहणीकपाट:	१६७	ऐ
महाराजनृपतिवल्लभोरस:	१६८	ऐ
महाराजनृपतिवल्लभ:	१६९	१२४
अथार्शचिकित्सा।		
चक्रेश्वरोरस:	१६९	१२४
तीक्ष्णमुखोरस:	१७०	१२५
अर्श:कुठारोरस:	ऐ	१२६
चक्राख्योरस:	ऐ	१२७
नित्योदितोरस:	१७१	ऐ
चन्द्रप्रभागुड़िका	१७२	१२८
मानाद्यलौहं	१७३	१२९
वज्रुतकुठारोरस:	ऐ	१३०
शिलागन्धकवटक:	ऐ	१३०

विषयः	पृः	श्लोकम्
जातीफलादिवटी	१७४	१३१
पञ्चाननवटी	१७४	१३१
अष्टाङ्गोरसः	१७४	१३१

अथाजीर्णचिकित्सा

महोदधिवटी	१७५	१३२
अग्नितुण्डीरसः	ऐ	१३३
वड़वानलोरसः	ऐ	१३४
हुताशनोरसः	१७६	१३५
वृहत् हुताशनोरसः	ऐ	१३६
अमृतकल्पवटी	ऐ	१३६
अग्निकुमारोरसः	१७७	१३७
वृहदग्निकुमारोरसः	ऐ	१३८
अपरवृहदग्निकुमारोरसः	१७८	१३९
वृहन्महोदधिवटी	१७९	१४०
रामवानोरसः	ऐ	१४१
अजीर्णकण्टकोरसः	ऐ	१४२
पाशुपतोरसः	१८०	१४२
वृहतशङ्खवटी	१८१	१४३
भक्तविपाकवटी	१८२	१४४
पञ्चामृतवटी	ऐ	१४५
क्रव्यादोरसः	१८३ । १८४	१४५
ज्वालानलोरसः	१८३ । १८४	१४६

विषयः	पृः	श्लोकम्
वृहद्भक्तपाकवटी	१८५	१४७
लवङ्गादि	ऐ	१४८
लवङ्गादिवटी	१८६	१४९
जातीफलादिवटी	ऐ	१५०
शङ्खवटी	१८७	१५१
चिन्तामणिरसः	ऐ	१५२
प्रदीपनोरसः	१८८	१५२
विजयरसः	ऐ	१५३
महाभक्तपाकवटी	१८९	१५४
रसराक्षसः	ऐ	१५४
त्रिफलालौहं	ऐ	१५५
अग्निकुमारः	१९०	१५६
शङ्खवटी	ऐ	१५७

अथक्रिमिरोगचिकित्सा

क्रिमिकालानलोरसः	१९१	१५८
क्रिमिविनाशोरसः	ऐ	१५९
क्रिमिरोगारिरसः	१९२	१६०
कटमर्द्दोरसः	ऐ	१६०
क्रिमिघ्नोरसः	ऐ	१६१
क्रिमिमुद्गरोरसः	१९३	१६२
क्रिमिधूलिजलप्लवोरसः	ऐ	१६२
क्रिमिकाष्ठानलोरसः	ऐ	१६३
लाक्षादिवटी	१९४	१६३

विषयः	पृः	श्लोकम्
क्रिमिहरोरसः	१८४	१६४
विड़ङ्गलोहं	१८४	१६५
	अथपाण्डुरोगचिकित्सा	
निशालोहं	१८५	१६६
धात्रीलोहं	ऐ	१६७
पञ्चाननवटी	ऐ	१६७
प्राणवल्लभोरसः	१८६	१६८
कामेश्वरोरसः	ऐ	१६८
त्रिकत्रयाद्यलौहं	१८७	१७०
विड़ङ्गादिलौहं	ऐ	१७१
विड़ाङ्गादिलौहं	१८८	१७२
त्रैलोक्यसुन्दरोरसः	ऐ	ऐ
शार्व्यांदिलौहं	ऐ	१७३
पथ्यविधिः	ऐ	१७४
चन्द्रसूर्य्यात्मकोरसः	१८९	१७५
पाण्डुसूदनोरसः	२००	१७६
मण्डूरवज्रवटकः	ऐ	१७७
लघ्वानन्दोरसः	२०१	१७८
सम्मोहलोहं	ऐ	१७८
मूषणादिमण्डूरं	ऐ	१७८
मुष्टियोगः	ऐ	१७८
	अथरक्तपित्तचिकित्सा	
अर्केश्वरः	२०२	१७८

विषयः	पृः	श्लोकम्
सुधानिधिरसः	ऐ	१७९
आमलाद्यलौहं	ऐ	१८०
शतमूलाद्यलौहं	२०३	१८१
रक्तपित्तान्तकोरसः	ऐ	१८१
रसामृतरसः	२०४	१८२
खण्डकुष्माण्डकः	ऐ	१८३
शर्कराद्यलौहं	ऐ	१८४
समशर्करलौहं	२०५	१८५
कपर्द्दकोरसः	ऐ	१८५
मुष्टियोगः	ऐ	१८५

अथ यक्ष्माचिकित्सा

रास्नादिलौहं	२०६	१८६
राजमृगाङ्कोरसः	ऐ	१८७
रत्नगर्भपोट्टलीरसः	२०७ । २०८ ।	१८७
लोकेश्वरपोट्टलीरसः	२०९	१८८
कनकसुन्दरोरसः	ऐ	१८९
हेमगर्भपोट्टली	२१०	१९०
सर्व्वाङ्गसुन्दरोरसः	ऐ	१९०
लोकेश्वरोरसः	२११ । २१२	१९१
स्वल्पमृगाङ्कः	ऐ	१९१
काञ्चनाभ्ररसः	ऐ	१९१
वृहत्काञ्चनाभ्रोरसः	२१३	१९२
शिलाजत्वादिलौहं	ऐ	[illegible]

विषयः	पृः	श्लोकम्
कुमुदेश्वरः	२१४	१९३
क्षयकेशरीरसः	ऐ	१९४
बृहत्चन्द्रामृतोरसः	ऐ	१९५
महामृगाङ्कोरसः	२१५	१९५
क्षयकेशरी	२१६	१९६

अथ कासचिकित्सा ।

बृहद्रसेन्द्रगुड़िका	२१७—२१८	१९८
अमृतार्णवोरसः	२१७—२१८	१९९
पित्तकासान्तकोरसः	१२८—२१९	२००
कासस‌ंहारभैरवः	२१९	२०१
लक्ष्मीविलासोरसः	२२०	२०२
सर्व्वेश्वरोरसः	ऐ	ऐ
शृङ्गाराभ्रं	२२१	२०३
सार्व्वभौमः	२२२	२०४
तरूणानन्दोरसः	२२३	२०५
महोदधिरसः	ऐ	२०६
जयागुड़िका	२२४	२०७
विजयगुड़िका	ऐ	२०८
स्वच्छन्दभैरवः	२२५	ऐ
रसगुड़िका	ऐ	२०९
रसेन्द्रगुड़िका	२२६	२१०
पुरन्दरवटी	ऐ	ऐ
कासान्तकोरसः	ऐ	ऐ

विषयः	पृः	श्लोकम्
कासकुठारः	ऐ	ऐ
श्रीचन्द्रामृतलौहं	२२७	ऐ
श्रीचन्द्रामृतोरसः	२२७—२२८।	२११
अमृतमञ्जरी	ऐ	ऐ
कासान्तकः	ऐ	ऐ
वृहत् शृङ्गाराभ्रं	ऐ—२२९।	ऐ
नित्योदयरसः	२२९—२३०	२१२

अथ हिक्काश्वासचिकित्सा

सूर्य्यावर्त्तरसः	२२९—२३०	२१३
विजयवटी	२३१	ऐ
लौहपर्पटीवटः	२३१—२३२	२१४
ताम्रपर्पटी	ऐ	ऐ
पिप्पल्याद्यलौहं	ऐ	२१५
श्वासकठारः	ऐ	२१६
श्वासकास चिन्तामणिः	२३२—२३३	२१७
श्वासकुठारः	ऐ	ऐ
श्वासकुठारः	ऐ	२१८

अथ स्वरभेदचिकित्सा

भैरवरसः	२३४	२१९
मुष्टियोगः	ऐ	ऐ

अथारोचक चिकित्सा

सुधानिधिरसः	२३५	२२०
सुलोचनाभ्रं	२३५—२३६	२२१

विषयः	पृः	श्लोकम्
	अथच्छर्दिचिकित्सा	
मुष्टियोगः	ऐ	२२२
	अथ तृष्णाचिकित्सा	
महोदधिरसः	२३६—२३७	२२३
कुमुदेश्वर रसः	ऐ	२२४
	अथ मूर्च्छाचिकित्सा	
सुधानिधिरसः	ऐ	२२५
	अथ मदात्ययचिकित्सा	
मुष्टियोगः	२३८	२२६
अष्टाङ्गलवणं	ऐ	२२७
	अथ दाहचिकित्सा	
दाहान्तिकोरसः	२३८	२२८
	अथ उन्मादचिकित्सा	
उन्मादगजाङ्कुशोरसः	२३९	२२९
भूताङ्कुशो रसः	२३९—२४०	२३०
उन्माद भञ्जिनः	ऐ	२३१
त्रिफलयादिलौहं	ऐ	२३२
उन्मादभञ्जनो रसः	२४१	ऐ
चतुर्भुज रसः	२४१—२४२	२३३
उन्माद पर्पटीरसः	ऐ	ऐ
	अथ अपस्मारचिकित्सा	
सूत भैरवः	२४२	२३४
सूतभस्मप्रयोगः	ऐ	२३५

विषयः	पृः	श्लोकम्
इन्द्रब्रह्म वटी	२४३	ऐ
वातकुलान्तकः	ऐ	२३६

अथ वातव्याधिचिकित्सा

विषयः	पृः	श्लोकम्
द्विगुणाख्योरसः	२४४	२३७
वातगजाङ्कुशः	२४५	२३८
वृहत्वात गजाङ्कुशः	ऐ	२३९
महावात गजाङ्कुशः	ऐ	२४०
वातनाशनोरसः	२४६	ऐ
वातारिरसः	ऐ	२४१
अनिलारिरसः	२४७	२४२
वातकण्टकोरसः	ऐ	२४३
स्वच्छन्दोरसः	२४८	२४४
चिन्तामणिरसः	ऐ	२४५
चतुर्मुखरसः	२४९	२४६
लक्ष्मीविलासोरसः	२५०	२४७
रोगेभसिंहश्रीखण्डवटयो	ऐ	२४८
पिण्डीरसः	२५१	२४९
कुब्जविनोदरसः	ऐ	२५०
शीतवातलक्षणं	ऐ	२५१
शीतारिरसः	२५२	२५२
वातविध्वंसिनोरसः	ऐ	२५३
पलाशादिवटी	२५३	२५४
रसोसारवटी	ऐ	ऐ

विषयः	पृः	श्लोकम्
नगणादिवटी	२५४	२५५
सर्व्वाङ्गसुन्दरः	ऐ	ऐ
तालकेश्वरः	ऐ	ऐ
त्रैलोक्यचिन्तामणीरसः	२५५	२५७

अथ कफरोगचिकित्सा ।

श्लेष्मकालानलोरसः	२५६	२५८
श्लेष्मशैलेन्द्रोरसः	२५७	२५९
महाश्लेष्मकालानलोरसः	२५८	ऐ
महालक्ष्मीविलासः	२५९	२६०
कफकेतुरसः	ऐ	२६१
कफचिन्तामणिरसः	ऐ	२६२

अथ पित्तरोगचिकित्सा ।

गुड़ुच्यादिलौहं	२६०	२६३
धात्रीलौहं	ऐ	२६४
पित्तान्तकोरसः	२६१	ऐ
महापित्तान्तकोरसः	ऐ	२६५

अथ वातरक्तचिकित्सा ।

लाङ्गलाद्यलौहं	२६१	२६५
वातरक्तान्तकोरसः	२६२	२६६
तालभस्म	२६३	२६७
महातलेश्वरोरसः	ऐ	ऐ
विश्वेश्वरोरसः	ऐ	ऐ

विषय:	पृ:	श्लोकम्
अथ ऊरुस्तम्भचिकित्सा।		
गुञ्जाभद्ररस:	२६४	२६८
मुष्टियोग:	ऐ	२६९
अथ आमवातचिकित्सा		
आमवातारिवटीका	२६५	२६९
अपरामवातारिवटीका	ऐ	२७०
आमवातेश्वरोरस:	२६६	ऐ
वृद्दारायलोहं	ऐ	२७१
त्रिकूगुग्गुलु:	२६७	२७२
आमवातगजसिंहमोदक:	२६८	२७३
अथ शूलचिकित्सा।		
समामृतलोहं	२६८	२७४
त्रिफलालोहं	२६९	२७५
चतु:समलोहं	२६९	२७६
पञ्चाम्रकोरस:	२७०	२७७
धात्रीलोहं	२७१	२७८
शूलराजलोहं	ऐ	२७९
विद्याधराभ्र	२७२	ऐ
वृहत्‌विद्याधराभ्रं	२७३	२८०
सर्व्वाङ्गसुन्दरोरस:	२७४	२८१
शूलवज्रिणीवटिका	ऐ	ऐ
त्रिपुरभैरव:	ऐ	ऐ
अग्निमुख:	२७५	२८२

विषयः	पृः	श्लोकम्
शूलगजकेशरी	ऐ	२८३
त्रिगुणाख्योरसः	२७६	२८४
शूलहरणयोगः	ऐ	ऐ
शर्करालौहं	ऐ	ऐ
शङ्खादिचूर्णं	२७७	२८५

अथ उदावर्त्तानाहचिकित्सा ।

वैद्यनाथवटी	२७७	२८५
बृहदिच्छाभेदीरसः	२७८	२८६

अथ गुल्मचिकित्सा ।

महानाराचरसः	२७८	२८७
पञ्चाननरसः	२७९	२८८
गुल्मवज्रिनीवटिका	२७९	२८९
गुल्मकालानलोरसः	२८०	ऐ
वाड़वानलोरसः	ऐ	२९०
महानाराचरसः	ऐ	२९१
विद्याधररसः	२८१	२९२
महागुल्मकालानलोरसः	ऐ	ऐ
अभयावटी	ऐ	ऐ
गोपीजलः	२८२	२९३
काङ्कायनगुड़िका	ऐ	२९४
गुल्मशार्दूलोरसः	२८३	२९५
प्राणवल्लभोरसः	ऐ	२९६
सर्व्वेश्वरोरसः	२८४	ऐ

विषयः	पृः	श्लोकम्
अथ हृद्रोगचिकित्सा।		
हृदयार्णवोरसः	२८४	२९७
नगार्जुनाभ्रं	ऐ	ऐ
पञ्चाननरसः	२८५	२९८
अथमूत्रकृच्छ्रचिकित्सा।		
त्रिनेत्राख्योरसः	ऐ	ऐ
वरुनाद्यलौहं	२८६	ऐ
मूत्रकृच्छ्रान्तकोरसः	ऐ	२९९
अथ मूत्राघातचिकित्सा।		
तारकेश्वरोरसः	२८७	३००
लघुलोकेश्वरो रसः	ऐ	३०१
मुष्टियोगः	२८८	३०२
अथ अश्मरीचिकित्सा।		
पाषाणवज्रो रसः	ऐ	३०३
त्रिविक्रमो रसः	२८९	ऐ
लौहप्रयोगः	ऐ	३०४
मुष्टियोगः	ऐ	ऐ
अथ प्रमेहचिकित्सा।		
हरिशङ्करो रसः	ऐ	३०५
इन्द्रवटी	२९०	३०६

विषयः	पृः	श्लोकम्
वङ्गावलेहः	ऐ	ऐ
प्रमेहसेतुः	ऐ	ऐ
विड़ङ्गाद्यलौहं	ऐ	३०७
वृहद्धरिशङ्करोरसः	२९१	३०८
आनन्दभैरवीरसः	ऐ	ऐ
विद्यावागीश्वरसः	ऐ	३०९
मेहमुद्गारो रसः	२९२	३१०
मेघनादोरसः	ऐ	३११
चन्द्रप्रभावटिका	२९३	३१२
इक्षुमेहे वङ्गेश्वरो रसः	ऐ	३१३
वृहत्वङ्गेश्वरोरसः	२९४	३१४
मुष्टियोगः	ऐ	३१५
कस्तूरीमोदकः	२९५	३४६
मेहवज्रः	ऐ	३४७
मेहकेश्वरो	२९६	३१८
योगेश्वरोरसः	ऐ	ऐ

अथ सोमरोगचिकित्सा ।

तालकेश्वरोरसः	२९७	३१९
गमणादिलौहं	ऐ	ऐ
सोमनाथरसः	ऐ	३२०
वृहत्सोमनाथरसः	२९८	३२१
सोमेश्वरोरसः	२९९	३२२

विषयः	पृः	श्लोकम्
अथ स्थौल्यचिकित्सा ।		
त्र्यूषणाद्यलौहं	ऐ	३२३
वाड़वाग्निलौहं	३००	३२४
वाड़वाग्निरसः	ऐ	३२५
अथ उदर चिकित्सा ।		
त्रैलोक्यसुन्दरोरसः	३०१	३२५
वैश्वानरो वटो	ऐ	ऐ
जलोदरारिरसः	ऐ	३२६
वह्निरसः	३०२	३२७
त्रैलोक्यडुम्बरोरसः	३०३	३२८
महावह्निरसः	ऐ	३२९
इच्छाभेदोरसः	ऐ	३३०
पिप्पल्याद्यलौहं	३०४	ऐ
उदरारिरसः	ऐ	ऐ
वङ्गेश्वरोरसः	ऐ	३३१
अथ प्लीहाचिकित्सा ।		
रोहितकलौहं	३०५	३३२
लोकनाथरसः	ऐ	३३३
वृहत्लोकनाथरसः	३०६	ऐ
ताम्रेश्वरवटी	ऐ	ऐ
अग्निकुमारलौहं	३०७	३३४
प्राणवल्लभोरसः	ऐ	३३५

विषयः	पृः	श्लोकम्
यकृदारिलौहं	३०८	३३६
मृत्युञ्जयलौहं	३०९	३३७
प्लीहार्णवीरसः	ऐ	३३८
प्लीहशार्द्दूलोरसः	३१०	३३९
प्लीहारिरसः	ऐ	३४०
प्लीहारिरसः	३११	३४१
लौहमृत्युञ्जयोरसः	ऐ	३४२
महामृत्युञ्जयो रसः	३१२	३४३
बृहद्गुड़पिप्पली	ऐ	३४४
ताम्रकल्पं	३१३	३४५
मुष्टियोगः	ऐ	ऐ
वज्रक्षारं	३१४	३४६
उदरामयकुम्भकेशरी	३१५	३४७
वारिशोषणो रसः	३१६	३४८
सर्व्वतोभद्रः	ऐ	ऐ

अथ शोथचिकित्सा।

त्रिकट्वाद्यलौहं	३१७	ऐ
कटुकाद्यलौहं	ऐ	३४९
त्रूषणाद्यलौहं	ऐ	३५०
सुवर्च्चलाद्यलौहं	ऐ	३५१
क्षारगुड़िका	३१८	ऐ
वङ्गेश्वरः	३१९	३५२

विषयः	पृः	श्लोकम्
	अथार्बुदचिकित्सा ।	
रौद्रो रसः	ऐ	३५२
	अथ श्लीपद चिकित्सा ।	
नित्यानन्दो रसः	३२०	३५३
कणादिवटी	३२१	३५४
	अथ भगन्दरचिकित्सा ।	
वारिताण्डवोरसः	ऐ	ऐ
भगन्दरहरो रसः	३२१	३५५
अथोपदंशचिकित्सा	ऐ	३५६
	अथ कुष्ठरोगचिकित्सा ।	
गलत्कुष्ठारिरसः	३२३	३५७
उदायभास्करः	३२४	३५८
तालकेश्वरो रसः	ऐ	३५९
ब्रह्मरसः	ऐ	ऐ
चन्द्राननो रसः	३२५	३६०
कुष्ठकालानलो रसः	ऐ	३६१
वज्रवटी	ऐ	३६२
चन्द्रकान्तिरसः	३२६	३६३
सङ्कोचरसः	ऐ	ऐ
अमृताङ्कुरलौहं	३२७	३६४
माणिक्योरसः	३२८	३६५

विषयः	पृः	श्लोकम्
कुष्ठकुठारो रसः	३२९	३६६
रसतालेश्वरः	ऐ	ऐ
राजतालेश्वरः	३३०	३६७
कुष्ठहरितालेश्वरः	३३१	ऐ
राजराजेश्वरः	ऐ	३६८
पारिभद्ररसः	ऐ	ऐ
कुष्ठेप्रलेपः	३३२	३६९
लङ्केश्वरो रसः	ऐ	ऐ
भूतभैरवो रसः	३३३	३७०
अर्केश्वरः	३३४	ऐ
महातालेश्वरो रसः	ऐ	३७१
विजयभैरवः	३३५	३७२
कुष्ठारिरसः	ऐ	ऐ
षड़ाननगुड़िका	३३६	३७३
कुष्ठनाशनः	ऐ	३७४
विजयानन्दः	३३७	३७५
श्वित्रदद्रुपाटलालेपः	ऐ	ऐ
श्वित्रहरोलेपः	ऐ	३७६
कुष्ठश्वित्रनाशनोलेपः	ऐ	ऐ
रसमाणिक्यं	३३८	३७७

अथ शीतपित्तोदर्दकोठचिकित्सा।

मुष्टियोगः	३३८	ऐ

विषयः	पृः	श्लोकम्
	अथाम्लपित्तचिकित्सा।	
अम्लपित्तान्तको रसः	३३९	ऐ
लीलाविलासो रसः	३४०	३७८
पाणीयभक्तवटीका	ऐ	३७९
क्षुधावती वटी	३४१।३४२	ऐ
अविपत्तिकरं चूर्णं	३४३।३४४	३८०
	अथ विसर्पस्फोटतन्तुकरोगचिकित्सा।	
कालाग्निरुद्रो रसः	ऐ	ऐ
मुष्टियोगः	३४५	ऐ
मुष्टियोगः	ऐ	३८१
	अथ मसूरिकाचिकित्सा।	
दुर्लभो रसः	३४६	३८२
	अथ क्षुद्ररोग चिकित्सा।	
मुष्टियोगः	ऐ	३८३
	अथ मुखरोगचिकित्सा।	
चतुर्मुखो रसः	ऐ	३८४
पार्व्वतीरसः	३४७	ऐ
मुखरोगहरो	ऐ	३८५
पथ्यावटी	ऐ	ऐ
	अथ कर्णरोगचिकित्सा।	
कफकेतु रसः	३४८	३८६
भैरवो रसः	ऐ	ऐ

विषय:	पृ:	श्लोकम्
अथ नासारोगचिकित्सा।		
पञ्चामृतो रस:	२४९	३८७
अथ नेत्ररोग चिकित्सा।		
नेत्राशनि रस:	२५०	३८८
नयनामृत लौहं	ऐ	३८९
सप्तशुक्लहरीगुग्गुलु:	२५१	३९०
तिमिरहर लौहं	ऐ	३९१
अथ शिरोरोगचिकित्सा।		
रसचन्द्रिका वटी	२५२	३९२
शिरोवज्ररस:	ऐ	३९३
चन्द्रकान्तरस:	२५३	३९४
महालक्ष्मीविलास:	ऐ	ऐ
अथ प्रदर चिकित्सा।		
प्रदरान्तकलौहं	२५४	३९५
प्रदरान्तीरस:	ऐ	३९६
पुष्करलेह:	२५५	ऐ
सुष्टियोग:	२५६	३९७
अथ योनिव्यापच्चिकित्सा।		
सुष्टियोग:	२५६	३९७
अथ सूतिकारोगचिकित्सा।		
सूतिकारिरस:	२५७	३९८

विषयः	पृः	श्लोकम्
सूतिका विनोदरसः	ऐ	३९९
गर्भचिन्तामणिरसः	ऐ	ऐ
वृहत्गर्भविनोदरसः	ऐ	ऐ
सूतिकारिरसः	३५८	ऐ
सूतिकाग्निरसः	ऐ	४००
सूतिकान्तकोरसः	ऐ	ऐ
गर्भचिन्तामणिरसः	३५९	ऐ
गर्भचिन्तामणिरसः	ऐ	ऐ
वृहत्गर्भचिन्तामणिरसः	ऐ	४०१
गर्भविनोदरसः	३६०	ऐ
सूतिकाहरीरसः	ऐ	ऐ
महाभ्रवटी	३६१	४०२
महाभ्रवटी	ऐ	४०३
रसशार्दूलः	३६२	ऐ
महारसशार्दूलः	ऐ	४०४
वृहत्रसशार्दूलः	३६३	४०५

अथ वालरोग चिकित्सा।

वालोरसः	३६४	४०६
वालोरसः	ऐ	४०७

अथविष चिकित्सा।

विषवज्रपातीरसः	३६५	ऐ
भीतरुद्रो रसः	ऐ	४०८

विषयः	पृः	श्लोकम्
अथ रसायन वाजीकरणचिकित्सा ।		
श्रीमन्मथो रसः	२६६	४०८
महेश्वररसः	२६७	४१०
पूर्णचन्द्रो रसः	२६८	४११
कार्श्यहर लौहं	ऐ	४१२
लक्ष्मीविलासो रसः	२६९	४१३
श्रीकामदेव रसः	२६९।२७१	४१४
अनङ्गसुन्दरी रसः	ऐ	४१५
हेमसुन्दरी रसः	ऐ	ऐ
अमृतार्णवो रसः	२७२	ऐ
वृहत्पूर्णचन्द्रोरसः	२७३	४१६
चन्द्रोदयरसः	२७४ २७५	४१७
मकरध्वजः	ऐ	४१८
वसन्ततिलकोरसः	२७६	४१९
वसन्तकुसुमाकरो रसः	ऐ	४२०
नीलकण्ठो रसः	२७७	४२१
महानीलकण्ठोरसः	२७८	ऐ
वृहत्शृङ्गाराभ्रं	२७८	४२२

सूचीपत्रं समाप्तं

—

(सटीक)

रसेन्द्रसारसंग्रहः ।

रसेन्द्रमिव निःशेषं जरा व्याधि विनाशनम् ।
प्रणमामि गुरुं भक्त्या शङ्करं योगसाधनम् ॥ १ ॥

अव्यक्तं जगदाधारं निर्गुणं परमात्मकम् ।
नमामि सच्चिदानन्दं पुरुषं विश्वकारणम् ॥

यद्यप्यस्ति चन्द्रिका टिप्पनी सारसंग्रहे दुरूहा । तथापि बालबोधिनी संक्षिप्ता कृतेयं गोपालेन ।

सकलजनमण्डलसमुपकारक सुसिद्धशास्त्रार्थप्रकाशनार्थकविष्टतिः प्रतिरोधकपटलनिरासार्थं प्रथमतःस्वेष्टदेव नमस्कारस्यावश्यकत्वमित्यवधाय तदेव निवध्नाति रसेन्द्रमित्यादि–तत्रापि शङ्करनामोत्कीर्त्तनं मङ्गलार्थं शङ्करस्य श्रेयःसाधनत्वेन सर्वोत्कर्षत्वात् । नच गुरुपदार्थो विशेषित शङ्करनमस्कारेणैवेष्टसिद्धौ विशेषणवैयर्थ्यापत्तिरिति वाच्यं यत् किञ्चित् संज्ञोपलक्ष्य शङ्करधी निरासकत्वेन ज्योतिःस्वरूपार्थकगुरुपदार्थस्य सार्थक्यात् । प्रपूर्वक नमधात्वर्थस्य स्वापकर्षबोधानुकूलव्यापारः उद्देश्यरूपं कर्मत्वं तत्त्वञ्च नमस्कारजन्यफलजनकप्रत्याश्रयत्वम् । भक्त्येति विशेषणे तृतीया । आख्यातेनाश्रयपदार्थोपस्थितिः ततश्च भक्तिविशिष्टोऽस्मत्वावच्छिन्नः कर्त्ता परब्रह्मस्वरूपशङ्करत्वावच्छिन्नकर्मतानिरूपकस्वापकर्षबोधजनकव्यापारवानित्यर्थः । ये तु स्वोत्कर्षबोधानुकूलव्यापार एव नमधात्वर्थ इति ब्रुवते तेषां मते विषयत्वरूपं कर्मत्व अन्यत्समानम् । अन्ये तु भक्त्येति तृतीयाप्रयोजकतायां तस्य तादृशबोधे चान्वयः ततश्च भक्तिप्रयोज्यस्तादृशबोध इत्यर्थमवतारयन्ति । ननु

नत्वा गुरु पदद्वन्द्वं दृष्ट्वा तन्त्राण्यनेकशः।
श्रिया गोपालकृष्णेण क्रियते रससंग्रहः॥
सिद्धियोगाश्च ये केचित् कृतिसाध्या भवन्ति हि।
एकीकृत्य तु ते सर्वे लिख्यन्ते यत्नतो मया॥ २॥
तत्र रसप्राधान्यमाह।—
अल्पमात्रोपयोगित्वादरुचेरप्रसङ्गतः।
चिप्रमारोग्य दायित्वादौषधेभ्योऽधिकोरसः॥ ३॥

वाङ्मनसयोर्वर्त्मातिक्रमस्य तस्य ज्ञानाविषयत्वेन प्रणामः कथं संगच्छते इत्याह योगसाधनमिति योगेन साधनं प्राप्तिर्यस्येति बहुव्रीहिः रसेन्द्रमिति योगसाधनं रसेन्द्रं निःशेषेण जराव्याधिविनाशनं तथा योगसाधनं योगगम्यं शङ्करं प्रणमामीति दृष्टान्तसहितार्थः। रसेन्द्रस्य योगसाधनत्वेन शङ्करस्य स्वधर्मवस्तुनः प्रतिबिम्बनरूपदृष्टान्तावगतिरिति ध्येयम्॥ १॥

नत्वेत्यादौ पदद्वन्द्वमिति परमार्थतत्त्वदर्शकत्वात् अशेषशास्त्रार्थप्रकाशकत्वाच्च पदद्वन्द्वमित्युक्तम्। तन्त्राण्यनेकश इति अन्यानि बहूनि रसतन्त्राणि। सिद्धियोगाश्चेति तस्मिन् रसग्रन्थे सिद्धियोगाः सिद्धफलदा ये योगा उक्तास्तानेकीकृत्येति॥ २॥

रसप्राधान्यमाह अल्पमात्रेति।—

औषधेभ्योऽधिको रस इति अस्मात् कारणात् सर्वेभ्य औषधेभ्योऽधिकः गुणकर इत्यर्थः। न केवलमौषधेभ्योऽधिकः योगसाधनत्वात् तथा बहुकार्य्यकरत्वात् मुक्तिप्रदत्वाच्च सर्वेभ्योऽधिक इति। उक्तञ्च अचिराज्जायते देवि शरीरमजरामरम्। मनसश्च समाधानं रसयोगादवाप्यते। सत्वञ्च लभते देवि विज्ञानं ज्ञानपूर्वकम्। सत्वं मन्त्राश्च सिद्ध्यन्ति योऽश्नाति सूतसूतकम्। यावन्न शक्तिपातस्तु न यावत् पाशकृन्तनम्। तावत्तस्य कुतो बुद्धिर्जायते भस्मसूतके। यावन्न हरबीजन्तु भक्षयेत् पारदं रसम्। तावत्तस्य कुतो मुक्तिः कुतः पिण्डस्य धारणम्

साध्येषु भेषजं सर्वमीरितं तत्त्ववेदिना।
असाध्येष्वपि दातव्यो रसोऽतः श्रेष्ठ उच्यते ॥ ४ ॥
हतो हन्ति जरा व्याधिं मूर्च्छितो व्याधिघातकः।
बद्धः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः ॥ ५ ॥

स्वदेहे खेचरत्वञ्च शिवत्वं येन लभ्यत इति। अन्यच्च दोषहीनरसो ब्रह्मा मूर्च्छितस्तु जनार्द्दनः। मारितो रुद्ररूपी स्यात् बद्धः साक्षात् सदाशिव इति। तस्य दर्शनात् स्पर्शनात् भक्षणात् स्मरणात् पूजनात् दानाच्च षड्विधं फलं लभ्यते। यथा केदारादीनि लिङ्गानि पृथिव्यां यानि कानिचित्। तानि दृष्ट्वा च यत् पुण्यं तत्पुण्यं रसदर्शनात्। चन्दनाऽगुरुकर्पूरकुङ्कुमान्तर्गतो रसः। मूर्च्छितः शिवपुजा सा शिवसान्निध्यसिद्धये। भक्षणात् परमेशानि हन्ति पापत्रयं रसः। दुर्लभं ब्रह्मविष्ण्वाद्यैः प्राप्यते परमं पदम्। हृद्योगं कर्णिकान्तस्थं रसेन्द्रं परमेश्वरि। स्मरन् विमुच्यते पापैः सद्योजन्मान्तरार्जितैः। स्वयम्भूलिङ्गसाहस्रैर्यत् फलं सम्यगर्च्चनात्। तत् फलं कोटिगुणितं रसलिङ्गार्च्चनाद्भवेत्। रसविद्या पराविद्या त्रैलोक्येऽपि च दुर्लभा। भक्ति मुक्तिकरी यस्मात् तस्मात् ज्ञेया गुणान्वितैरिति ॥ ३ ॥

हेत्वन्तरमाह साध्येष्वित्यादि।—साध्येषु रोगेषु सर्वं भेषजमुक्तं असाध्येषु भेषजं नोक्तं रसस्तु साध्येष्वसाध्येष्वपि दातव्य इति। यदौषधैर्नसिध्यति तदसाध्यमिति तत्रौषधं निष्प्रयोजनं यच्च सूतैरपि सिध्यति तत्कथमसाध्यमिति। नैवं असाध्येषु सर्वमौषधं निष्प्रयोजनं नच सूतमिति। असाध्यं हि द्विविधं अप्रतिक्रियं याप्यञ्च अप्रतिक्रियेषु तथा याप्येषु औषधं निष्प्रयोजनं सूतस्त्वाप्रतिक्रियेषु तथा याप्येषु प्रयोक्तव्यं यापनार्थमिति नतु व्याधिनिःशेषकरणार्थञ्च ॥ ४ ॥

हेत्वन्तरमाह हत इत्यादि।—हत इत्यत्र सूत इति शेषः। जराव्याधिर्वार्द्धक्याद्यकालपलितकेशादिरूपव्याधिः एवं मूर्च्छितोऽपि व्याधिं हन्ति। बद्ध इति बद्धपारदः खेचरतां ददातीति ॥ ५ ॥

अथ रसपर्य्यायमाह ।

रसेन्द्रः पारदः सूतः सूतराजश्च सूतकः ।
शिवतेजो रसः सप्तनामान्येवं रसस्य तु ॥
शिववीजः रसः सूतः पारदश्च रसेन्द्रकः ।
एतानि रसनामानि तथान्यानि यथा शिवे ॥

मतान्तरम् ॥ ६ ॥

इत्यनेन शिववाचकानामपि रसवाचकत्वं ज्ञेयमिति पाठान्तरम् ।

अथ रसलक्षणम् ।—

अन्तः सुनिलो वहिरुज्ज्वलो यो
मध्याह्न सूर्य्यप्रतिम प्रकाशः ।
शस्तोऽथ धूम्रः परिपाण्डरश्च ।
चित्रो न योज्यो रसकर्म्मसिद्धौ ॥

नागो रङ्गो मलो वह्निश्चाञ्चल्यञ्च विषं गिरिः ।
असह्याग्निर्म्महादोषा निसर्गाः पारदे स्थिताः ॥
व्रणं कुष्ठं तथा जाड्यं दाहं वीर्य्यस्य नाशनम् ।
मरणं जड़तां स्फोटं कुर्वन्त्येते क्रमान्नृणाम् ॥
तस्माद्रसस्य संशुद्धिं विदध्याद्भिषजां वरः ।
शुद्धोय मम्रृतः साक्षाद्दोषयुक्तो रसो विषम् ॥
दोषहीनो यदा सूतस्तदा मृत्युज्वरापहः ।

रसपर्य्यायमाह रसेन्द्र इत्यादि ।—यथा शिव इत्यनेन शिवपर्य्यायानामपि रसवाचकत्वं बोधयति ॥ ६ ॥

शुद्धोऽयममृतं साक्षात् दोषयुक्तो रसो विषम्।
* मतान्तरम्।

अथातः संप्रवक्ष्यामि पारदस्य विशोधनम्।
रसो ग्राह्यः सूनक्षत्रे पलानां शतमात्रकम्।
पञ्चाशत्पञ्चविंशद्वा दशपञ्चैकमेव वा।
पलाद्धीनं न कर्त्तव्यं रससंस्कारमुत्तमम्।

मतान्तरम्॥ ७॥

शतं पञ्चाशतं वापि पञ्चविंशद्दशैव च।
पञ्चैकं वा पलञ्चैव पलार्द्धं कर्षमेव वा।
कर्षान्न्यूनं न कर्त्तव्यं रससंस्कारमुत्तमम्।
प्रयोगेषु च सर्वेषु यथा लाभं प्रकल्पयेत्।
शुभेऽह्नि विष्णुं परिचिन्त्यकुर्य्यात्।
सम्यक्कुमारी वटुकार्चनञ्च।

रसलक्षणमाह अन्तःसुनीलमित्यादि। पारदे स्थितदोषमाह नागेत्यादि।—नागःस ीसकः निसर्गा इति स्वाभाविकाः। ते सीसकादयः यथाक्रमं व्रणादि कुर्वन्ति तन्त्रान्तरेत्वन्यथा पठ्यते यथा नागो वङ्गो मलो वह्निश्चाञ्चल्यञ्च विषं गिरिः। असह्यद्याग्नि सर्द्दोषाः निसर्गाः पारदे स्थिताः। पर्पटी पाटलीभेदी द्रावी मल करी तथा। अन्धकारी तथा ध्वाङ्क्षी विज्ञेयाः सप्तकञ्चुकाः। तस्मादिति सीसकादि दोषात्। शुद्धिरित्यादि शुद्धिरिति सा च द्विविधा प्रोक्ता उक्तं हि व्याधौ रसायनेचैव द्विविधा सा प्रकीर्त्तिता। या शुद्धिः कथिता व्याधौ सा नेष्टा हि रसायने। रसायने तु या शुद्धिः सा व्याधावपि कीर्त्तितेति॥ ७॥

---

* अन्यच्च दोषहीनो यदा सूतस्तदा मृत्युञ्जरापहः। साक्षादमृतमेव सदोषयुक्तो रसो विषं इति पाठान्तरम्।

सुलोह पाषाणसमुद्भवेऽस्मिन्
दृढे च वेदाङ्गुलि गर्भमात्रे ॥
सुतप्तखल्ले निजमन्त्रयुक्ताम् ।
विधाय रक्षां स्थिरसार बुद्धिः ॥
अनन्य चित्तः शिवभक्ति युक्तः
समाचरेत् कर्म्म रसस्य तज्ज्ञः ॥ ८ ॥

अजाशकृत् तुषाग्निश्च भूगर्त्ते वितयं क्षिपेत् ।
तस्योपरि स्थितं खल्लं तप्तखल्लमिति स्मृतम् ॥
अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च ।
सर्व्वतः सर्वसर्वेभ्यो नमस्ते रुद्ररूपिभ्यः ॥

इति रक्षामन्त्रः ॥

स्नुह्यर्कसम्भवं क्षीरं ब्रह्मबीजञ्च गुग्गुलुः ।
सैन्धवं द्विगुणं मर्द्यं निगड़ोऽयं महोत्तमः ॥

रस निगड़ः ॥ ९ ॥

अथ साधारणशुद्धिः—

षोड़शांशैर्भिषक्चूर्णैरेकत्र मर्दयेद्रसम् ।
प्रत्येकं प्रत्यहं दत्वा सप्तवारं विमर्द्दयेत् ।

शतं पञ्चाशतमित्यादौ ।—यथा लाभं प्रकल्पयेदिति औषधप्रयोगेषु यथा प्रयोजनं तन्मात्रं वा ग्राह्यमित्यर्थः ॥ ८ ॥

तप्तखल्ललक्षणमाह अजाशकृदित्यादि ।—अथ निगड़माह स्नुही बीज इति लोके । अर्क आकन्दः । ताभ्यां सम्भवं यत् क्षीरं तत् । ब्रह्मबीजम् । पलाशबीजं ब्राह्मी शाकबीजमित्येके द्विगुणमिति रसापेक्षया मिलितं सर्वं द्विगुणम् ॥ ९ ॥

षोड़शांशैरित्यादौ चूर्णैरिति रसमारकद्रव्याणां चूर्णैः । षोडशांशैः

विशेष शुद्धि माह ।—

सौर्य्यैर्निशेष्टका धूम जम्बीराम्बु भिरादिनम् ।
मर्द्दितः काञ्जिकैर्धौतो नागदोषं रसस्त्यजेत् ॥
विशालाङ्कोठचूर्णेन वङ्गदोषं विमुञ्चति ।
राजवृक्षो मलं हन्ति चित्रको वह्नि दूषणम् ॥
चाञ्चाल्यं कृष्णधुस्तूरः त्रिफला विषनाशिनी ।
कटुत्रयं गिरिं हन्ति असह्याग्निं त्रिकण्टकः ॥
प्रतिदोषं कालांशेन तत्तच्चूर्णं सकन्यकम् ॥
उद्धृत्योष्णारनालेन मृत्पात्रे चालयेत् सुधीः ।
एवं संशोधितः सूतः सप्तकञ्चुकवर्जितः ।

मतान्तरम् । १० ॥

श्रीखण्डं देवकाष्ठञ्च काकजङ्घा जयाद्रवैः ।
कर्कोटो मूषली कन्या द्रवं दत्त्वा विमर्दयेत् ॥
दिनैकं पातयेत् पश्चात् तं शुद्धं विनियोजयेत् ॥

मतान्तरम् ।

कुमार्य्या च निशाचूर्णैर्दिनं सूतं विमर्दयेत् ।

रित्युत्तरत्रापि सम्बध्यते विशेषाभावात् । सौर्य्यैरित्यादिना विशेषशुद्धिमाह ऊर्णैर्मेषरोमैः निशा हरिद्रा व्यादिनमित्यतः सप्ताह मित्युपदिशन्ति वृद्धाः ऊर्णादि सर्वं कुमार्य्यासहितं रसात् षोड़शांशं दत्वा सप्ताहं मर्द्दितं ततः काञ्जिके प्रक्षालनीयम् । एवं विशालादि चूर्णमपि विशाला गोरक्ष कर्कटी अङ्कोठ इते ओंकड़ा, इति ख्यातः । अङ्कोठ इत्यत्र अङ्कोल इति केचित् पठन्ति । अङ्कोलः काकरोल इति ख्यातः । राजवृक्षः सोनालः तस्य फलमज्जा ग्राह्या । कलांशेनेति पारदस्य षोड़शांशेनेत्यर्थः । सप्तकञ्चूकवर्ज्जित इति सीसकादि सप्तदोषवर्ज्जित इत्यर्थः ॥ १० ॥

× त्रिकण्टकः गोक्षुर इति लोके ।

पातयेत् पातनायन्त्रे सम्यक् शुद्धो भवेद्रसः ॥

मतान्तरम् ॥ ११ ॥

रसस्य द्वादशांशेन गन्धं दत्त्वा विमर्दयेत् ।
जम्बीरोत्थैर्द्रवैर्यामं पाच्यं पातनयन्त्रके ।
पुनर्मर्द्यं पुनः पाच्यं सप्तवारं विधानतः ॥

मतान्तरम् ॥ १२ ॥

जयन्त्या वर्द्धमानस्य चार्द्रकस्य रसेन च ।
वायस्याश्चानुपूर्व्वं मर्दनं रसशोधनम् ॥
एषां प्रत्येक मस्तावन्मर्दयेत् खरसेन च ।
यावच्च शुष्कतां याति सप्तवारं क्रमेण च ॥
उद्धृत्योष्णारणालेन मृद्भाण्डे चालयेत्सुधीः ।
सर्वदोष विनिर्म्मुक्तः सप्तकञ्चुकवर्जितः ॥
जायते शुद्धसूतोऽयं युज्यते सर्वकर्म्मसु ॥

मतान्तरम् ॥

निशेष्टकाधूमरजोऽम्लपिष्टो
विकञ्चुकः स्याद्धि ततश्च सोर्णः ।
वरारनालाऽनलकन्यकाभिः ।
सचूषणाभिर्म्मर्दितस्तु सूतः ॥

मतान्तरम् ॥ १२ ॥

श्रीखण्डमित्यादि श्रीखण्ड श्वेतचन्दनं मूषली तालमूली पातयेदित्यर्द्धपातना यन्त्रेण खल्वयन्त्रेण इति केचित् ॥ ११ ॥

रसस्य द्वादशांशेनेत्यादौ—पातन यन्त्रक इत्यर्द्ध पातना यन्त्रे वर्द्धमानस्य एरण्डस्य वायसी काकमाता इति ख्याता ॥ १२ ॥

निशेष्टकेत्यादौ ।—सोर्णः मेषरोमसहितः वरा त्रिफला आरनालं काञ्जिकः । अनलश्चित्रकः त्रूषणं त्रिकटु ॥ १२ ॥

दिनैकं मर्दयेत् सूतं कुमारी सम्भवैर्द्रवैः।
तथा चित्रकजैः क्वाथैर्मर्दयेदेकवासरम्।
काकमाचीरसैः सार्द्धं दिनमेकन्तु मर्दयेत्।

मतान्तरम्।

रसो न स्वरसैः सूतः नागवल्लीदलोत्थितैः।
त्रिफलायास्तथाक्वाथै रसो मर्द्यः प्रयत्नतः।
ततस्तेभ्यः पृथक् कृत्वा सूतं प्रक्षाल्यकाञ्जिकैः।
सर्वदोष विनिर्म्मुक्तं योजयेद्रसकर्म्मसु।

अथोर्द्ध्वपातनम्।—

भागास्त्रयो रसस्यार्कं भागमेकं विमर्दयेत्।
जम्बीरद्रवयोगेन यावदायाति पिण्डताम्।
तत्पिण्डं तलभाण्डस्थ मूर्द्ध्वभाण्डे जलं क्षिपेत्।
कृत्वालवालं केनापि ततः सूतं समुद्धरेत्॥
ऊर्द्ध्वपातनमित्युक्तं भिषग्भिः सूतशोधने॥ १४॥

अधुना रसायने विशेष शुद्धिमाह ऊर्द्ध्वपातन मित्यादि।—ऊर्द्ध्वपातनमाह भागइत्यादि अर्कभागमेकमिति ताम्रस्य चैको भागः ऊर्द्ध्वपातन लक्षणञ्चाह तत्पिण्डेति तन्त्रान्तरेऽस्य विद्याधरयन्त्रमिति तन्त्रान्तरं यथा स्थालिकोपरिन्यस्त स्थालीं सम्यक् निरोधयेत्। स्थाली मूर्द्ध्नि जलं दत्वा वह्निं प्रज्वालयेदधः। एतद्विद्याधरं यन्त्रं पातना यन्त्रमित्यपि। पातनायन्त्रमित्यूर्द्ध्वपातनायन्त्रम्। हण्डिकोपरितनभागेऽन्यां हण्डिकामूर्द्ध्वमुखीं विन्यस्याधो हण्डिकाभ्यन्तरे पाच्यं सूतादिकं निवेश्य च द्वयोः सन्धिं निरोधयेत् तत उपरितनस्थाल्यां जलं दत्त्वा अधो वह्निं प्रज्वालयेदिति। पातनञ्च त्रिविधं ऊर्द्ध्वपातनं, अधःपातनं तिर्य्यक्पातनञ्च॥ १४॥

अथाधः पातनम् ।—

नवनीताह्वयं सूतं घृष्ट्वा जम्बाम्भसा दिनम् ।
वानरी शिग्रु शिखिभिः सैन्धवा सुरिसं युतैः ॥
नष्टपिष्टं रसं कृत्वा लेपयेदूर्द्ध भाण्डके ।
ऊर्द्ध भाण्डोदरं लिप्त्वाऽधोभाण्डं जलसंयुतम् ॥
सन्धिलेपं द्वयोः कृत्वा तत्यन्त्वं भूविपूरयेत् ॥
उपरिष्टात् पुठे दत्तेर्जले पतति पारदः ।
अधःपातनमित्युक्तं सिद्धाद्यैः सूतकर्म्मणि ॥ १५ *

अथ तिर्य्यक्पातनम् ।—

घटे रसं विनिःक्षिप्य सजलं घटमन्यकम् ।
तिर्य्यङ्मुखं द्वयोः कृत्वा तन्मुखं रोधयेत्सुधीः ॥
रसाधोज्वालयेदग्निं यावत्सूतो जलं विशेत् ॥
तिर्य्यक्पातन मित्युक्तं सिद्धैर्नागार्जुनादिभिः ॥ १६ ॥

अथ बोधनम् ।—

एवं कदर्थितः सूतः षण्ढत्वमधिगच्छति ।
तन्मुक्तयेऽस्य क्रियते बोधनं कथ्यते हितत् ॥
विश्वामित्रकपाले वा का च कुप्या मथापि वा ।
सूते जलं विनिःक्षिप्य तत्र तन्मज्जनावधि ॥

अथाधः पातनमाह नवनीतेति । नवनीताह्वयगन्धः लाउया गन्धक इति ख्यातः । स च सूत समः जम्बाम्भसा जम्बीररसेन ॥१५॥*

अथ तिर्य्यक्पातनमाह घटेरसमित्यादि रोधयेदिति सम्बन्धये-दित्यर्थः ॥ १६ ॥

---

* १५ वानरी स्नूकशीम्बी शिग्रु सजिना शिखि, अपामार्गः आसुरि श्वेतसर्षपः ।

पूरयेत्त्रिदिनं भूम्यां गजहस्तप्रमानतः।
अनेन सूतराजोयं षण्ढभावं विमुञ्चति ॥ १७ ॥
अथवा हिङ्गुलात्सूतं ग्राहयेत्तन्निगद्यते।
जम्बीरनिम्बुनीरेण मर्द्दितो हिङ्गुलोदिनम्।
ऊर्द्धपातनयन्त्रेन ग्राह्यः स्यान्निर्म्मलो रसः।
कञ्चुकैर्नागवङ्गाद्यैर्निर्म्मुक्तो रसकर्म्मणि।
विना कर्म्माष्टकेनैव सूतोऽयं सर्वकर्म्मकृत् ॥ १८ ॥

अष्टकर्म्म यथा।—

स्वेदनं मर्द्दनञ्चैव मूर्च्छनोत्थापनन्तथा।
पातनं बोधनञ्चैवनियामन मतः परम् ॥
दीपनञ्चेति संस्कारा: सूतस्याष्टौ प्रकीर्त्तिताः।
मतान्तरम् ॥ १९ ॥

अथ बोधनमाह एवमित्यादि।—विश्वामित्रेत्यादि।—विश्वामित्र कपाले नारिकेल खर्परे ॥ १७ ॥

अथ हिङ्गुलाकृष्ट रसमाह अथ वेति स्पष्टम् ॥ १८ ॥

स्वेदनमित्यादिना अष्टादशरसकर्म्मणां मध्ये दीपनान्ता अष्टौ संस्कारा उक्ताः। तेषां लक्षणं यथा रसस्त्रिगुणे वस्त्रे दिनं दोलागतं पचेत्। वराव्योषाग्नि कन्यार्क्के काञ्जिके स्वेदनन्त्विदम्। ष्टहधूमेष्टकाजाजी दग्धोर्णागुड़सैन्धवैः। सकाञ्जिकैः षोड़शांशैर्म्मर्द्दनं त्रिदिनं शुभम्। वरावह्नि कुमारीभिः सप्तधा मूर्च्छितो रसः। पात्यपातनयन्त्रे च मूर्च्छितो भवति ध्रुवम्। मर्द्दयेत् कन्यका द्रावैश्चूर्णितै राजिपादिकैः। पातयेत् पातनायन्त्रे इत्युत्थापनमीरितम्। पातनमिति ऊर्द्धादिपातनम्। बोधनं विश्वामित्रकपालेत्यादिना चोक्तम्। नियामनं यथा।—सर्पाक्षि चिञ्चिकावन्ध्या भृङ्गाअर्कनकाम्बुभिः। त्रिदिनं मर्द्दितः सूतो नियमात् स्थिरतां व्रजेत्। दीपनं यथा—कासीसं पञ्चलवणं राजिका मरिचानि च।

दरदं तण्डुलस्थूलं कृत्वा मृत्पात्रके त्रिदिनम्
भाव्यं जम्बीररसैश्चाङ्गेर्य्या वा रसैर्बहुधा।
ततश्च जम्बीरवारिणा चाङ्गेर्य्या रसेन परिप्लुतम्।
कृत्वा स्थालीमध्ये निधाय तदुपरि कठिनी घृष्टम्।
चारु शरावं तत्र त्रिंशद्वारं जलं देयम्।
उष्णे द्देयं तथैव तदूर्द्ध्वपातनेन निर्म्मलः शिवजः।

मतान्तरम्॥ २०॥

भूमिपुबीजमेकत्र टङ्कणेन समन्वितम्। आलोड्य काञ्जिके दोलायन्त्रे पाकाद्दिनैस्त्रिभिः। दीपनं जायते सम्यक् सूतराजस्य जारणे। अष्टादशरसकर्म्मणां मध्ये दीपनान्ता अष्टौ संस्काराः संक्षेपोक्ताः पाशादयश्चापरे दशसंस्काराः ग्रन्थबाहुल्याज्ज्ञेया अत्र। प्रयोगार्थञ्च रसस्य चतुर्व्विधसंस्कारणमुक्तं यथा शोधनं मूर्च्छनं बन्धनं मारणञ्च। तत्र शोधनांश्चे वाच्यं तप्तखल्लादीना दशसंस्काररूपम्। मूर्च्छनञ्च द्विविधं निर्गन्धं सगन्धञ्च निर्गन्धं रसकर्पूरादि। सगन्धञ्च कज्जलरूपं रसगन्धं तथा रससिन्दूरादि च। उक्तञ्च गौरवं घनता यस्मिन् तेजस्वित्वञ्च दृश्यते सूते। सोऽयं मूर्च्छितः सूतो विज्ञेयो नैवं वह्निना सहः। निर्गन्धञ्च सगन्धं द्विविधं विद्यात्तु मूर्च्छनं सूतम्। निर्गन्धं रसकर्पूरं, रससिन्दूरं सगन्धकं विद्यात्, यस्मिन् गुरुताऽरूपता तेजस्वित्वञ्च सूते दृश्यते दृढ़शिखिमध्ये तिष्ठेत् स बद्धः सूतोऽमृतसमः बन्धनञ्च कलौ सुदुष्करः साधकाभावादुपदेशाभवाच्चा। रसमारणञ्च वास्तवः कलौ नास्ति साधकाभावादुपदेशाभावाच्च। द्रवघनगुरुता चञ्चलता तेजास्वित्वञ्च न दृश्यते यत्र। तं मृतसूतं विद्यात् नैकः सर्व्वत्र वर्णनियमोऽस्ति॥ १९॥

अथ हिङ्गुलाकृष्टरसमाह दरदमित्यादि। स्थालीमध्ये हिङ्गुलं यथोक्तविधिना संस्थाप्य तदुपरि कठिनी लिप्तं उत्तानं शरावं दत्त्वा वस्त्रदाम्बरैः सन्धिं दृढ़ं रुन्ध्यात् ततः पात्राधो ज्वालादेया शरावोपरि वारम्वारं जलं देयं किञ्चिदुष्णे च परित्यज्य पुनर्ज्जलं देयमिति। एवं त्रिंशद्वार कृत्वा चावनामयेत्। स्वशीते च पात्रे शरावस्थवृर्ध्वाद्यमा खटि-

पारिभद्र रसैः पिष्टं हिङ्गुलं याम मात्रकम्।
जम्बीराणां रसैर्वाथ पचेत्पातन यन्त्रके।
तं सूतं योजयेत् योगे सप्तकञ्चुकवर्जितम्।
संशुद्धिमन्तरेणापि शुद्धोऽयं रसकर्म्मणि॥

इति हिङ्गुलाकृष्टो रसः॥

गन्धकेन रसं प्राज्ञः सुदृढ़ं मर्द्दयेद्भिषक्।
कज्जलाभो यदा सूतो विहाय घन चापलम्॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसको विदैः।
असौ रोगचयं हन्यादनुपानस्य योगतः।

इति मूर्च्छनम्॥ २१॥

द्विपलं शुद्ध सूतस्य सूतार्द्धं गन्धकं तथा।
कन्यानीरेण संमर्द्य दिनमेकं निरन्तरम्॥
रुद्ध्वा तद्भूधरे यन्त्रे दिनैकं मारयेत्पुटे॥

मतान्तरम्॥ २२॥

भुजङ्ग वल्ली नीरेण मर्द्दयेत्पारदं दृढ़म्।
कर्कटीकन्द मूषायां संपुटस्थं पुटेद्गजे॥

काषह्रितं पारदं गृह्णीयात्। ततो वस्त्रेच्छानयित्वा वारम्वारं जले काञ्जिके वा प्रक्षाल्य निर्मलं पारदं गृह्णीयादिति॥ २०॥

मतान्तरमाह पारिभद्रेति पातनायन्त्र केति जर्द्धपातनायन्त्रे संशुद्धि मन्तरेनापीति, तप्तखल्वादि शुद्धिव्यतिरेकेनायं शुद्धम्। अत्र तप्तखल्वादिना तथा पातनादिना च शोधनं निष्प्रयोजनमिति भावः।

मूर्च्छनमाह गन्धकेनेति। सुगमम्॥ २१॥

मारणमाह द्विपलमित्यादि। भूधरयन्त्रेति वालुकासु समस्ताङ्गं गर्त्तमूषा रसान्विता। दीप्तोपलैः संवृणुयात् यन्त्रं भूधरनामकमित्यादिनोक्तम्॥२२॥

भस्मतत् योगवाहिस्यात् सर्वकर्म्मसु योजयेत्।

मतान्तरम् ॥ २३ ॥

श्वेताङ्कोठ जटानीरैर्म र्द्दः सुतो दिनत्रयम्।
पुटेत्तु चान्धमूषायां सूतो भस्मत्वमाप्नुयात्॥

मतान्तरम ॥ २४ ॥

देवदाली हंसपादी यमचिञ्चा पुनर्नवा।
एभिः सूतो विमृष्टव्यो पुटनात् म्रियते ध्रुवम्॥

इति भस्म ॥ २५ ॥

भागो रसस्यत्रय एवभागा
गन्धस्य माषः पवनाशनस्य।
संमर्द्द्य गाढं सकलं सुभाण्डे
तां कज्जलीं काच घटे निदध्यात्॥
संरुध्य सृत्कर्पटकैर्घटोन्तां
मुखे सचूर्णां खटिकाञ्च दत्वा।
क्रमाग्निना त्रीणि दिनानि पक्का
तां वालुकायन्त्रगतां ततः स्यात्॥
बन्धुकपुष्पारुण मोश्वजस्य
भस्मप्रयोज्यं सकलामयेषु॥
निजानुपानैर्मरणं जराञ्च।

मतान्तरमाह भूजङ्गवल्लीति भूजङ्गवल्लीपर्य्यपत्रम् ॥ २४ ॥

मतान्तरमाह श्वेताङ्कोठेत्यादि। अन्धमूषादीनि यन्त्राखि यन्त्रप्रकरणेऽनुसन्धेयानि ॥ २४ ॥

मतान्तरमाह देवदालीत्यादि। देवदाली हंसघोषकः। हंसपादी यानकुनीति ख्याता ॥ २५ ॥

हन्त्यस्य वल्लः क्रम सेवनेन ॥

* मतान्तरम् ॥ २६ ॥

पलमात्रं रसं शुद्धं तावन्मात्रन्तु गन्धकम्।
विधिवत् कज्जलीं कृत्वा न्यग्रोधाङ्कुर वारिभिः।
भावना त्रितयं दत्वा स्थालीमध्ये निधापयेत्।
विरच्य कवचो यन्त्रं वालुकाभिः प्रपूरयेत् ॥
दद्यात्तदनु मन्दाग्निं भिषग्याम चतुष्टयम्।
जायते रससिन्दूरं तरुणादित्य सन्निभम्।
अनुपान विशेषेण करोति विविधान् गुणान्।

मतान्तरम् ॥ २७ ॥

पृथक् समंसमं कृत्वा पारदं गन्धकं तथा।
नरसारं धूमसारं स्फटिकं याम मात्रकम्।
निम्बु रसेन संमर्द्य काचकुप्यां निवेशयेत् ॥
मुखे पाषाण खटिकां दत्वा मुद्रां प्रलेपयेत् ॥
सप्तभिर्मृत्तिकावस्त्रैः पृथक् संशोध्य वेष्टयेत्।
सच्छिद्रायां मृदः स्थाल्यां कुपिकान्तांनिवेशयेत्।
पूरयेत्सिकतापूरैः रागलं मतिमान् भिषक्।
निवेश्य चुल्ल्यां दहनं मन्दं मध्यं खरं क्रमात्।

अथ रससिन्दूरमाह भाग इत्यादि। पवनाशनस्येति सीसकस्य। मृत्कर्पटकैरिति मृत्तिकायुक्तवस्त्रखण्डैर्लेपयित्वा ॥ २६ ॥

मतान्तरमाह पलमित्यादि। अत्र रसस्य द्विपलं गन्धकस्य च द्विपलं ग्राह्यम्। रसं शुद्धमिति पूर्वोक्तशोधनीयद्रव्यैः शोधितम्। न्यग्रोधाङ्कुरवारिभिरिति वटाङ्कुररसैरित्यर्थः ॥ २७ ॥

---

* वल्लः रत्तिचतुष्टयं रत्तित्रयं रत्तिद्वयम्वा

प्रज्वाल्य द्वादशं यामं स्वाङ्गशीतं समुद्धरेत्॥
स्फोटयित्वातु मुक्ताभ मूर्द्धलग्नं वलिं त्यजेत्।
अधःस्थं रससिन्दूरं सर्वरोगेषु योजयेत्॥

इति रससिन्दुरम्॥ २८॥

टङ्कणं मधुलाचा च जर्णा गुञ्जा युतो रसः।
मर्द्दितो भृङ्गजद्रावैर्द्दिनं संपूट मागतम्। *
ध्मातो भस्मत्व माप्नोति शुद्धकर्पूरसन्निभम्।

मतान्तरम्॥ २९॥

पिष्टं पांशुपटु प्रगाढ़ममलं वज्राम्बुनानेकशः।
सूतं धातुगतं खटी कवलितं तं संपुटेरोधयेत्॥
अन्तस्थं लवणस्य तस्यच तले प्रज्वालय वह्निं दृढ़म्।
चस्तं ग्राह्यमथेन्दु कुन्दधवलं भस्मोपरिस्थं शनैः॥
तद्वल्लद्वितयं लवङ्ग सहितं प्रातः प्रयुक्तं भजेत्।

मतान्तरमाह पृथगित्यादि। नरसारं निसादलम्। मुद्रां प्रलेपयेदिति सन्धिस्थानं लेपयेत्। श्वागलमिति काचकुपिकाया गलपर्य्यन्तं न तु स्तङ्गाण्डस्य। अधःस्थं रससिन्दूरमित्यूर्द्धलग्नगन्धकादधःस्थं रससिन्दूरं ग्राह्यं न तु पात्राधस्तात् पात्राधस्तु न रससिन्दूरं सम्भवतीति॥ २८॥

अथ रसकर्पूरमाह टङ्कणमित्यादि।—जर्णामेष रोमं गुञ्जा श्वेत गुञ्जा॥ २९॥

---

* द्विवैकं चालयेत् पुनरिति पाठान्तरम्।

ऊर्द्धं रेचयति द्वियाममसकृत् पेयं जलं शीतलम् ॥*

रसकर्पूरमिति रसमञ्जरीकारः ।

श्वेतभस्मेति चन्द्रिका ॥

सुधानिधि रसः ॥ २० ॥

मर्द्दयेत् रसगन्धौ च हस्ति शुण्डी द्रवैर्द्दृढम् ।
मूषालिका रसैर्वापि यथैवं दिनसप्ततः ॥
विशुष्य वालुकायन्त्रे मूषायां सन्निवेशयेत् ।
दिनमेकं ददेदग्निं मन्दं मन्दं निशावधि ॥
एवं निष्पद्यते पीतः शीतः सूतस्तु गृह्यते ।
पर्णखण्डेन तद्गुञ्जां भक्षयेत् शृणुतां मम ॥
क्षुद्बोधं कुरुते पूर्वमुदराणि विनाशयेत् ।
ज्वराणां नाशनः श्रेष्ठ स्तद्वत् श्रीसुखकारकः ॥
हृदयोत्साह जननः स्वरूपतनयप्रदः ।
बलप्रदः सदा देहे जरानाशन तत्परः ॥
अङ्गभङ्गादिकं दोषं सर्वं नाशयति क्षणात् ।
एतस्मान्नपरः सूतो रसात्सर्वाङ्ग सुन्दरात् ॥

सर्वाङ्ग सुन्दरो रसः ॥

पीतभस्मेति चन्द्रिका कारः ॥ २१ ॥

मतान्तरमाहे पिष्टमित्यादि । भाण्डगतमिति लौहपात्रगतं खटीकवलितमिति खटिकया बद्धमुखम् ॥ २० ॥

---

* एतद्धन्ति च वत्सरावधि विषं षण्मासिकं मासिकं शैलोत्थं गरलं खगेन्द्रकुटिलोद्भूतञ्च तत्कालिकपटु सैन्धवं वज्रीशीजक्षः-अलस्य मध्यस्थं वल्लद्वितयं ४ रत्तिपरिमानम् । शैलोत्थं गड़लं पाषाणघातजन्यं विषम् । खगेन्द्र इत्यादि सिंहदंशनजन्य विषमिति ।

धान्याभ्रकं रसं तुल्यं मारयेन्मारकद्रवैः।
दिनैकं तेन कल्केन वस्त्रं लिप्त्वा तु वर्त्तिकाम्।
विलिप्य तैलैर्वर्त्तिं तामेरण्डोत्थैः पुनः पुनः।
प्रज्वाल्य तदाऽन्यभाण्डे गृह्णीयात् पतितञ्च यत्।
कृष्णभस्म भवेत्तच्च पुनर्मर्द्यं नियामकैः।
दिनैकं पातयेत्यन्त्रे कन्दुकाख्ये न संशयः।
मृतः सूतो भवेत्सत्यं तत्तद्रोगेषु योजयेत्॥

इति कृष्णभस्म॥ ३२॥

श्वेतं पीतं तथा रक्तं कृष्णञ्चेति चतुर्विधम्।
लक्षणं भस्मसूतानां श्रेष्ठं स्यादुत्तरोत्तरम्।
द्वौ भागौ तुषदग्धस्य चैका वल्मिकमृत्तिका।
लौहकिट्टस्य भागैकं श्वेतपाषाणभागिकम्॥
नरकेशं समं पश्चाच्छागीक्षीरेण पेषयेत्।
याममात्रं दृढं पश्चात्तेन मूषां प्रकल्पयेत्॥
शोषयित्वा तु संलिप्य तत्कल्कैः सन्निरोधयेत्।
वज्रमूषेयमाख्याता सम्यक् पारदसाधिका॥

इति मूषाकरणम्॥ ३३॥

सर्वाङ्गसुन्दरमाह रसगन्धाविति रसगन्धकौ समौ कज्जलीकृत्य हस्तिशुण्डीरसैर्भूम्यामलकीरसैश्च दिनसप्तकं विद्धय मूषायां निरुध्य वालुकायन्त्रे कृत्वा दिनमेकं पचेत्। पीत इति पीतवर्णः सूतो भवत इति॥ ३१॥

कृष्णभस्माह धान्याभ्रकमित्यादि मारकद्रव्यैरिति वक्ष्यमाण मारकद्रव्यरसैः॥ ३२॥

मूषाकरणमाह द्वौ भागाविति। तुषदग्धस्येति मृद्धदग्धतुषस्य द्वौ भागाविति॥ ३३॥

सर्पाक्षी वन्ध्यकर्कोटी कञ्चुकी यमचिञ्चिका। *
शतावरी शङ्खपुष्पी शरपुङ्खा पुनर्नवा॥
मण्डूकपर्णी मत्स्याक्षी ब्रह्मदण्डी शिखण्डिनी।
अनन्ता काकजङ्घा च काकमाची कपोतिका॥
विष्णुक्रान्ता सहचरा सहदेवा महाबला।
बला नागबला मूर्वा चक्रमर्दः करञ्जकः।
पाठा तामलकी नीली जालिनी पद्मचारिणी।
घण्टा विकण्टगोजिह्वा कोकिलाक्ष घनध्वनिः।
आखुपर्णी क्षीरिणी च त्रिपुषी मेषशृङ्गिका॥
कृष्णवर्णा च तुलसी सिंहिका गिरिकर्णिका।
एतानियामकौषध्यः पुष्पमूलदलान्विताः॥

इति नियामकगणः॥ ३४॥

घन वचा चित्रक गोक्षुर कटुतुम्बी दन्तिब्राजाति।
सर्पाक्षी शरपुङ्खा कन्या चाण्डालिनीकन्दम्॥
विषमुष्टि वज्रवल्ली लज्जा देवदाली लाक्षा।
सहदेवा नीपकर्णा निर्गुण्डी चक्र लाङ्गलिका॥
माणार्क चन्द्ररेखा रविभक्ता काकमाचिकाचार्कः।
विष्णुक्रान्ता वायसतुण्डी वन्ध्या बला शुण्ठीचैव॥
कोषातकी जयन्ती वाराही हस्तिशुण्डिका रम्भा।

अथ नियामकगणमाह सर्पाक्षीत्यादि सर्पाक्षी गन्धनाकुली। कञ्चुकी क्षीरिणबृक्षः॥ ३४॥

---

* वनकर्कोटी वनकाकँड़ इति लोके। कञ्चुकी केँचरा इति लोके शङ्खपुष्पी ढोवकलमाति लोके। शतपुष्पा शलुका इति लोके। मण्डूकपर्णी थानकुनीति लोके॥ ३४॥

मत्स्याक्षी यमचिञ्चा हरिद्रे द्वे पुनर्नवाद्वितयम् ॥
धुस्तूर काकजङ्घा शतावरी कञ्चुकीचैव बन्ध्या।
तिलभेकपर्णीके दूर्व्वा मूर्व्वा हरीतकी तुलसी ॥
गोकण्टकाखुपर्ण्यौ कर्कटीकन्द वर्गलता च।
मूषली हिङ्गु गुडूची शिग्रु गिरिकर्णिका महाद्रोणी।
मार्कव सैन्धव सरणी सोमलता श्वेतसर्षपासनञ्च।
हंसपदी व्याघ्रपदी किंशुक भल्लातकेन्द्रवारुणिकाः॥
सर्व्वेषामंशं वा अष्टादशाधिका वापिद्रव्यम्।
समारणमूर्च्छादौ च युक्तिज्ञैर्व्विधिवदुपयोज्यम् ॥

इति मारकवर्गः ॥ ३५ ॥

अम्लवेतस जम्बीरलुङ्गाम्ल चणकाम्लकाः।
नागरङ्गं तिन्तिड़ी च चिञ्चापत्रञ्च निम्बुकम् ॥
चाङ्गेरी दाड़िमञ्चैव करमर्द्दं तथैव च।
एष चाम्लगणः प्रोक्तो वेतसाम्ल समायुतः :

अम्लगणः ॥ ३६ ॥

लवणानि च कथ्यन्ते सामुद्रं सैन्धवं विड़म्।
सौवर्च्चलं रोमकञ्च चुल्लिका लवणास्तथा ॥

लवणवर्गः ॥ ३७ ॥

मूत्राणि हस्तिकरभ महिषी खरवाजिनाम्।

अथ मारकगणमाह धनवचेति घनं मुस्तकं नीपं कदम्बः चन्द्रलेखा सोमराजी रविभक्ता पाठमाधा इति ख्याता ॥ ३५ ॥

अम्लवर्गमाह अम्लवेतसेति। लुङ्गाम्लं मातुलुङ्गम् ॥ ३६ ॥

लवणवर्गमाह लवणमिति सामुद्रं करकचमिति ख्यातं रोमकं रुमा-नदीभवम् ॥ ३७ ॥

गोजावीनां स्त्रियां पुंसां मूत्रवर्ग उदाहृतः॥

इति मूत्रवर्गः॥ ३८॥

गुञ्जा टङ्कणमध्वाज्य गुड़ा द्रावकपञ्चकाः॥ ३९॥

पित्तं पञ्चविधं मत्स्यगवाश्व रुरुवर्हिजम्।

द्रावकपित्तवर्गौ॥ ४०॥

स्वर्जिका टङ्कणश्चैव यवक्षार उदाहृतः।

क्षारवर्गः॥ ४१॥

प्रातरेव पुरतो विरेचनं
तद्दिनोपवसनं विधाय च।
तत्परेऽहनि च पथ्यसेवनं
तत्परेऽहनि च रसेन्द्रसेवनम्॥

बुद्धि स्मृति प्रभा कान्ति बलञ्चैव रसस्तथा।
वर्द्धन्ते सर्व एवैते रससेवाविधौ नृणाम्॥

इति रससेवाक्रमफले॥ ४२॥

मूत्रवर्गमाह मूत्रानीत्यादि। करभः उष्ट्रः, खरः गर्दभः अवीनामिति मेषाणाम्॥ ३८॥

अथ द्रावकवर्गमाह गुञ्जेति गुञ्जा श्वेतगुञ्जा धातूनां द्रवीकरणत्वात् द्रावकेति॥ ३९॥

पञ्चपित्तमाह मत्स्येत्यादि। तन्त्रान्तरे तु तदन्यथा पठ्यते यथा वाराहच्छागमाहिषमात्स्यमायूरपित्तकम्। पञ्चपित्तमिति ख्यातं सर्वेष्वेव हि कर्मसु॥ ४०॥

अथ क्षारवर्गमाह स्वर्जिकेति स्वर्जिका साजिमाटीति ख्याता॥४१॥

रससेवाक्रममाह।—विरेचनमिति चात्यन्तिकशोधनोपलक्षितं कफान्तविरेचनमिति। पथ्यसेवनमिति वक्ष्यमाण रससेवनोपयोगि पथ्यं भक्षयेत्। एतञ्च रसायनोपलक्षितं रससेवनं न च रोगोपशमनार्थं

हितं मुद्गाम्बुदुग्धाज्यं शाल्यन्नञ्च विशेषतः ।
शाकं पौनर्नवं वास्तु मेघनादञ्च यूथिकाम् ।
लवणं मागधीं मुस्तं पद्ममूलानि भक्षयेत् ॥

इति पथ्यकथनम् ॥ ४३

अनुपानन्तु दातव्यं ज्ञात्वा रोगादिकं भिषक् ।
कुष्माण्डं कर्कटीञ्चैव कलिङ्गं कारवेल्लकम् ॥
कुसुम्भिका च कर्कोटी कलम्बो काकमाचिका ।
ककाराष्टकमेतद्धि वर्जयेद्रसभक्षकः ॥ ४४ ॥

इति रसशोधनविधिः ।

गन्धकं वज्रवैक्रान्तं वज्राभ्रं तालकं शिला ।
खर्परं शिखितुण्डञ्च विमलं हेममाक्षिकम् ॥
काशीशं कान्तपाषाणं वराटाञ्जनहिङ्गुलम् ।
गैरिकं शङ्खभूनागं टङ्कणञ्च शिलाजतु ॥
एते चोपरसाः प्रोक्ताः शोध्यामार्य्या विधानतः ॥४५ ॥*

मिति । रोगे च वमनविरेचनाभ्यां शुद्धौ देहे प्रयोज्यः । येषु वमन-विरेचनादिकमविधेयं तेषु च तद्व्यतिरेकेणापीति ॥ ४२ ॥

अथ पथ्यमाह हितमित्यादि । मुद्गाम्बु मुद्गयूषम् ॥ ४३ ॥

अपथ्यमाह कुष्माण्डमित्यादि स्पष्टम् ॥ ४४ ॥

इति रसशोधनाधिकारः ।

रसशोधनाद्यनन्तरमुपरसाध्यायमाह ।—प्रथमत स्तत्रोपरसानां नामान्याह गन्धकेत्यादि । वज्रं हीरकम् । वैक्रान्तं दग्धहीरकम् । शिखितुण्डं शिखिपीवम् । हेममाक्षिकं स्वर्णमाक्षिकम् अञ्जनं रसाञ्जनम् ॥ ४५ ॥

---

* शिखितुत्थं तुतिया इति ख्यातं काशीशं हिराकस इति लोके ॥ ४५ ॥

तत्रादौ गन्धकोत्पत्तिशोधनञ्चाह।—

श्वेतद्वीपे पुरा देव्याः क्रीड़न्त्याः प्रस्रुतं रजः।
क्षीरार्णवे तु स्नातायाः दुकूलं रजसान्वितम्।
धौतं तत्सलिले तस्मिन् गन्धको गन्धवत् स्मृतः॥ ४६॥

चतुर्धा गन्धकः प्रोक्तो रक्तःपीतोऽसितः सितः।
रक्तो हेमक्रियासूक्तः पीतश्चैव रसायने।
व्रणादिलेपने श्वेतः श्रेष्ठः कृष्णः सुदुर्लभः॥

अशुद्धगन्धः कुरुते तु तापं
कुष्ठं भ्रमं पित्तरुजां करोति।
रूपं बलं वीर्य्य सुखं निहन्ति
तस्मात् सुशुद्धो विनियोजनीयः॥

गन्धको गन्धपाषाणः शुकपुच्छः सुगन्धकः।
सौगन्धिकः शुल्वरिपुः पामारिर्नवनीतकः॥ ४७॥

आज्यं भाण्डे पयःक्षिप्त्वा मुखं वस्त्रेण बन्धयेत्।
तत्पृष्ठे गन्धकं क्षिप्त्वा शरावेण पिधापयेत्॥
भाण्डं निःक्षिप्य भूम्याध ऊर्द्ध्वं देयं पुटं लघु।
ततः क्षीरे द्रुतं गन्धं शुद्धं योगेषु योजयेत्॥

मतान्तरम्॥ ४८॥

अथ गन्धकोत्पत्तिमाह श्वेतद्वीप इत्यादि दुकूलं वस्त्रम्॥ ४६॥

चतुर्धेत्यादौ।—श्रेष्ठो हेमादिषु सर्वत्र प्रशस्ततरः। अशुद्धगन्धस्य दोषमाह अशुद्धेत्यादि।—पित्तरुजामिति पित्तकृतविकारान्। अथ गन्धकपर्य्यायमाह गन्धकेत्यादि॥ ४७॥

अथ गन्धकशोधनमाह आज्यमित्यादि। भाण्डे आज्यं पयःक्षिप्त्वा तन्मुखं सूक्ष्मवस्त्रेण सुबध्य आच्छाद्य चूर्णितं गन्धकं तस्योपरि संस्थापयेत्।

लौहपात्रे विनिःक्षिप्य घृतमग्नौ प्रतापयेत् ।
तप्ते तप्ते तत्समानं क्षिपेत् गन्धकजं रजः ॥
विद्रुतं गन्धकं दृष्ट्वा दुग्धमध्ये विनिःक्षिपेत् ।
एवं गन्धकशुद्धिः स्यात् सर्वरोगेषु योजयेत् ॥

* इति गन्धकशुद्धिः ॥ ४९ ॥

शुद्धगन्धो हरेद्रोगान् कुष्ठ मृत्यु जरादिकान् ।
अग्निकारी महानुष्णो वीर्य्यवृद्धिं करोति च ॥

अन्यच्च ।

गन्धश्चाति रसायनः सुमधुरः पाके कटूष्णान्वितः ।
कण्डू कुष्ठ विसर्पदर्पदलनः दीप्तानलः पाचनः ॥
आमोन्मथनः शोधनो विषहरः सूतेन्द्र वीर्य्यप्रदः ।
गौरीपुष्पभवस्तथा क्रिमिहरः स्वर्णाधिकं वीर्य्यकृत् ॥

इति गन्धकगुणकथनम् ॥ ५० ॥

ततः शरावेण पात्रमुखमाच्छाद्य सन्धिमालेपयेत् ततश्च यन्त्रं भूम्यन्तरं निधाय उपरिष्टात् गोमयाग्निना लघुपुटं देयं तेन पुटेन द्रवीभूत गन्धो निम्नस्थदुग्धमध्ये यदा पतति तदा तदुद्धृत्य प्रक्षाल्य आतपे शोषयित्वा चूर्णयेत् एवं वारद्वयं त्रयं वा कुर्य्यात् ॥४८॥

मतान्तरमाह लौहपात्र मित्यादि ।—वदराङ्गारोपरि लौहपात्रं विन्यस्य घृतं निःक्षिपेत् तप्ते च घृते चूर्णितं गन्धकं दत्वा गण्डिकया संचालयेत् यदा तैलवत् द्रवीभवति तदा दुग्धपरिप्लुतपात्रे घृताक्तसूक्ष्मवस्त्रेण पिहितमुखे ढालयेत् एवं पुनः पुनः कुर्य्यात् । तदनुप्रक्षाल्य आतपे शोषयित्वा चूर्णयेदिति ॥ ४९ ॥

गन्धक गुणमाह शुद्ध गन्ध इत्यादि ॥ ५० ॥

---

* लौहपात्रे साज्यगन्धं पक्वा तैलनिभं क्षिपेत् भृङ्गराजद्रवेक्षिप्तं शुद्धिमायाति निश्चित मिति त्वतिरिक्तपाठः ।

अथ वज्रशोधनमाह।—

पार्श्वपीड़ां पाण्डुरोगं ह्रल्लासं दाहसन्ततिम्।
रोगानीकं गुरुत्वञ्च धत्ते वज्रमशोधितम्॥
व्याघ्रीकन्दगतं वज्रं दोलायन्त्रे विपाचितम्।*
समाहं कोद्रवक्काथे कौलत्थे विमलं भवेत्॥

मतान्तरम्॥ ५१॥

वज्रशोधनमारणादिकमाह अथवज्रेति—वज्रं हीरकं यद्यप्यत्र वज्रलक्षणं नोक्तं तथापि तन्त्रान्तरमनुसर्त्तव्यं यथा स्वच्छं विद्युत्प्रभं स्निग्धं सौन्दर्यं लघु लेखनम्। षड़ारन्तीक्ष्णधारञ्च सुशास्यारं श्रियं दिशेत् भस्माभं काकपादञ्च रेखाक्रान्तञ्च वर्त्तुलम्। आधारमलिनं विन्दुसंत्रासं स्फूटितं तथा। नीलाभं चिपिटं रूक्षं तद्वज्रं दोषलं त्यजेत्। सतु श्वेतः स्मृतोविप्रो लोहितःक्षत्रियो मतः पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मकश्च सः। रसायने मतो विप्रः सर्वसिद्धिप्रदायकः। क्षत्रियोव्याधिविध्वंसी जरामृत्युहरःपरः। वैश्यो धनप्रदः प्रोक्तः स्याद्देहस्यदार्ढ्यं कृत्। शूद्रो नाशयति व्याधीन् वयस्तम्भं करोतिच। स्त्रीपुंनपुंसकाश्चैते लक्षणीयाश्च लक्षणैः। सुवृत्ताः फलसंपूर्णास्तेजोयुक्ता बृहत्तराः। पुरुषास्ते समाख्याता रेखाविन्दुविवर्ज्जिताः। रेखाविन्दुसमायुक्ताःषड़स्रास्ते स्त्रियः स्मृताः। त्रिकोणाश्चसुदीर्घाश्च ते विज्ञेया नपुंसकाः। तेऽपि श्रेष्ठः पुरुषाः श्रेष्ठा रसबन्धनकारिणः। स्त्रियः कुर्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः। नपुंसका स्त्वंवीर्य्याः सुरकामाःसत्त्ववर्जिताः। स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीवे क्लीवं प्रयोजयेत्। सर्वेभ्यः सर्वदा देयाः पुरुषवीर्य्यवर्द्धना इति। अथाशुद्धवज्रस्य दोषमाह पार्श्वपीड़ेतिरोगानिकं रोगसमूहं। अशोधितवज्रस्य दोषपरिहरणाय शोधनमाहव्याघ्रीकन्देति। व्याघ्री-

---

* कोद्रव क्काथोद्भन स्यातम्।

व्याघ्रीकन्दगतं वज्रं दोलायन्त्रे विपाचयेत्।
अहोरात्रात् समुद्धृत्य हयमूत्रेण सेचयेत्॥
वज्रीक्षीरेण वा सिञ्चेत् कुलिशं विमलं भवेत्।
इति शोधनम्॥ ५२॥

त्रिवर्षारूढ़कार्पासमूलमादाय पेषयेत्।
त्रिवर्षनागवल्ल्यास्तु निजद्रावैः प्रपेषयेत्॥
तद्गोलके क्षिपेद्वज्रं रुद्ध्वा गजपुटे पचेत्।
एवं सप्तपुटेनैव म्रियते कुलिशं ध्रुवम्॥
मतान्तरम्॥ ५३॥

कांस्यपात्रे तु भेकस्य मूत्रे वज्रन्तु निःक्षिपेत्।
त्रिःसप्तकृत्वः सन्तप्तं वज्रमेवं मृतं भवेत्॥
अथान्यः।
त्रिःसप्तकृत्वः सन्तप्तं खरमूत्रेण सेचयेत्।
मत्कुणैस्तालकं पिष्ट्वा तद्गोले कुलिशं क्षिपेत्॥
प्रध्मातं वाजिमूत्रेण सिक्तं पूर्वक्रमेण तु।
भस्मीभवति तद्वज्रं वज्रवत् कुरुते तनुम्॥ ५४॥

कण्टकारिका तस्यामूलपिण्डान्तर्गतं वज्रं कोद्रवक्वाथैः कौलत्थैर्वा क्वाथैर्दोलायन्त्रे सप्ताहं पचेदित्यर्थः। ५१।

मतान्तरमाह व्याघ्रीकन्देति प्रागुक्तप्रकारेण पाचितं वज्रं अश्वमूत्रेण वज्रीक्षीरेण वा सिञ्चेदिति भावः॥ ५२॥

वज्रमारणविधिमाह त्रिवर्षेत्यादि। त्रिवर्षारोपितस्य कार्पासस्य मूलमादाय त्रिवर्षारूढ़नामवल्लीरसैः पेषयेत् तत्पिण्डान्तर्निहितं सुशुद्धं वज्रं गजपुटे सप्तधा पचेदित्यर्थः॥ ५३॥

मतान्तरमाह कांस्येत्यादि स्पष्टम्। अन्यं मतमाह त्रिःसप्तकृत्व इत्यादि—त्रिःसप्तेत्येकविंशतिवारं सन्तप्तं वज्रं गर्द्दभमूत्रेण सेच-

आयुष्यं सौख्यजननं बलरूपप्रदन्तथा।
रोगघ्नं मृत्युहरणं वज्रभस्म भवत्यलम्

इति मारणम् ॥ ५५॥

——

वैक्रान्तं वज्रवच्छोध्यं ध्मातं तद्धयमूत्रके।
हिमं तद्भस्मसंयोज्यं वज्रस्थाने विचक्षणैः।

मतान्तरम् ॥

वैक्रान्तं वज्रवच्छोध्यं मारणञ्चैव तस्य तत्।
हयमूत्रेण तत् सेच्यं तप्तं तप्तं त्रिसप्तधा ॥
ततश्चोत्तरवारुण्याः पञ्चाङ्गे गोलके क्षिपेत्।
रुद्ध्वा मूषापुटे पाच्यं उद्धृत्य गोलके पुनः ॥
क्षिप्त्वा रुद्ध्वा पचेदेवं यावत् तत् भस्मतां व्रजेत् ॥
भस्मीभूतञ्च वैक्रान्तं वज्रस्थाने नियोजयेत्।

इति वैक्रान्तशोधनमारणम् ॥ ५६ ॥

येत् ततः प्रक्षाल्य हरितालपिण्डान्तर्निहितं कृत्वादहेत् प्रतप्ते च पिण्डे वाजिमूत्रेण सेचयेत् एवमेकविंशतिवारं कुर्य्यात् ॥ ५४ ॥

मृतवज्रस्य गुणमाह आयुष्यमित्यादि आयुष्य मायुष्करम् ॥ ५५॥

वैक्रान्तशोधनमारणादिकमाह वैक्रान्तमित्यादि—वैक्रान्तं दग्ध-हीरकं वैक्रान्तं वज्रवत् शोधनीयं मारणीयञ्च मतान्तरे तु एक-विंशतिवारं ध्मातं तत् हयमूत्रेण सेचयेत् तत उत्तरवारुण्या-मूलपत्रफलपुष्पवल्कलरूपं पञ्चाङ्गं निष्पिष्य तन्मध्ये तत्संशुद्धं वैक्रान्तं निधाय मूषापुटे पचेत्। एवं वारम्बारं कुर्य्यात् यावत् भस्मतां याति ॥ ५६ ॥

अभ्रकं गिरिजाबीजममलं गगनाह्वयम्।
तत्र कृष्णाभ्रके वज्रं पीतात्मनि तु ग्राहिकम्॥
सितात्मके तारकं स्याद्गौरकं रक्तकं वरम्।
सुप्रशस्तं कठोराङ्गं गुरुकज्जलसन्निभम्॥
यत्र शब्दायते बह्नौ नैवोच्छूनं भवेदपि।
सदाकरसमुद्भूतं वज्रेति प्रथितं घनम्॥
पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्विधम्।
ध्मातमभ्रं दलचयं पिनाकं विसृजत्यलम्।
फुत्कारं भुजगः कुर्य्यात् दर्दुरं भेकशब्दवत्।
चतुर्थञ्च वरं ज्ञेयं न वह्नौ विकृतिं व्रजेत्॥
कुष्ठप्रदं पिनाकं स्याद्दर्दुरं मरणप्रदम्॥
नागं देहगतं नित्यं व्याधिं कुर्य्याद्भगन्दरम्॥
रसे रसायने चैव योज्यं वज्राभ्रकं प्रिये!!।
तस्माद्वज्राभ्रकं ग्राह्यं व्याधिवार्द्धक्य मृत्युजित्॥
अशुद्धाभ्रं निहन्त्यायुर्वर्द्धयेन्मारुतं कफम्।
आहत्याच्छादयेद्गात्रं मन्दाग्निक्रिमिवर्द्धनम्॥५७॥

अथाभ्रकशोधनमारणादिकमाह तत्रेति। तेषां मध्ये वज्राभ्रलक्षणमाह सुप्रशस्तेति नैवोच्छूनं भवेदिति बह्नौ क्षिप्तं सत्स्फीततां न याति अन्ये तु नैवोच्छूनं भवेदित्यत्र नैवस्थूलं भवेदिति पठन्ति। तन्मते पीतादीनि त्रीणि स्थूलकराणि वज्राभ्रन्तु न स्थूलकरमिति। यद्यप्यत्र महागुणत्वात् दृढव्यवहारात् सर्वरोगहन्तृत्वाच्च वज्राभ्रगुणमत्रोक्तं तथापि चेतरासां ग्राहिकादीनां गुणदोषं व्यवहार लौकार्य्यार्थं तन्त्रान्तरेऽनुसर्त्तव्यम्। यथा—विप्रक्षत्रियविट्शूद्रभेदात्तत्स्याच्चतुर्विधं

पादांशं शालिसंयुक्तमभ्रकं कम्बलोदरे।
त्रिरात्रं स्थापयेन्नीरे तत् क्लिन्नं मर्दयेद्दृढम्॥
कम्बलाद्गलितं श्लक्ष्णं वालुकारहितञ्च यत्।
तद्धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये॥ ५८॥

मतान्तरम्

त्रिफलाक्काथ गोमूत्र क्षीर काञ्जिक सेचितम्।
भस्त्राग्नौ सप्तधा व्योमतप्तं तप्तं विशुध्यति॥
अथवा वदरीक्काथे ध्मातमभ्रं विनिःक्षिपेत्।
मर्दितं पाणिना शुष्कं धान्याभ्रादतिरिच्यते॥ ५९॥

मतान्तरम्॥

क्रमेणैव सितं रक्तं पीतं कृष्णञ्च वर्णतः प्रशस्यते सितं तारे रक्तं तत्तु रसायने। पीतं हेमनि कृष्णन्तु गदेषु भूतये पिवेति। तच्च वज्राभ्रं चतुर्विधं पिनाकदर्दुरनागवज्रभेदात्। यद्यपि वज्रमिति सामान्येनैव पूर्वमुक्तं तथापि तदेकदेशं तत्तु न विशेषतो दोषावहमिति। यथा भारतशब्देन सप्तभूभागोक्तेऽपि तदन्तर्गतवर्षमात्रोऽप्युपलभ्यते। पिनाकादीनां लक्षणमाह ध्मातमित्यादि फुत्कारं भुजग इति नागन्तु वह्नौ नागवत् फुत्कारं परित्यजति पिनाकादीनां साधरणगुणदोषमाह कुष्ठप्रदमित्यादि अशुद्धाभ्रस्य दोषमाह—अशुद्धाभ्रेति स्पष्टम्॥ ५७॥

अभ्रस्य शोधनार्थं धान्याभ्रमाह पादांशेति। वालुकारहितमभ्रं शालिधान्येन सह कम्बले वद्ध्वा त्रिदिनं नीरे स्थापनीयं ततस्तत् क्लिन्नमभ्रं मर्द्दयेत् यत्तु कम्बलात् गलति तद्धान्याभ्रकमिति॥ ५८॥

मतान्तरशोधनमाह त्रिफलेति। व्योम इत्यभ्रम् अन्यमतमाह अथवेति। ध्मातमभ्रं वदरीक्काथे निःक्षिपेत् तत्र ध्मातमसंक्लेगात् संशोष्य पाणिना मर्द्दयेत् स्थापयेच्चेत्यर्थः॥ ५९॥

अगस्त्यपुष्पतोयेन पिष्टं शूरणकन्दगम् ।
गोष्ठभूमिगतं मासं जायते रससन्निभम् ॥

इत्यभ्रशोधनम् ॥ ६०

वज्राभ्रकं समादाय निःक्षिप्य स्थालिकोदरे ।
रम्भादिक्षारतोयेन पचेद्गोमयवह्निना ॥
यावत्सिन्दूरसंकाशं न भवेत् स्थालिकावहिः ।
सेचनीयं ततः क्षीरैस्ततः सूक्ष्मं विचूर्णयेत् ।

मतान्तरम् ॥

धान्याभ्रकं समादाय मुस्तक्वाथैः पुटत्रयम् ।
तद्वत् पुनर्नवानीरैः कासमर्द्दरसैस्तथा ॥
नागवल्लीरसैः सूर्य्यक्षीरैर्देयं पृथक् पृथक् ।
दिनं दिनं मर्द्दयित्वा क्वाथैर्वटजटोद्भवैः ॥
दत्वा पुटत्रयं पश्चात् त्रिःपुटेन्मुषलीजलैः ।
त्रिःगोक्षुरकषायेण त्रिःपुटेद्वानरीरसैः ।
मोचकन्दरसैः पाच्यं निरात्रं कोकिलाक्षजैः ।
रसैः पुटेल्लोध्रकैस्तु क्षीरादेकं पुटं पुनः ।
दध्ना घृतेन मधुना खण्डया सितया तथा ।
एकैकं पुटं दद्यादभ्रस्यैवं मृतिर्भवेत् ।
सर्वरोगहरं व्योम जायते योगवाहिकम् ।

मतान्तरमाह अगस्त्यपुष्पेति अगस्त्यपुष्पं वकपुष्पं तस्य रसेन पि-ष्टमभ्रकं तत्शूरणकन्दमध्ये निरुध्य गोष्ठभूमितले मासं स्थापयेदिति भावः ॥ ६० ॥

कामिनीमददर्पघ्नं शस्तं पुंस्त्वोपघातिनाम्।
वृष्यमायुष्करं शुक्रवृद्धिसन्तानकारकम्॥ ६१॥

अथ मारकगणः।—

तण्डुलीयक-वृहती-नागवल्ली-पिण्डतगर-पुनर्नवाहिल-
मोचिका-मण्डूकपर्णी।
तिक्ताखुपर्णिका मदनार्कविपिप्पलसुत-
मातृकाभिः॥ ६२॥

मतान्तरम्।

रम्भादिनाभ्रं लवणेन पिष्ट्वा
चक्रीकृतं तद्दलमध्यवर्त्ति।
दग्धेन्धनेषु व्यजनानिलेन
स्नुह्यर्कमूलाम्बुपुटेन सिद्धम्। ६३।

मतान्तरम्॥
धान्याभ्रकस्य भागैकं भागौ द्वौ टङ्कणस्य च।
पिष्ट्वा तदन्धमूषायां रुद्ध्वा तीव्राग्निना पचेत्॥

अभ्रमारणमाह वज्राभ्रकमित्यादि रम्भादिक्षारतोयेनेति वक्ष्यमाण-
रम्भादिगणोक्तक्षारतोयेन मतान्तरमाह धान्याभ्रकमित्यादि स्पष्टम्।६१॥

अथ मारकगणमाह तण्डुलीयकेत्यादि। एभिस्तण्डुलीयकैर्द्रवैस्तैः
समस्तैर्वा प्रपुटेदित्यर्थः॥ ६२॥

मतान्तरमाह रम्भादीत्यादि—रम्भादिना वक्ष्यमाणरम्भादि-
गणेन। व्यजनानिलेनेति।—व्यजनानिलेन प्रज्वलितेषु दग्धेन्धनेष्वि-
त्यर्थः॥ ६३॥

स्वभावशीतलं चूर्णं सर्वयोगेषु योजयेत्।

मतान्तरम्।

धान्याभ्रकं दृढं मर्द्यमर्कक्षीरैर्दिनावधि।
वेष्टयेदर्कपत्रेण चक्राकारन्तु कारयेत्॥
कुञ्जराख्ये पुटे दग्ध्वा सप्तवारान् पुनःपुनः।
ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयम्।
म्रियते नात्र सन्देहः सर्वयोगेषु योजयेत्॥ ६४॥

मतान्तरम्।

दुग्धत्रयं कुमार्य्यम्बु गङ्गापत्रं त्वमूलकम्।
वटशुङ्गमजारक्तमेभिरभ्रं विमर्द्दयेत्॥
शतधापुटितं भस्म जायते पद्मरागवत्।
निश्चन्द्रकं भवेद्व्योम शुद्धदेहे रसायनम्।
निश्चन्द्रमारितं व्योम रूपवीर्य्यं दृढं तनुम्।
कुरुते नाशयेन्मृत्युं जरारोगकदम्बकम्।

इत्यभ्रमारणम्॥ ६५॥

हरितालं तालमालं मालं शैलूषभूषणम्।
पिञ्जकं रोमहरणं तालकं पातमित्यपि॥

धान्याभ्रकमित्यादौ कुञ्जराख्यपुट इति—गजपुटे॥ ६४॥

मारिताभ्रस्य गुणमाह निश्चन्द्रेति—यद्यपि निश्चन्द्रमारणमभ्रस्य सामान्येनैव पूर्वमुक्तं तथाप्यत्र निश्चन्द्रमिति विशेषणेन निश्चन्द्रकत्वं तस्य विशेषमारणलक्षणमवगन्तव्यम्। रोगकदम्बकमिति रोगसमूहम्। सर्वरोगहरमिति॥ ६५॥

तालकं पटलं पिण्डं द्विधा तत्राद्यमुत्तमम्॥ ६६॥
अशुद्धतालमायुघ्नं कफमारुतमेहकृत्।
तापस्फोटाङ्गसंकोचान् कुरुते तेन शोधयेत्॥ ६७॥
शुद्धं स्यात्तालकं स्विन्नं कुष्माण्डसलिले ततः।
चूर्णोदके पृथक् तैले तस्मिन् पूते न दोषकृत्॥
अन्यच्च॥
तालकं कणशः कृत्वा दशांशेन च टङ्कणम्।
जम्बीरोत्थैर्द्रवैः चाल्यं काञ्जिकैः चालयेत्पुनः॥
वस्त्रे चतुर्गुणे बद्ध्वा दोलायन्त्रे दिनं पचेत्।
सचूर्णं आरनालेन दिनं कुष्माण्डजे रसैः।
स्वेद्यं वा शाल्मलीतोयैस्तालकं शुद्धिमाप्नुयात्॥
तालकं पोट्टलीं बध्वा सचूर्णे काञ्जिके पचेत्।
दोलायन्त्रे यामैकं ततः कुष्माण्डजे रसे।
तिलतैले पचेद्यामं यामन्तत् त्रैफले जले॥
दोलायन्त्रे चतुर्यामं पाच्यं शुध्यति तालकम्॥
इति शोधनम्॥ ६८।

हरितालपर्य्यायशोधनमारणादिकमाह हरितालमित्यादि। तालकं हि द्विविधं पत्राख्यं पिण्डञ्च तयोराद्यं स्वर्णवर्णं गुरुस्निग्धं अभ्रपत्रवत् सपत्रं सुगाढं रसायनञ्च। पिण्डञ्च—निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं गुरु स्त्रीपुष्पहारकं स्वल्पगुणञ्च। ताभ्यां पत्राख्यं ग्राह्यं भिषग्भिः यदत्र मारणजारणाद्यर्थं प्रयोक्तव्यं तदपि पत्राख्यञ्चेति। पटलमिति पत्राख्यम्। वंशपत्रेति लोके॥ ६६॥

अशुद्धतालकस्य दोषमाह अशुद्धमित्यादि आयुघ्नमिति मृत्युप्रदम्॥ ६७॥

तालकं कणशः कृत्वा सुशुद्धं हण्डिकान्तरे ।
चूर्णोदकेन संपिष्टमपामार्गजटोद्भवैः ॥
क्षारोदकैश्च संपिष्टमूर्द्धाधो यावशूकजम् ।
चूर्णं दत्वा निरुध्याथ कुष्माण्डैश्च प्रपूरयेत् ॥
पुनर्मुखं निरुध्याथ चतुर्यामं क्रमाग्निना ।
पचेदेवं हि तच्चूर्णं कुष्ठादौ परियोजयेत् ॥
हरितालं कटु स्निग्धं कषायञ्च विसर्पनुत् ।
तालकं हरते रोगान् कुष्ठमृत्युजरादिकान् ॥
संशुद्धं कान्तिवीर्य्यौजः कुरुते मृत्युनाशनम् ॥ ६८ ॥
अम्लरोलीजलैर्भाव्यं तालं द्वादशयामकम् ।
~~तथैव निम्बुनीरेण तच्चूर्णोदकेन च ॥~~
प्रक्षाल्य शाल्मलीक्षारैर्द्विगुणैःखातमध्यगम् ।
विधाय कवचीयन्त्रं वालुकाभिः प्रपूरयेत् ॥
द्वादशप्रहरं पक्का स्वाङ्गशीतञ्च चूर्णयेत् ।
खादेद्रक्तिकामेकां कुष्ठस्योपदशान्तये ॥

इति हरितालमारणम् ॥ ७० ॥

शुद्धमित्यादि कुष्माण्डसलिले स्विन्नं शुद्धतालं चूर्णोदके तिलतैले पृथक्क्रमेण यामैकं दोलायां पचेदित्यर्थः । तालकमित्यादि तालकं क्षुद्रितं कृत्वा वस्त्रतो बद्ध्वा शम्बुकशुक्तिगोभस्मकृतचूर्णसञ्चितकाञ्जिके दोलायां यामैकं पचेत् । ततः कुष्माण्डादिरसैः प्रत्येकशो यामैकैकं पचेदिति ॥ ६८ ॥

अथ हरितालमारणमाह तालकमित्यादि ।—तच्चूर्णमिति अन्तःशरावोर्द्धलग्नं यत् कुन्दप्रकाशं भस्म तदिति । एवम्बिध मृतहरितालस्य गुणमाह हरितालमित्यादि स्पष्टम् ॥ ६९ ॥

तालकं वंशपत्राख्यं कुष्माण्डसलिले क्षिपेत्।
सप्तधा वा त्रिधा वापि दध्ना चाम्लेन वा पुनः॥
शोषयित्वा पुनः शुष्कं चूर्णयेत् तण्डुलाकृति।
ततः शरावके पात्रे स्थापयेत् कुशलो भिषक्॥
वदरीपल्लवोत्थेन कल्केन लेपयेद्भिषक्।
अरुणाभमधः पात्रं तावज्ज्वाला प्रदीयते॥
स्वाङ्गशीतं समुद्धृत्य माणिक्याभं भवेद्ध्रुवम्।
तद्रक्तिद्वितयं खादेद् घृतक्षामरमर्द्दितम्॥
संपूज्य देवदेवेशं कुष्ठरोगाद्विमुच्यते।
स्फुटितं गलितं यच्च वातरक्तं भगन्दरम्॥
नाड़ीव्रणं व्रणं दुष्टमुपदंशं विचर्च्चिकाम्।
नासास्य सम्भवान्रोगान् क्षतान् हन्ति सुदारुणान्॥
पुण्डरीकञ्च चर्म्माख्यं विस्फोटं मण्डलन्तथा॥

इति रसमाणिक्यम्॥ ७१॥

मतान्तरमाह अम्लरोलीति। अम्लरोली चाङ्गेरी अम्लरोली-रसैर्निम्बुनीरैस्तथा चूर्णोदकैः प्रत्येकशो द्वादशयामकं भावयेत् ततः प्रक्षाल्य द्विगुणैः शाल्मलीक्षारैः सह कवचीयन्त्रं विधाय द्वादशप्रहरं पचेत् शीते च रक्तिकामेकां कुष्ठोपदादौ प्रयोजयेदिति॥ ७०॥

रसमाणिक्यमाह—तालकमित्यादि कुष्माण्डसलिले क्षिपेदिति कुष्माण्डरसे सप्तधा त्रिधा वा शोधितं हरितालं भावयेत् एवं दध्ना-म्लेनेति ततः शरावके पात्रे रुद्ध्वा वदरीपत्रकल्केन सन्धिं लेपयेत् ततः हण्डिकामध्ये संस्थाप्य वालुकाभिः प्रपूरयेत् ततः पात्राधो-ऽग्निज्वाला तावत् देया यावत् पात्राधोऽरुणाभं भवतीति सुशीते च माणिक्याभं भस्म यदुपलभ्यते तत् समुद्धृत्य कुष्ठादौ देयमिति॥ ७१॥

मनःशिला च नैपाली शिलाह्वानागजिह्विका॥
मनोह्वा कुनटी गोला करञ्जी करवीरिका॥
मनोह्वाल्वोड्रपुष्पाभा शस्यते सर्व्वकर्म्मसु॥ ७२॥
मनःशिला मन्दवलञ्च नूनम्।
करोति जन्तोः शुभपाकहीना।
मलन्तु बद्धं कुरुते च नूनं सशर्करं कृच्छ्रगदं
करोति॥ ७३॥

मतान्तरम्।

अश्मरी मूत्रकृद्रोगमशुद्धा कुरुते शिला।
मन्दाग्निं मलदृष्टिञ्च शुद्धा सर्वरुजापहा॥ ७४॥
जयन्ती भृङ्गराजोत्थे रक्तागस्त्यरसैः शिला।
दोलायन्त्रे दिनं पाच्या यामं छागस्य मूत्रके॥
क्षालयेदारनालेन सर्वरोगेषु योजयेत्॥ ७५॥

मतान्तरम्।

मातुलुङ्गरसैः पिष्टा जयानीरैर्मनःशिला।

मनःशिलायाः साभिधानशोधनादिकमाह मनःशिलेत्यादि मनःशिलापि हरितालभेदा तालकं पीतं मनःशिलारक्तेति॥ ७२॥

अथाशुद्धमनःशिलाया दोषमाह नमःशिलेति। मन्दबलमिति बलह्रासं करोतीत्यर्थः। पाकहीनेति मन्दाग्निकरी॥ ७३॥

मतान्तरमाह अश्मरीत्यादि।—शिला मनःशिला। मूत्रं मूत्रकृच्छ्रं उक्तञ्च सशर्करं कृच्छ्रगदं करोतीति॥ ७४॥

शोधनमाह जयन्तीत्यादीनामन्यतमरसेन दिनं दोलायन्त्रे पक्का काञ्जिकेन क्षालयेत्। अथवा छागमूत्रेण यामं पक्का काञ्जिकेन क्षालयेदिति॥ ७५॥

शृङ्गवेररसैर्वापि विशुध्यति मनःशिला ॥ ७६ ॥
कटुःस्निग्धा शिला तिक्ता कफघ्नी लेखनी सरा।
भूतावेशभयं हन्ति कासश्वासहरा शुभा॥
* इतिमनःशिलाशुद्धिः ॥ ७७ ॥
पुष्पाणां रक्तपीतानां रसैः पिष्ट्वा च भावयेत्।
नरमूत्रैश्च गोमूत्रैर्यवाम्लैश्च ससैन्धवैः॥
सप्ताहं त्रिदिनं वापि पश्चात् शुध्यति खर्परः॥ †
मतान्तरम्॥
खर्परः परिसन्तप्तः सप्तवारान् निमज्जितः।
निम्बुवीजरसे चान्तर्निर्म्मलत्वमवाप्नुयात्॥ ७८ ॥

मतान्तरमाह मातुलुङ्गेत्यादि।—मातुलुङ्गरसैः पिष्ट्वा जयन्ति-कारसैरार्द्रकरसैर्वा पूर्व्वोक्तविधानेन दोलायन्त्रे दिनं पचेदिति भावः॥७६॥
एवं शोधितमनःशिलाया गुणमाह कटुःस्निग्धेत्यादि शीला मनः-शीला ॥ ७७ ॥
अथ खर्परशोधनप्रकारमादिकमाह पुष्पाणामित्यादि।—यवाम्लै-रिति यवकाञ्जिकैः। खर्परः रसक इति ख्यातः ॥ ७८ ॥

---

* चोभ्रपुष्पाभा जवापुष्पसंकाशा।
† खर्परं लौहपात्रस्थं चुल्ल्यां दत्वा विपाचयेत्। गलिते सैन्धवं चूर्णं दत्त्वा दत्त्वा विमर्द्दयेत्। भूयः पलाशदण्डेन यावत् भस्मीभवेत् ननु इति पाठान्तरम्। भूकदम्बरसमपि लवणेन सह दद्यादित्युपदेशः।
‡ अगस्त्यपत्रतोयेन भाविता सप्तवासरं शृङ्गवेररसैर्व्वापि विशु-ध्यति मनःशीला इति पाठान्तरम्।
अगस्त्यपत्रतोयेन वकपत्रस्वरसेन।
¶ शृङ्गवेररसैः आर्द्रकरसैः।

अथ मारणम् ॥

खर्परं पारदेनैव वालुकायन्त्रगं पचेत् ।

चूर्णयित्वा दिनं यावत् शोभनं भस्म जायते ॥ ७९ ॥ *

नेत्ररोगहरः क्लेदी चयहा खर्परो गुरुः ।

इति खर्परशोधनमारणञ्च ॥ ८० ॥

तुत्थके तु शिखिग्रीवं हेमसारं मयूरकम् ।

विष्ठया मर्द्दयेत् तुत्थं मार्ज्जारककपोतयोः ॥

दशांशं टङ्कणं दत्वा पाच्यं मृदुपुटे ततः ।

पुटं दद्यात् पटुचौद्रैः किल तुत्थविशुद्धये ॥ ८१ ॥

अथ मारणमाह खर्परमित्यादि ।—खर्परं चूर्णयित्वा समांसेन पारदेनसह वालुकायन्त्रे दिनैकं पचेत् तेन भस्मोपजायत इति ॥ ७९ ॥

एवं मृतखर्परस्य गुणमाह नेत्ररोगहर इत्यादि ॥ ८० ॥

तुत्थकस्य सपर्य्यायशोधनमारणादिकमाह तुत्थक इत्यादि । तुत्थञ्च ताम्रोपधातु यथा तुत्थं ताम्रोपधातु हि किञ्चित् ताम्रेण तद्भवेत् । किञ्चित् ताम्रगुणं तस्मात्तद्वच्यमाणं गुणञ्च तदिति । मार्ज्जारकपोतयोर्विष्ठया समं तुत्थं तया तुत्थात् दशांशं टङ्कणञ्च दत्वा मर्द्दयेत् मृदुपुटे पचेच्च । ततः पादांशं सैन्धवं किञ्चिच्च चौद्रं दत्वा पुनः प्रपुटेदिति ॥ ८१ ॥

---

* खर्परं पत्तले कृत्वा लवणान्तर्गतं पचेत् जायते शोभनं भस्म सर्व्वव्याधिहरं परम् । पाठान्तरम् ।

[पत्तले कृत्वा स्थाल्यां कृत्वा इत्यर्थः]

अन्यच ॥

स्रोतोविष्ठा समं तुत्थं सचौद्रं टङ्कणाङ्घ्रियुक्।

त्रिधा सुपुटितं शुद्धं वान्तिभ्रान्तिविवर्जितम् ॥ ८२

अन्यच ॥

गन्धकेन समं तुत्थं तुत्थार्द्धेनार्द्धयामकम् ॥

वान्तिभ्रान्तौ यदा नस्त स्तदा सिद्धिं विनिर्दिशेत्।

तुत्थं सकटुकक्षारं कषायं विशदं लघु।

लेखनं भेदिचक्षुष्यं कण्डुक्रिमिविषापहम् ॥ ८३ ॥

इति तुत्थकशुद्धिः ॥

मूत्रारनालतैलेषु गोदुग्धे कदलीरसे।

कौलत्थे कोद्रवक्काथे माक्षिकं विमलन्तथा ॥

मुहुःशूरणकन्दस्थं स्वेदयेद्दरवर्णिनि ! ।

क्षाराम्ललवणैश्चैव तैलसर्पिःसमन्वितम् ॥

मतान्तरमाह स्रोतोर्विष्ठेति स्रोतविडालः तस्य विष्ठा पुरीषम्। अङ्घ्रिः पादः ॥ ८२ ॥

मतान्तरमाह गन्धकेनेति समभिति सहार्थे तेन तुत्थार्द्धेन गन्धकेन सह तुत्थमित्यर्थः। अर्द्धयामकमित्यत्र पुटेदिति शेषः। पुटनञ्च तावदेव कर्त्तव्यं यावत् वान्त्यादिरहितं स्यादिति। एवं सिद्धस्य तुत्थस्य गुणमाह तुत्थमित्यादि ॥ ८३ ॥

पुटत्रयं प्रदातव्यं ततस्तु शोधितं भवेत् ।
जम्बीरस्य रसे स्विन्नो मेषशृङ्गीरसैस्तथा ।
रम्भातोयेन वा पाच्यं घस्रं विमलशुद्धये ॥

इतिविमलशुद्धिः ॥ ८४ ।

माक्षिकं धातुमाक्षिकं तत्रस्तापिससुद्भवम् ।
गरुड़ो माक्षिकः पक्षी हेमवर्णे इति स्मृतः ॥
भङ्गे सुवर्णसंकाशो मनाक् कृष्णच्छविर्बहिः ।
हेमवर्णे इति ख्यातो माक्षिकः श्रेष्ठ उच्यते ॥ ८५
मन्दाग्निं बलहानिञ्च व्रणं विष्टम्भगात्ररुक् ।
कुरुते माक्षिको मृत्युमशुद्धो नात्रसंशयः ॥ ८६ ।
स्वर्णमाक्षिकचूर्णन्तु वस्त्रे बद्ध्वा विपाचयेत् ।

अथ विमलशुद्धिमाह मूलेत्यादि ।—शूरणकन्दस्य विमल मूला दीनां व्यस्तसमस्तैर्वा यामैकैकं दोलायन्त्रे स्वेदयेत् ततः क्षारादिभिः पुटत्रयं दातव्यम् । अथवा जम्बीरादीनां स्वरसैर्दिनैकं स्वेदयेदिति ॥८४॥

सनामलक्षणमाक्षिकशोधनादिकमाह माक्षिक इत्यादि ।—माक्षिकं हि द्विविधं स्वर्णमाक्षिकं रौप्य माक्षिकञ्च उक्तं हि माक्षिकं द्विविधं प्रोक्तं हेमाह्वं तारमाक्षिकम् । भिन्नवर्णविशेषत्वात् सरवीर्य्यादिकं पृथक् । तारमाक्षिकं विमलमिति ख्यातञ्चापि वाच्यम् । इदानीं स्वर्णमाक्षिकलक्षणादिकमाह भङ्ग इत्यादि ॥ ८५ ॥

अशुद्धस्य माक्षिकस्य दोषमाह मन्दाग्निमित्यादि स्पष्टम् ॥८६॥

कालमारिषशालिञ्चक्काथे दोला विधानतः ।
तदधः पतितं शस्तमेवं शुध्यति माक्षिकम् ॥ ८७ ॥*

मतान्तरम् ।

माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च ।
मातुलुङ्गद्रवैर्वाथ जम्बीरोत्थद्रवैः पचेत् ॥
लौहपात्रे पचेत्तावत् लौहदर्व्या च चालयेत् ।
भासवर्णमयो यावत् तावच्छुध्यति माक्षिकम् ॥ †

मतान्तरम् ।

माक्षिकस्य चतुर्थांशं गन्धं दत्वा विमर्दयेत् ।
उरुवुकस्य तैलेन ततः कुर्य्याच्च चक्रिकाम् ॥
शरावसंपुटे कृत्वा पुटेद्गजपुटेन तु ।
सिन्दुराभं भवेद्भस्म माक्षिकस्य न संशयः ॥ ८८ ।

स्वर्णमाक्षिकस्यदोषपरिहरणायशोधनमाह स्वर्णमाक्षिकेत्यादि स्वर्णमाक्षिकचूर्णं सूक्ष्मवस्त्रे वद्धा कालमारिष स्वरसेन शालिञ्चक्काथेन रसेन वा दोलायन्त्रे विपचेत् वस्त्रस्य सूक्ष्मावकाशात् यच्चूर्णमधःपतति तत् प्रशस्तमिति ॥ ८७ ॥

मतान्तरमाह माक्षिकस्येत्यादि माक्षिकस्य स्वर्णमाक्षिकस्य । चतुर्थांशं चतुर्थभागम् । उरुवुकस्य एरण्डस्य ॥ ८८ ॥

---

* कालमरिष चुकुखड्टा इति ख्यातः ।
शालिञ्च शांचिशाक इति ख्यातः ॥

† माक्षिकं चूर्णयित्वा जम्बीररसेन मेलयेत् ततः भासवर्णमयं ज्वालनेन यावन्न भवेत् तावत् लौहपात्रे लौहदर्व्या चालयेत् इत्युपदेशः ।

माक्षिकं तिक्तमधुरं मेहार्शःक्रिमिकुष्ठनुत् ।
कफपित्तहरं बल्यं योगवाहिरसायनम् ॥ ८९ ॥

इति माक्षिशुद्धिः ।

——

काशीशं धातुकाशीशं खेचरं दन्तरञ्जनम् ।
सकृद्भृङ्गाम्बुना स्विन्नं काशीशं निर्म्मलं भवेत् ।*
काशीशं निर्म्मलं स्निग्धं चित्तनेत्ररुजापहम् ।
पित्तापस्मारशमनं रसवद्गुणकारम् ॥ ९० ॥

इति काशीशशुद्धिः ॥

——

राजपट्टं महापट्टं शिखिग्रीवं विराटकम् ॥
इति कान्तपाषाणपर्य्याय कथनम् ॥
चूर्णितं कान्तपाषाणं महिषीक्षीरसंयुतम् ।

शुद्धमाक्षिकस्य गुणमाह माक्षिकमित्यादि ।—स्वर्णमाक्षिकञ्च स्वर्णोपधातुस्वर्णानुकल्पं किञ्चिद्धीनगुणं तत इति । उक्तं हि उप-धातु सुवर्णस्य किञ्चित् स्वर्णगुणान्वितम् । तथाच काञ्चनाभावे दीयते स्वर्णमाक्षिकम् । किन्तु तस्यानुकल्पत्वात् किञ्चिद्धीनगुणास्तत इति॥८९॥

काशीशस्य सपर्य्यायकशोधनादिकमाह काशीश इत्यादि ।-काशीशं हिराकसीतिलोके तद्धिविधं धातुकाशीशं पुष्पकाशीशञ्च धातुकाशीशं हरिद्वर्णं लोहितञ्च पुष्पकाशीशं शुक्लवर्णं कृष्णञ्च॥ ९० ॥

* भृङ्गाम्बुना भृङ्गराजरसेन इत्यर्थः ।

विपचेदायसे पात्रे मोष्ठकेन समन्वितम् ॥
लवणं च तथा क्षारे शोभाञ्जनरसे क्षिपेत् ।
अम्लवर्गस्य तोयेन दिनं घर्मे विभावयेत् ॥
तथैव दोलिका यन्त्रे दिवसं पाचयेत् सुधीः ।
कान्तपाषाणशुद्धौ तु रसकर्म्म समाचरेत् ॥ ८१ ।

इति कान्तपाषाणशुद्धिः ।

——

पीताभा ग्रन्थिला पृष्ठे दीर्घवृत्ता वराटिका ।
सार्द्धनिष्कभवा श्रेष्ठा निष्कभावा च मध्यमा ॥ *
पादोननिष्कभावा च कनिष्ठा परिकीर्त्तिता ।
रसवैद्यविनिर्द्दिष्टा सा वराटकसंज्ञका ॥
वराटी काञ्जिके स्विन्ना यामाच्छुद्धिमवाप्नुयात् ॥
परिणामादिशूलघ्नी क्षयहृद्ग्रहणीहरा ।
कटूष्णा दीपनी वृष्या तिक्ता वातकफापहा ॥ ८२ ।

अथ राजपट्टस्य सपर्य्यायशोधनादिकमाह राजपट्ट इत्यादि ।— राजपट्टं कान्तपाषाणम् । तथैव दोलिकायन्त्र इति दोलायन्त्रे मष्टि-सौवीरादिभिः पचेदिति । दिनं घर्म्मे विभावयेदिति अम्लवर्गद्रवेण रौद्रे दिनैकं भावयेदिति ॥ ८१ ॥

वराटिकाया नामलक्षणशोधनादिकमाह पीताभेति । ग्रन्थिलेति ग्रन्थियुक्ता सार्द्धनिष्कभवा इति सार्द्धनिष्कैक परिमिता । एवं सर्वत्र ।

* निष्कः माषकचतुष्टयपरिमाणमितिवैद्यकपरिभाषा ।

मतान्तरम्।

भूगर्त्तं च समे शुद्धे पत्तलं स्थापयेत्सुधीः।
तुषेण पूरयेत्तस्याः किञ्चिन्मध्यं भिषग्वरः॥
वराटपूरितां मूषां तन्मध्ये विनिवेशयेत्।
करीषाग्निं ततो दद्यात्पानिकायन्त्रमुत्तमम्।
अनेन म्रियते नूनं वराटं सर्वरोगजित्॥ ८३॥

इतिवराटशुद्धिः।

नीलाञ्जनं चूर्णयित्वा जम्बीरद्रवभावितम्।
दिनैकमातपे शुद्धं भवेत् कार्येषु योजयेत्॥ ८४॥

इति रसाञ्जनशुद्धिः।

वराटिकाशोधनमाह्वराटित्यादि। काञ्जिके स्विन्नेति दोलायन्त्रे। एवम्विधशुद्धवराटिकाया गुणमाह परिणामादित्यादि॥ ८१॥

मतान्तरमाह भूगर्त्त इत्यादि॥ ८२॥

नीलाञ्जनमाह नीलाञ्जमित्यादि। नीलाञ्जनमित्युपलक्षणं तेना-ञ्जनपञ्चकं बोध्यम्। यत्राञ्जनानां भेदोनोक्तः। तत् यथा सौवीरमञ्जनं प्रोक्तं रसाञ्जनमतःपरः। स्रोतोञ्जनं तदन्यच्च पुष्पाञ्जनकमेव च। नीलाञ्जनञ्च तेषान्तु स्वरूपमिह कथ्यते। सौवीर मञ्जनं धूम्रं रक्तपित्त-हरंपरम्। विषहिक्काक्षिरोगघ्नंव्रणरोपणशोधनं रसाञ्जनञ्च पीताभं विषरक्तमदापहम्। श्वासहिक्काहरं बल्यं वातपित्तास्रनाश-नम् स्रोतोञ्जनं हिमं स्निग्धं कषायं स्वादुलेखनम्। नेत्रंर हिक्काविष-र्हृदिकफपित्तास्ररोगजित्। पुष्पाञ्जनं सितं स्निग्धं हिमं सर्वाक्षिरोग-

हिङ्गुले हिङ्गुलुर्याति दरदः शुकतुण्डकः।
रसगन्धकसम्भूतो हिङ्गुलो दैत्यरक्तकः॥ ९५

अम्लवर्गद्रवैः पिष्टाद्दरदो माहिषेण च।
दुग्धेन सप्तधापिष्टः शुष्कीभूतो विशुध्यति।

अन्यच्च।

मेषीदुग्धेन दरदमम्लवर्गैर्विभावितम्।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम्॥

अन्यमतम्।

दरदं दोलिकायन्त्रे पक्वं जम्बीरजैर्द्रवैः।
सप्तवारमजामूत्रैर्भावितं शुद्धिमेति हि॥

अथान्यः।

आर्द्रकैर्लकुचद्रावैः सप्तधा भावितो यदि।
हिङ्गुलः शुद्धतां याति निर्दोषो जायते खलु॥ ९६॥

जित्। नीलाञ्जनं गुरुस्निग्धं नेत्रदोषत्रयापहम्। रसायनं सुवर्णघ्नं लौहमारणकारकम्। अञ्जनानि विशुध्यन्ति भृङ्गराजद्रवैर्दिनम्। मनोह्वासदृशं सत्वमञ्जनानां समाहरेदिति ज्ञेयम्॥ ९४॥

सपर्यायहिङ्गुलशोधनादिकमाह हिङ्गुल इत्यादि।— हिङ्गुलं हि त्रिविधं यथा दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः। हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तरः। चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः। जवाकुसुमसंकाशो हंसपादो महोत्तम इति॥ ९५॥

शोधनमाह अम्लवर्गेत्यादि। आर्द्रकैरित्यादौ।—लकुचद्रावैर्डहुकरसैः॥ ९६॥

विम्बाभं हिङ्गुलं दिव्यं रसगन्धकसम्भवम् ।
मेहकुष्ठहरं रुच्यं बल्यं मेधाग्निवर्द्धनम् ॥ ९७ ॥
इति हिङ्गुलशुद्धिः ।

शिलाजतुनि शैलेयमद्रिं गिरिजमश्मजम् ।
धातुजं चाश्मजतुकं शैलजं चाश्मसम्भवम् ॥ ९८ ॥

अथ हिङ्गुललक्षणमाह विम्बाभमित्यादि विम्बाभं पक्वबिम्बीफलाभम् । दिव्यं श्रेष्ठम् । एवं शोधितहिङ्गुलस्य लक्षणमाह मेहकुष्ठेति । रुच्यं रुचिकरम् ॥ ९७ ॥

सपर्य्याय शिलाजतुशोधनमारणादिकमाह शिलाजतुनीत्यादि ।—शिलाजतु च धातुनिस्रवं उक्तं हि हेमाद्याः सूर्य्यसन्तप्ताः स्रवन्ति गिरिधातवः । जत्वाभं मृदुमृत्स्नाभं यन्मलं तच्छिलाजतु । तच्च चतुर्विधं स्वर्णादीनां मलभेदात् । उक्तं हि अनम्लता कषायञ्च कटुपाकि शिलाजतु । नात्युष्णशीतं धातुभ्यश्चतुर्भ्यस्तस्य सम्भवः । हेम्नोऽथ रजतात्ताम्राद्वरं कृष्णायसादपि । तेषां लक्षणं गुणाश्च यथायथमुक्तास्तथापि तन्त्रान्तरेऽनुसर्त्तव्याः । यथा मधुरञ्च सतिक्तञ्च जवापुष्पनिभञ्च यत् विपाके कटुशीतञ्च तत् सुवर्णस्य निःस्रवम् । राजतं कटुकं शीतं श्वेतं स्वादु विपच्यते ताम्रात् बर्हिणकण्ठाभं तीक्ष्णोष्णं पच्यते कटु । यत्तु गुग्गुलुसंकाशं तिक्तकं लवणान्वितम् । विपाके कटुशीतञ्च सर्वश्रेष्ठं तदायसम् । गोमूत्रगन्धः सर्वेषां सर्वं सर्वत्र यौगिकाः । रसायनप्रयोगेषु पश्चिमन्तु विशिष्यते । यथाक्रमं वातपित्ते श्लेष्मपित्ते कफे त्रिषु । विशेषेण प्रशस्ता मता हेमादिधातुजाः । एषां मध्ये चायसः श्रेष्ठत्वात् रसायनत्वात् सर्वरोगोपघातकरत्वाच्च सर्वत्रैवाहृयते । तल्लक्षणं यथा ।—लौहकिट्टायते वह्नौ विधूमं दह्यतेऽम्भसि । तृणाग्रेऽपि क्षतं श्रेष्ठमधो गच्छति तन्तुवत् । यच्च गुग्गुल-

गोदुग्धे त्रिफलाभृङ्गद्रवैः पिष्टं शिलाजतु ।
दिनैकं लौहजे पात्रे शुद्धिमायात्यसंशयः ॥ ९९ ॥
शिलाजतु भवेत्तिक्तं कटुकञ्च रसायनम् ।
क्षयशोथोदरार्शांसि हन्ति वस्तिरुजां जयेत् ॥ १०० ॥

इति शिलाजतुशुद्धिः ॥

संकाशं तिक्तकं लवणान्वितम् । विपाके कटुशीतञ्च सर्वश्रेष्ठं तदाय-
समिति ॥ ९८ ॥

साधारणशुद्धिमाह गोदुग्ध इत्यादि ।

गोदुग्धे तथा त्रिफलाक्काथे तथा भृङ्गराजद्रवैश्च दिनैकमातपसं-
योगात् शिलाजतु शोधयेदित्यर्थः । अत्र यद्यपि सामान्येनैवोक्तं तथापि
हारीतोक्तविधानमत्र विशेषतो ज्ञेयम् । तद्यथा ।—विन्ध्यादौ बहुलं
तत् तु तत्र लौहं यतोऽधिकम् । तच्छोधनकृते व्यर्थमेकैकमवमेलनात् ।
शिलाजतुसमानीय सूक्ष्मं खण्डं विधाय च । निःक्षिप्तमुष्णपानीये
यामैकं स्थापयेत् सुधीः । मर्दयित्वा ततो नीरं गृह्णीयात् वस्त्रगालि-
तम् । स्थापयित्वा च तत्पात्रे धारयेदातपे बुधः । उपरिस्थं घनं
यत् स्यात् तत् क्षिपेदन्यपात्रके । एवं पुनः पुनर्नीतं हिमाशाभ्यां
शिलाजतु । भवेत् कार्य्यक्षमं वह्नौ क्षिप्तं लिङ्गोपमं भवेत् । निर्धु-
मञ्च ततः शुद्धं सर्वकर्मसु योजयेदिति । केचित्तु तत्र प्रथमतस्तस्य बहि-
र्मलमपाकर्त्तुं जलेन प्रक्षालनं कर्त्तव्यं ततस्तदन्तर्गतमृत्तिकासिकतादि
दोषदूरीकरणाय हारीतोक्तशिलाजतुशोधनप्रकरणोक्तक्काथेन भावना देये-
त्याहुः । तदुक्तं शिलाजतु जले धौतं कीटादिदुष्टैर्बहिर्दोषविना-
शाय अगुरुतुवरीनिम्बपत्रयवगुडूचीष्टतैर्धूपयित्वा तदनुशुष्कं चूर्णीकृत्य
लौहपात्रे कृत्वा दशमूलकषायं त्रिफलाक्काथं केवलोष्णोदकं वा
प्रक्षिप्य लौहमूषलिकया तरलीकृत्य प्रचण्डातपे स्थापनीयम् । ततस्तु
सरवद्यदूर्द्धमुत्तिष्ठेत् । तत्पुनर्ष्टे हित्वा काचादिपात्रे स्थापनीयमि-
त्याहुः । विस्तारस्तु अग्निवेशसंहितायां बालके च ज्ञेयः ॥ ९९ ॥

सौवीरं टङ्कणं शङ्खं कङ्कुष्ठं गैरिकन्तथा। *
एते वराटवच्छोध्या भवेयुर्दोषवर्जिताः॥

मतान्तरम्॥

कङ्कुष्ठं गैरिकं शङ्खं कासीशं टङ्कणन्तथा।
नीलाञ्जनं शुक्तिभेदा खुल्लका सवराटका॥ †
जम्बीरवारिणा स्विन्नाः चालिताः कोष्णवारिणा।
शुद्धिमायान्त्यमीयोज्या भिषग्भिर्योगसिद्धये॥ १०१॥
टङ्कणं क्षारमष्टङ्कः सम्यक्क्षारस्य पाचनः।
शुभगोमालतीजाती द्रवोलोहविशुद्धिदः
आदौ टङ्कणमादाय काञ्जिकाल्ले विनिःक्षिपेत्।
एकरात्रात् समुद्धृत्य रौद्रयन्ले विभावयेत्।
नरमूत्रगतं टङ्कं गवां मूत्रगतं तथा।
दिनान्ते तत् समुद्धृत्य जम्बीराम्बुगतं ततः॥
जम्बीराम्लात् समुद्धृत्य नारिकेलस्य पावके।
मरीचचूर्णसंयुक्तं चालयेच्छीतलाम्बुना॥

शोधितशिलाजतुगुणमाह शिलाजतु भवेदित्यादि॥ १००॥

सौवीरादीनां साधारणशोधनमाह सौवीरमित्यादि। तथा पुनः कङ्कुष्ठादीनां साधारणशोधनमाह कङ्कुष्ठमित्यादि जम्बीरवारिणा स्विन्नेति जम्बीररसैर्दोलायन्त्रे स्विन्ना॥ १०१॥

---

* कङ्कुष्ठः हरितालवत् पाषाणविशेषः।
† खुल्लका नाभिशङ्खः।

एवं टङ्कं समादाय सर्वरोगेषु योजयेत्।
टङ्कणोऽग्निकरो रूक्षः कफघ्नो रेचनो लघुः॥ १०२॥

इतिटङ्कणशुद्धिः।

अन्धमूषागतं शङ्खं पलमेकं विचक्षणः।
माषार्द्धटङ्कणैर्मिश्रं दण्डयन्त्रेण मारयेत्॥
शङ्खः सर्वरुजां हन्ति विशेषादुदरामयम्।
शूलाम्लपित्तविष्टम्भमेहच्छर्द्यग्निदीपनः॥ १०३। *

इतिशङ्खशुद्धिः॥

इति रसेन्द्रसारसंग्रहे उपरसशोधनाधिकारः॥

हेमादि लौहकिट्टान्तं शोधनं मारणं शृणु।
तैले तक्रे गवां मूत्रे काञ्जिकेऽथ कुलत्थजे॥
तप्ततप्तानि सिञ्चेत तत्तद्द्रावे च सप्तधा।
एवं स्वर्णादिलौहानि शुद्धिमायान्त्यसंशयः॥ १०४॥†

अथ सपर्य्यायटङ्कणशोधनादिकमाह टङ्कणमित्यादि। आदावि-त्यादौ काञ्जिकाम्ले।अम्लकाञ्जिके। एकरात्रादित्यहोरात्रात्। १०२।

अथ शङ्खशुद्धिमाह अन्धमूषागतमित्यादि। अत्र पचेदिति शेषः। अन्धमूषागतं पक्वं शङ्खं अर्द्धमाषटङ्कणैः सह दण्डयन्त्रेण मारयेदिति। शुद्धशङ्खस्य गुणमाह शङ्ख इत्यादि।—उदरामयं अतिसाररोगम्॥१०३॥

स्वर्णादीनां साधारणशोधनमाह हेमादीत्यादि। स्वर्णादीनां

---

* शङ्खञ्च भावयेत् घर्मे जम्बीराम्लेन सप्तधा। प्रक्षाल्य कोष्णसलिलैः शुद्धिमायाति निश्चितम्। इति पाठान्तरम्।

घर्म्मे रौद्रे।

† काञ्चनं रजतं ताम्रं कांस्यं पित्तलमेव च नागं वङ्गं तथा लौहं धातवोऽष्टौ प्रकीर्त्तिताः।

इति स्वर्णादिनामष्टानां साधारणशोधनं
सौख्यं वीर्यं बलं हन्ति नानारोगं करोति च।
अशुद्धममृतं स्वर्णं तस्मात् शुद्धन्तु मारयेत् ॥ १०५ ॥
मृत्तिकामातुलुङ्गाद्यैर्भावितं पञ्चवासरम्।
मृतभस्मलवणाद्येन शोधयेत् पुटयेत्ततः ॥ १०६ ॥

मतान्तरम्।

पत्राणि तप्ततप्तानि पृथक् तैलादिषु सप्तधा सिञ्चेदिति। सप्तधेति सामान्येनैवोक्तः यत एकादिशतपर्य्यन्तनिषेको विधीयते। प्रत्येकेन सप्तधेति केचित्। मनाक् तप्तलौहपात्राणि द्विगुणे तद्द्रवे क्षिपेदिति तद्द्रवमानम्। तेष्वष्टलौहेषु नागं वङ्गञ्च कथं तप्तं निषेक्तव्यं स्वल्पतापेन गलतः ततश्च स्वल्पभाण्डे कृत्वैव गलिते ते नागवङ्गे तेषु निषेचिते इति। सद्रवं सर्वलौहं दिनमेकं रक्षेत्। रात्रौ च निर्द्रवं नैव रक्षेत् एवं रजनीमेकां विश्राम्य कर्म्मान्तरञ्च समाचरेदिति ॥ १०४ ॥

इदानीं विशेषशुद्धिमाह। तत्रादौ सुवर्णस्य विशेषशोधनादिकं वक्तव्यम्। यद्यप्यत्र मारणयोग्यसुवर्णस्य लक्षणादिकं नोक्तं तथापि तज्ज्ञानार्थं तन्त्रान्तरमनुसर्त्तव्यं यथा दाहेतिरक्तमथयच्च सितं छिदायां काश्मीरकान्ति च विभाति निकाषपट्टे। स्निग्धञ्च गौरवमुपैति च यत् तुलायां जानीत देवकनकं स्फुटरक्तपीतम्। तत्रैकं रसवेधजं तदपरं जातं स्वयं भूमिजम्। किञ्चान्यद्बहुलौहसङ्करभवं चेति त्रिधा काञ्चनम्। तत्राद्यं कनपीतरक्तमपरं रक्तं ततोन्यद्भुयथा गौराभं तदिति क्रमेण गदितं स्यात् पूर्वपूर्वोत्तममिति राजनिर्घण्टः। मृत्युञ्जयतन्त्रे तु दाहे रक्तं सितं छेदे निघर्षे कुङ्कुमप्रभम्। तारशुल्वनिभं स्निग्धं कोमलं गुरुहेमवत्। तच्छ्वेतं कठिनं रूक्षं विवर्णं समलं दलम्। दाहे छेदेऽसितं श्वेतं कषेत्याज्यं लघु स्फुटमिति। अशुद्धामृतस्य च सुवर्णस्य दोषमाह सौख्यमित्यादि ॥ १०५ ॥

वल्मीकमृत्तिकाधूमं गैरिकं चेष्टका पटु ।
इत्येतामृत्तिकाः पञ्चजम्बीरैरारनालकैः ॥
पिष्ट्वा लेप्यं स्वर्णपत्रं पुटेन तु विशुध्यति ॥
धारयेत् स्वर्णपत्रौ च त्रिदिनं पञ्चमृत्तिकाम् ।

इतिस्वर्णशोधनम् ॥ १०७ ॥

माक्षिकं नागचूर्णञ्च पिष्टमर्करसेनच ।
हेमपत्रं पुटेनैव म्रियते क्षणमात्रतः ॥ १०८ ॥

मतान्तरम् ।—

सुशुद्धं पारदं दत्वा कुर्य्यात् यत्नेन पीठिकाम्
दत्वोर्द्धाधोनागचूर्णं पुटेन म्रियते ध्रुवम् ॥ १०९ ॥

मतान्तरम् ।—

दोषपरिहारार्थं शोधनमाह मृत्तिकेति । मृत्तिका पञ्चमृत्तिका मातुलुङ्गाम्लैर्मातुलुङ्गरसैः ॥ १०६ ॥

मतान्तरमाह वल्मीकेत्यादि । धूमेति धूममृत्तिका कृष्णमृत्तिकेति ख्याता । पटु पांशुजलवणम् । जम्बीरैर्जम्बीररसैः । पुटेनेति लघुना पुटेन ॥ १०७ ॥

अथ स्वर्णमारणमाह माक्षिकमित्यादि हेमपत्रमिति कण्टकवेध्यं स्वर्णपत्रम् । शोधितस्वर्णमाक्षिकचूर्णं तथा सीसकचूर्णञ्च अर्कक्षीरेण संमर्द्य तेन स्वर्णपत्रं प्रलेप्य तं मूषायां संस्थाप्य प्रपुटेदिति ॥ १०८ ॥

मतान्तरमाह सुशुद्धमित्यादि । सुशुद्धं पारदं स्वर्णात् द्विगुणं दत्वा पीठिकां कुर्य्यात् तदूर्द्धाधो सीसकचूर्णं षोड़शांशं दत्वा मूषायां प्रपुटेदिति ॥ १०९ ॥

गलितस्य सुवर्णस्य षोड़शांशेन सीसकम्।
योजयित्वा समुद्धृत्य निम्बुनीरेण मर्दयेत्॥
गोलं कृत्वा गन्धचूर्णं समं दद्यात् तदुपरि।
शरावसंपुटे कृत्वा पुटेत्त्रिंशद्वनोपलैः।
एवं मुनिपुटैर्हेम नोत्थानं लभते पुनः॥

मतान्तरम्।

शुद्धसूत समं स्वर्णं खल्ले कृत्वा तु गोलकम्।
ऊर्द्ध्वाधो गन्धकं दत्वा सर्वतुल्यं निरुध्य च।
त्रिंशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्दश।
निरुत्थं जायते भस्म गन्धोदेयः पुनः पुनः॥११०॥
कषायं तिक्तमधुरं सुवर्णंगुरुलेखनम्।
हृद्यं रसायनं वल्यं चक्षुष्यं कान्तिदं शुचि।
आयुर्मेधावयःस्थैर्य्यवाग्विशुद्धिस्मृतिप्रदम्।
क्षयोन्मादगदानाञ्च कुष्ठानां नाशनं परम॥१११॥*

इतिस्वर्णशोधनमारणम्॥

मतान्तरमाह शुद्धसूतेति। कण्टकवेध्यं स्वर्णपत्रं तुल्येन सूतेन सम्मेलयेत् ततो गोलकं कुर्य्यात्। आदौ चार्द्धांशं गन्धकं पात्रोपरि विन्यस्य ततो गोलकं स्थापयेत् तदुपरि गन्धकमर्द्धं निःक्षिप्य भाण्डसुखं रुद्धा पुटोदेयः। एवं चतुर्द्दश पुटोदेयः प्रतिपुटे तु तुल्यांशं गन्धं प्रदातव्यमिति॥ ११०॥

---

* सर्वौषधप्रयोगैर्ये व्याधयो न विनिर्ज्जिताः। कर्मभिः पञ्चभिश्चापि सुवर्णं तेषु योजयेत्।

* कर्मभिः पञ्चभिः वमनविरेचनादिरूपैरिति।

दग्धोत्तीर्णं सुश्वेतं निर्म्मलं कुन्दसन्निभम्।
गुरुस्निग्धं कुमारञ्च तारमुत्तममिष्यते॥
आयुःशुक्रं बलं हन्ति रोगसङ्घं करोति च।
अशुद्धञ्चामृतं तारं शुद्धमार्य्यमतोबुधैः॥ ११२॥
नागेन क्षारराजेन द्रावितं शुद्धिमिच्छति।
रजतं दोषनिर्मुक्तं किम्बा क्षाराम्लपाचितम्॥
इतिरजतशोधनम्॥ ११३॥
माक्षिकं गन्धकञ्चैवमर्कक्षीरेण मर्द्दयेत्।
तेन लिप्तं रूप्यपत्रं पुटेन म्रियते ध्रुवम् ११४ *॥

मृतसुवर्णस्य गुणमाह कषायेत्यादि कषायतिक्तमधुरमिति कषायादित्रिरसप्रधानम्॥ १११॥

अथ रजतशोधनादिकमाह। तत्र मारणयोग्यं रजतमाह दग्धोत्तीर्णमित्यादि अग्नौ दग्धे सति यत्सुश्वेतं कुन्दसन्निभममलं तद्दग्धोत्तीर्णमिति तन्त्रान्तरे तु गुरुस्निग्धं मृदुश्वेतं दाहच्छेदघनक्षमम्। वर्णाढ्यं चन्द्रवत्स्वच्छं तारे नवगुणं शुभम्। अथायोग्यलक्षणमाह कठिनं कृत्रिमं रूक्षं रक्तं पीतं दलं लघु। दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम्मिति। अथाशुद्धस्य तारस्य दोषमाह आयुरित्यादि॥ ११२॥

अथ शोधनमाह नागेनेत्यादि। क्षारराजेनेति टङ्कणक्षारेण॥ ११३॥

अथ मारणमाह माक्षिकमित्यादि स्वर्णमाक्षिकगन्धकयोर्मात्रा तुल्योभागः। पुटनमत्रमूषायाम्॥ ११४॥

---

* माक्षिकं गन्धकञ्चैव समभागेन चूर्णयेत् अर्कक्षीरेण संपिष्य रूप्यपात्रं विलिप्य च पुटेनजायते तारं भस्मचैवेति निश्चितम् इति पाठान्तरम्।

मतान्तरम् ।

कण्टवेध्यं तारपत्रं द्विधाद्विगुणहिङ्गुलम् ।
पातयन्त्रे रसो ग्राह्यो रजतं मृतमुच्यते ॥ ११५ ॥*

मतान्तरम् ॥

तालं गन्धं रौप्यपत्रं मर्द्दयेत् निम्बुकद्रवैः ।
त्रिपुटैश्च भवेद्भस्म योऽन्यमेतद्रसादिषु ॥
तारपत्रं चतुर्भागं भागैकं शुद्धतालकम् ।
मर्द्यं जम्बीरजैर्द्रावैस्तारपत्राणि लेपयेत् ॥
रुद्ध्वा त्रिभिः पुटैः पाच्यं पञ्चविंशद्वनोपलैः ।
म्रियते नात्र सन्देहो गन्धोदेयः पुनः पुनः ॥
शीतं कषायं मधुरमम्लं वातप्रकोपजित् ।
दीपनं बलकृत् स्निग्धं गुल्माजीर्णविनाशनम् ॥
आयुष्यं दीर्घरोगघ्नं रजतं लेखनं स्मृतम् ।

इतिरजतमारणम् ।

मतान्तरमाह कण्टकवेध्यमित्यादि ।—पातनयन्त्र इत्यूर्द्ध्वपातनायन्त्रेण । एवम्बिध मृतस्य रौप्यस्य गुणमाह शीतमित्यादि ॥ ११५ ॥

---

* रूप्यकटुपात्रं समभागपारदेन खल्लयित्वा पिण्डं कुर्य्यात् पश्चात् रूप्य समे हरितालगन्धके जम्बीररसेन एकप्रहरं संमर्द्य गोलाकृतिं कृत्वा गजपुटं दद्यात् एवं त्रितियारान् कुर्य्यादित्युपदेश इति ।

* सुवर्णेनच रजतं त्रिच्छिद्रीनं गुणैर्भवेदित्यतिरिक्तपाठः ।

न विषं विषमित्याहुस्ताम्रञ्च विषमुच्यते।
एकदोषो विषेत्वष्टौ दोषास्ताम्रे प्रकीर्त्तिताः ॥११६॥
भ्रमो मूर्च्छाविदाहश्च उत्क्लेदः शोषवान्तयः।
अरुचिश्चित्तसन्तापः एते दोषा विषोपमाः ॥ ११७ ॥
तस्माद्विशुद्धं ताम्रं हि ग्राह्यं रोगोपशान्तये।
पटुना रविदुग्धेन ताम्रपत्राणि लेपयेत् ॥
अग्नौ सन्ताप्य निर्गुण्डीरसे सिञ्चेत् पुनःपुनः॥११८॥*
सप्तवारम्।
गोमूत्रेण पचेद्याम ताम्रपत्रं दृढाग्निना।
शुध्यते नात्रसन्देहो मारणञ्चात्र कथ्यते ॥ ११९ ॥

इतिताम्रशोधनम्।

ताम्रशोधनादिकमाह न विषमित्यादि। शोधनयोग्यताम्रस्य लक्षणं यद्यप्यत्रनोक्तं तथापि प्रयोगशिष्टार्थं तल्लक्षणं विशेषतो ज्ञेयं यथा जवाकुसुमसंकाशं स्निग्धं मृदुघनं क्षमम्। लौहनागोजझितं ताम्रं मारणाय प्रशस्यते। कृष्णरूक्षमतिशुद्धं श्वेतञ्चापि घनासहं लौहनागयुतञ्चापि शुल्वं दुष्टं प्रकीर्त्तितमिति। ताम्रञ्च विषमिति अशुद्धताम्रं विषवद्गुणकारकमिति भावः ॥ ११६ ॥

ताम्रस्याष्टौ दोषानाह भ्रम इत्यादि ॥ १२७ ॥

शोधनप्रयोजनमाह तस्मादित्यादि। शोधनमाह पटुनेति पटुना सैन्धवेन रविदुग्धेनार्कदुग्धेन। अग्नौ सन्ताप्येति तप्ततप्तानि ताम्रपत्राणि सिन्धुवाररसे सप्तधा अभिषिक्तानि ॥ ११८ ॥

---

* निर्गुण्डी इति लोके।

सूतमेकं द्विभागन्धं यामं मर्द्दनन्तु कन्यया। *
द्वयोस्तुल्यं ताम्रपत्रं लिप्त्वा स्थाल्यां निधापयेत्।
सम्यक्चूर्णजैः सार्द्धं पार्श्वे भस्म निधापयेत्।
चतुर्यामं पचेच्चुल्ल्यां पात्रपृष्ठे सगोमये॥
जलं पुनः पुनर्देयं स्वाङ्गशीतं विमर्द्दयेत्।
म्रियते नात्रसन्देहः सर्वरोगेषु योजयेत्॥ †

मतान्तरम्।

जम्ब्वम्भसा सैन्धवसंयुतेन सगन्धकं स्थापय शुल्वपत्रम्‡।
पक्वायमानं पुटयेत् सयुक्त्या वान्त्यादिकं याव-
दुपैति शान्तिम्॥१२०॥

अन्यमतम्।

मतान्तरमाह गोमूत्रेति।-लवणलिप्तं ताम्रपत्रं दिनत्रयानन्तरं दृढाग्निना गोमूत्रेण सह याममात्रं पचेदित्युपदिशन्ति वृद्धाः॥११९॥

अथ मारणमाह सूतमेकमित्यादि।—स्पष्टम् मतान्तरमाह जम्ब्वाम्भसेति। ताम्रतुल्यं सैन्धवं गन्धकञ्च संगृह्य जम्बीररसेन मर्द्दयेत् तेन ताम्रपत्रं लेपयेत् ततः स्थालीमध्ये संस्थाप्य स्वल्पशरावेणाच्छाद्य सन्धिं लेपयेत् ततो वालुकाभिरूर्द्ध्वमापूर्य्य विपचेत्। स्थूले च संचूर्ण्य पञ्चगव्यैर्व्वारम्वारं प्रपुटेद्यावद्वान्त्यादिशान्तिमुपैतीति॥१२०॥

---

* कृत्वा तु कज्जलीमिति वा पाठः।

† नानाविधं मृतं ताम्रं चाम्लैर्यामं विमर्द्दयेत्। तत्गोलं शूरणस्यच्च रुद्ध्वा सर्वत्र लेपयेत् शुष्कं गजपुटे दद्यात् सर्वदोषहरं भवेत् वान्तिं भ्रान्तिं विरेकञ्च न करोति कदाचन इत्यतिरिक्तपाठः।

‡ शुल्वपत्रं ताम्रपत्रमित्यर्थः।

शुद्धं ताम्रदलं विमर्द्य पटुना चारेण जम्बीरजैः।
नीरैर्घर्स्त्रमिदं स्नुगर्कपयसा लिप्तं धमेत् सप्तधा। *
निर्गुण्ड्यम्बुहिमं रसेन्द्रकलितं दुग्धाज्यमन्धेन तत्।
तुल्येनाथ मृतं भवेत् सुपटितं पश्चाभृतेन त्रिधा॥
वान्तिभ्रान्तिविवर्जितं चयरुजाकुष्ठानि पाण्डामयम्।
शूलं मेहगुदाङ्कुरानिलगदानुक्तानुपानैर्जयेत्॥
गुञ्जामात्रमिदं ततो द्विगुणितं तच्छुद्धकायेन चेत्।
भुक्तं स्थौल्यजरापमृत्युशमनं पथ्याशिना वत्सरात्॥१२१॥
ताम्रशुद्धं गरहरं यकृत्प्लीहोदरापहम्।
क्रिमिशूलामवातघ्नं ग्रहण्यर्शोऽम्लपित्तजित्॥

इतिताम्रमारणम्॥

मतान्तरमाह शुद्धमित्यादि।—सैन्धवं चारत्रयञ्च ताम्रतल्यं संगृह्य जम्बीररसैस्तथा स्नुह्यर्कदुग्धेन सह मर्दयेत्। तेन लिप्तं ताम्रपत्रं सप्तधा धमेत् निर्गुण्डीरसैश्च सिञ्चेत्। यत् गैरिकाभचूर्णमधःपतति तत्संगृह्य प्रक्षाल्य तुल्येन गन्धकेन सूतेन च संमर्द्य दुग्धाज्याभ्यां पीठिकां कृत्वा प्रपुटेत् ततः पश्चामृतेन त्रिधा पुटेदिति।

एवम्विधस्मृतताम्रस्य गुणमाह वान्तिभ्रान्तीत्यादि। गुदाङ्कुरमर्शरोगम्। गुञ्जामात्रमिदमिति रोगोपशमनार्थं गुञ्जामात्रं ताम्रं प्रयोक्तव्यम्। रसायनार्थञ्च गुञ्जाद्वयमिति॥ १२१॥

---

* स्नुक् स्नुहीवृक्षः मीजवृक्ष इति लोके।

† ताम्रपत्रसमं पारदगन्धकं दत्त्वा कज्जलीं कृत्वा जम्बीररसैस्तत् पत्रं लेपयित्वा बोहिवत् गजपुटे पचेत् यावत् सूक्ष्मचूर्णं न भवेदित्युपदेशः।

पित्तलञ्च तथा कांस्यं ताम्रवन्मारयेत् पृथक्।
ताम्रवच्छोधनं तेषां ताम्रवद्गुणकारकम्॥ १२२॥

इतिपित्तलकांस्यमारणम्॥

नागवङ्गे च गलिते रविदुग्धेन सेचिते।
त्रिवारान् शुद्धिमायातः सच्छिद्रे हण्डि-
कान्तरे॥ १२३॥ *

मतान्तरम्।

वङ्गं चूर्णोदके स्विन्नं यमार्द्धेन विशुध्यति॥ १२४॥

इति नागवङ्गशुद्धिः॥

भुजङ्गममगस्त्यञ्च पिष्ट्वा पत्रं प्रलेपयेत्।
तत्र संविद्रुते नागी वासापामार्गसम्भवम्॥

कांस्यपित्तलयोः शोधनमारणादिकमाह पित्तलञ्चेत्यादि।— स्पष्टम्॥ १२२॥

नागवङ्गयोः शोधनमाह नागवङ्गयिति।—गलिते ते नागवङ्गे सच्छिद्रहण्डिकान्तरनिविष्टे त्रिवारं चार्कक्षीरेणाभिषिञ्चयिति॥१२३॥

वङ्गशोधनमाह वङ्गेति।-वङ्गपत्रं चूर्णोदके यामार्द्धं दोलायन्त्रे स्वेदयेदिति॥ १२४॥

---

* निर्गुण्डीरसयोगाच्च हरिद्राचूर्णसंयुते। एवं द्विस्त्रिःकृत्वा कुर्य्यात् नागवङ्गविशोधनम् इति अतिरिक्त पाठः।

क्षारं विमिश्रयेत्तत्र चतुर्थांशं गुरूक्तितः।
प्रहरं पाचयेच्चुल्यां वासादर्व्यां च चालयेत्॥
तत उद्धृत्य तच्चूर्णं वासानीरेण मर्द्दयेत्।
एवं सप्तपुटैर्नागं सिन्दूरं जायते ध्रुवम्॥ १२५॥

अन्यमतम्।

त्रिभिः कुम्भपुटैर्नागो वासारसविमर्द्दितः।
सशिलो भस्मतामेति तद्रजः सर्वमेहजित्॥
दशनागबलं धत्ते वीर्य्यायुः कान्तिवर्द्धनम्।
मेहान् हन्ति हतं नागं सेव्यं वङ्गञ्च तद्गुणम्॥
तारस्य रञ्जनो नागो वातपित्तकफापहः।
ग्रहणीकुष्ठगुल्मार्शः शोषव्रणविषापहः॥ १२६॥

इतिनाग मारणम्॥

अथ नागमारणमाह भुजङ्गमेति। भुजङ्गमं सीसकम्। अगस्त्यं वकपुष्पम्। द्राविते नाग इति पर्णागस्त्ययोः पत्रखिप्तं सीसकं छविद्र-कान्तर्निवेश्याग्नौ प्रतापयेत् गलिते सति वासकापामार्गयोः क्षारं नागात् चतुर्थांशं वारम्वारं क्षिपेत्। एवं प्रहरद्वयं पक्का उद्धृत्य वासकरसैर्मर्द्दयेत् ततः सप्तधा पुटेदिति॥ १२५॥

मतान्तरमाह त्रिभिरित्यादि। सशिलः मनःशिलयासहितः कुम्भो-पुटैर्गजपुटैः। एवम्विधहतस्य सीसकस्य गुणमाह सर्वमेहजिदित्यादि। —अथ सीसकगुणं वङ्गेऽप्यतिदिशति वङ्गञ्च तद्गुणं इति॥ १२६॥

---

* सीसकं सयवक्षारं लौहपात्रे विपाचितम् क्षारं पुनःपुनर्देयं यावत् भस्मत्वमाप्नुयाद्रक्तवर्णं भवेत् यावत् तावत् मन्दाग्निना पचेत् इत्यतिरिक्तपाठः।

वङ्गं सतालमर्कस्य पिष्ट्वा दुग्धेन संपुटेत्।
शुष्काश्वत्थभवैर्वल्कैः सप्तधा भस्मतां नयेत्॥ १२७॥

मतान्तरम्।

विशुद्धवङ्गपत्राणि द्रावयेद्धण्डिकान्तरे।
अपामार्गोद्भवं चूर्णं तत्तुल्यं तत्र मेलयेत्॥
स्थूलाग्रया लौहदर्व्या शनैस्तदभिमर्दयेत्।
यावद्भस्मत्वमाप्नोति तावन्मर्द्यन्तु पूर्ववत्॥
ततस्त्वेकीकृतं चूर्णं कृत्वा चाङ्गारवर्जितम्।
नूतनेन शरावेण रोधयेच्च भिषग्वरः।
पश्चात्तीव्राग्निना पक्वं वङ्गभस्मभवेद्ध्रुवम्॥ १२८॥

अथ वङ्गशोधनादिकमाह वङ्गमित्यादि।—यद्यप्यत्र मारणयोग्यं वङ्गं नोक्तं तथापि दोषवद्वङ्गपरिहारार्थं तल्लक्षणं विशेषतो ज्ञेयम्। यथा—श्वेतं मृदु लघु स्वच्छं स्निग्धमुष्णासहं हिमम्। द्रुतपत्रकरं कान्तं त्रपुश्रेष्ठमुदाहृतम्। खुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते। उत्तमं खुरकं तत्र मिश्रकं त्वहितं मतमिति। वङ्गमित्यादि।—हरितालं वङ्गञ्च समभागं गृह्णीयात्। अर्कदुग्धेन हरितालं निक्षिप्य तेन वङ्गपत्रं लेपयेत्। ततोऽश्वत्थस्य शुष्कवल्कलैः सप्तधा वेष्टयित्वा प्रपुटेत्। एवं पुटैकेन भस्मतां याति॥ १२७॥

मतान्तरमाह विशुद्धवङ्गपत्राणीत्यादि। विशुद्धवङ्गपत्राणि हण्डिकामध्ये निःक्षिप्य चाग्नौ प्रतापयेत्। गलिते सति तत्तुल्यांश-मपामार्गक्षारं वारम्वारं दत्त्वा लौहदर्विकया मर्दयेत् यावत् भस्मता-माप्नोति ततो जले वारम्वारं प्रक्षाल्य चाङ्गाररहितं कुर्यात्। तत आतपे संशोष्य दुग्धेन मर्दयेत् तदनु नूतनशरावद्वयान्तर्निहितं कृत्वा सन्धिमालिप्य मृत्तिकावस्त्रैः रावेष्ट्य तीव्राग्निना पचेदिति॥ १२८॥

मतान्तरम्।

वङ्गं खर्परके कृत्वा चुल्ल्यां संस्थापयेत् सुधीः।
द्रवीभूते पुनस्तस्मिन् चूर्णान्येतानि दापयेत्॥
प्रथमं रजनीचूर्णं द्वितीये च यमानिका।
तृतीये जीरकञ्चैव ततश्चिञ्चात्वगुद्भवम्॥
अश्वत्थवल्कलोत्थञ्च चूर्णं तत्र विनिःक्षिपेत्।
एवं विधानतो वङ्गं म्रियते नात्रसंशयः॥
वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपनम्।
मेदःश्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम्॥ १२९॥

इतिवङ्गमारणम्॥

तप्तानि सर्वलौहानि कदलीमूलवारिणि।
सप्तधात्वभिषिक्तानि शुद्धिमायान्त्यनुत्तमाम्॥१३०॥ *

वङ्गमित्यादि।—वङ्गं स्थालिमध्ये संस्थाप्य चाग्नौ प्रतापयेत्। द्रवीभूते च प्रथमं तुल्यांशं हरिद्राचूर्णं देयं किञ्चित् विश्राम्य तदनन्तरं यमानिकाचूर्णं तत्तुल्यं प्रक्षेप्यं एवं सर्वत्र। चिञ्चात्वगुद्भवमिति चिञ्चायास्त्वगभस्म एवमश्वत्थवल्कलोद्भवं क्षारं प्रदेयमिति। एवं कृतवङ्गस्य गुणमाह वङ्गमित्यादि॥ १२९॥

इदानीं लौहशोधनमारणादिकमाह तप्तानीति।-सर्वलौहानीति

---

* अनुत्तमामिति नास्ति उत्तमा शुद्धिर्यस्यामिति अनुत्तमां सर्वोत्तमामित्यर्थः।

त्रिफलाष्टगुणे तोये त्रिफला षोड़शं पलम्।
तत्क्वाथे पादशेषे तु लौहस्य पलपञ्चकम्॥
कृत्वा च सप्तपत्राणि सप्तवारं निषेचयेत्।
एवं प्रलीयते दोषो गिरिजे! लौहसम्भवः॥

इति लौहशोधनम्।

भानुपाकात्तथा स्थालीपाकाच्च पुटपाकतः।
निरुत्थो जायते लौहो यथोक्तफलदो भवेत्॥

सर्व्वाणि कान्तपाण्डिसज्ञादीनि। यद्यप्यत्र लौहशोधनं सामान्येनै- वोक्तं तथापि पातञ्जलोक्तशोधनविधिना लौहं निर्म्मलं कार्य्यम्। अन्यथा तदेव सुशोधितं न स्यात्। उक्तं हि लौहं प्रथमतः शाणादिना निर्म्मलीकृत्य पत्तलं कार्य्यं तदनुचाङ्गेरी मातुलुङ्गाम्लवेतसेनाम्लयित्वा प्रत्येकेन सप्तवारमातपे संशोष्य ततः काञ्जिकादौ दिनद्वयं त्रयं वा स्थाप्य एवमम्लभावनां विधाय तदनुगोमूत्रपिष्टत्रिफलाकल्केनालिप्य आतपे शोषणीयम्। ततश्च मनःशिला वल्मीकमृत्तिकाकुठारिकामूलचाङ्गेरी- श्वेतदूर्व्वाभिश्चैवैस्च जले पिष्टैः क्रमेण प्रलिप्य आतपे शोषणीयं ततश्च पत्तलं निर्म्मलं कृत्वा लौहमम्लीकृतं पुनः मूत्रपिष्टत्रिफलयावारि- पिष्टमनोह्वयाभावितं तत् भावयेत्। तदनुभस्त्रया वह्निं ध्मापयित्वा नातितप्तं कृत्वा लौहापेक्षया द्विगुणेषु गव्यदुग्धकाञ्जिकगोमूत्रत्रिफला- क्वाथेषु पृथक् वारत्रयं निर्व्वापणीयं अथवा तप्तं कृत्वा सप्तवारं कद- लीमूलवारिणि चाभिषिञ्चेत्। निषेकमात्रा च लौहपत्रं सम्यक् तप्तं द्विगुणे तद्रसे क्षिपेत्। विवेक एव निर्द्दिष्टो निषेकार्थैकवारादिभिरिति। तदेवं निषेकं विधाय रात्रिमेकां विश्राम्य पुनरपि स्वच्छकाञ्जिकमात्रे लौहनिषेकं कर्त्तव्यम्। तदनुमारणादिषु योजयेदिति॥ १२०॥

अथ भानुपाकविधिः।—

लौहे दृषदि लौहञ्च मुद्गरेण हतं मुहुः। *
कृत्वा तु गलितं शुद्धं जलेन त्रैफलेन वा॥
चालयेद्बहुशः पश्चात् कृत्वा द्रव्यान्तरं पृथक्।
शोषितं भानुभिर्भानोर्भानुपाके प्रयोजयेत्॥ १३१॥
चालने भानुपाके तु लौहतुल्यं फलत्रिकम्।
जलं द्विगुणितं दत्त्वा चतुर्भागमवशेषयेत्॥
एवमुक्तं फलक्वाथं जलं दत्त्वा पुनः पुनः।
शोषयेत् सूर्य्यतेजोभिर्निरन्तरमहस्त्रयः॥

एवं शोधितस्य लौहस्य पलपञ्चकं गृहीत्वा लौहार्द्धभागं षोड़शांशं वा स्वर्णमाक्षिकचूर्णं त्रिफलाक्वाथेनालोड्य लेपयेत्। तदनु कुठारच्छिन्ना त्रिफलापराजितास्थिसंहारहस्तिकर्णपलाशमूलशतावरीकेशराजशालिमूलकर्णिकामूलपुनर्नवाभृङ्गराजैर्भङ्क्त्वैः षोड़शांशैराविद्धं सध्मापितभस्त्रसुक्तपवनेन प्रज्वलितवह्नौ स्थापयेत् धूलिमत्सर्व्वभस्त्रस्वच्छसलिलञ्च सर्वथा विवर्ज्जयेदिति। यदा गलतिलौहं तदा यथोक्तत्रिफलाक्वाथे निःक्षिपेत्। एवं सति यन्न मृतं तत् पुनरपि ध्मात्वा त्रिफलाक्वाथे क्षेपणीयं एवं सप्तवारकृते सति यन्न मृतं तत् परित्याज्यमलौहकत्वात्। उक्तं हि सप्तवारं तथा लौहं पूर्ववत् पूर्वभेषजैः। ध्मात्वा ततः समुत्थाय निःक्षिपेत् त्रिफलाम्बुनि। एवं नामान्वयोलौहौ न मृतस्त्याज्य एव स इति। लौहनिर्वापणार्थं यथा त्रिफलाक्वाथं कर्त्तव्यं तदाह त्रिफलाष्टगुणेति। ध्मातलौहनिर्व्वापणावशिष्टं त्रिफलाक्वाथं भानु-

---

* लौहे लौहमयपात्रे दृषदि प्रस्तरखण्डे वा गलितं चूर्णितं त्रैफलेन वेति वा शब्दः पादपूरणे भानुभिरर्कैरित्यर्थः। त्रिदिनं यावत् निरन्तरं त्रिफलाजलं दत्त्वा सूर्य्यतेजोऽभिः शोषयेदिति भावः।

अथवा तत्र तत् क्वाथं दत्वा दत्वा भिषग्वरः ॥
सप्त सप्तविधैरेव सप्तवारात् विशोषयेत् ।

इति भानुपाकः । १३२ ।

इत्थमादित्यपाकान्ते स्थाल्यां पाकमुपाचरेत् ।
स्थालीपाके फलं ग्राह्यमयसस्त्रिगुणीकृतम् ॥
तस्य षोड़षिकं तोयमष्टभागावशेषितम् ।
मृदुमध्यकठोराणामन्येषामयसा समम् ॥
क्वथनीयं समादाय चतुरष्टौ च षोड़श: ।
गुणानां स्थाप्यते तोयं शेषयेदयसासमम् ॥
स्वरसस्यापिलौहेन स्थालीपाके समानता ।
स्थाल्यां क्वाथादिकं दत्वा यथाविधि विनिर्म्मितम् ।
पाकेन चीयते यस्मात् स्थालीपाक इति स्मृतः ॥१३३॥

पाकार्थं स्थापनीयमिति । एवं मृतस्य लौहस्य भानुपाकादिभिर्निरुत्थीकर्त्तव्यम् । निरुत्थीकरणहेतुमाह भानुपाक इत्यादि । भानुपाकविधिमाह लौह इत्यादि । जारणानन्तरं लौहोदूखले लौहमुद्गरेण सम्यक् संचूर्ण्य सलिलं त्रिफलाक्वाथं वा बहुशो दत्वा वारम्वारं प्रक्षाल्य चाङ्गाररहितं कुर्य्यात् । ततोऽग्नौ वातपे शुष्कीकृत्य तीक्ष्ण लौहखल्ले मर्द्दयेत् । ततो यथोक्तत्रिफला क्वाथेन सह भानुपाके योजयेत् । १३१ ।

चालनार्थं भानुपाकार्थं वा क्रियमाना त्रिफला पाह्या जलं वा क्रियमाणं तद्भिचालने इत्यादि ।— निरन्तरमहस्त्रय इति ।— एवं कृतं क्वाथं निरन्तरं त्रिदिनं दत्वासूर्य्यांशुभिः शोषयेत् । अथवा क्वाथं सप्तधा विभज्य सप्तवारं दत्वा शोषयेत् एवं सप्तधा कुर्य्यादिति भावः । १३२ ।

हस्तिकर्णपलाशस्य मूलञ्च शतमूलिका।
भृङ्गराजाख्यराजानामेषां निजरसैः सह ॥
मिलित्वा वा विधातव्यं स्थालीपाके फलादनु।
यथा दोषौषधेनापि स्थालीपाको विधीयते ॥ १३४ ॥
इतिस्थालीपाकविधिः।
स्थालीपाके सुसंपक्वं प्रक्षाल्य स्वच्छवारिणा।*

भानुपाकान्तरं स्थालीपाकं कर्त्तव्यं। तत्र कियत् त्रिफलामानं कर्त्तव्यं क्रियन्मानं वा जलं देयमित्यत आह स्थालीपाक इत्यादि। —यथानिर्दिष्टद्रव्याणां मध्ये लौहाहिष्टजनस्य यद्दोष प्रत्यनीकं न भवति तत्परित्याज्यं यद्दोषप्रत्यनीकं तदनुक्तमपि देयमित्यत आह यथादोषेति। यद्दोषप्रत्यनीकं व्याधिप्रत्यनीकञ्च स्थाली-पाकार्थमुक्तं तेषां स्वरसाऽप्राप्तौ क्काथं किदृशं कर्त्तव्यमित्यत आह मृदुमध्येति। मृदुमध्य कठोराणां द्रव्याणां क्काथ्य मयसासमं गृहीत्वा यथाक्रमं चतुरष्टौ षोड़शगुणं वा तोयं दत्वा लौहसमं पक्तव्यमिति। केचित्तु व्याध्यनुरूपस्थालीपचनीयद्रव्याणामन्तरे कस्यचित् यदि स्वरसप्राप्तिर्नास्ति तत्र स्थालीपाकार्थं त्रिफलाक्काथानुसारेणैव क्काथ्य जलादिकं दत्वा क्कथनीयम्। तच्च क्काथं स्थालीपाके प्रयोजयेदिति। स्वरसमानार्थमाह स्वरसस्येति। स्थालीपाकञ्चनिरन्तिमाह स्थाल्यां मित्यादि। १३३।

प्रथमतः स्थाल्यां लौहचूर्णं त्रिफलाक्काथेनालोड्य वह्निपाकं विधाय ततोनन्तरं हस्तिकर्णपलाशादीनां व्यस्तानां समस्तानां वा स्वरसैरपि पूर्ववत् स्थालीपाकः कार्य्यः। ततो दोषप्रत्यनीकद्रव्याणां स्वरसैः क्काथैर्वा स्थालीपाकः कार्य्य इति। १३४।

* स्वच्छवारिणा निर्म्मलजलेन इत्यर्थः।

शुष्कं संचूर्णयत्नेन पुटपाके प्रयोजयेत् ।
पुटाद्दोषविनाशः स्यात् पुटादेव गुणोदयः ।
म्रियते च पुटाल्लौहस्तस्मात् पुटं समाचरेत् ॥
यथा यथा प्रदीयन्ते पुटाः सुबहुशो यदि ।
तथा तथा प्रकुर्वन्ति गुणानेवसहस्रशः ।
पुटपाकेन पक्वन्तु शस्यते रसकर्म्मसु ॥
दशादिशतपर्यन्तो गदे पुटविधिर्मतः । *
शतादिस्तु सहस्रान्तः पुटोदेयो रसायने ॥
वाजी कर्म्मणि विज्ञेयः दशादि शतपञ्चकः ।
तावदेव पुटेल्लौहं यावच्चूर्णीकृतं जले ।
निस्तरङ्गे लघुत्वेन समुत्तरति हंसवत् ॥ १३५ ॥

स्थालीपाकानन्तरं स्वच्छवारिणा लौहं प्रक्षाल्यचातपे शोषयेत् । ततः संचूर्ण्यवक्ष्यमाणविधिना पुटपाकं कुर्य्यादिति । पुटपाकस्य प्रयोजनमाह पुटादित्यादिर्यैर्द्वैः पुटो देयस्तेषां गुणाः सहस्रशो लौहेपि वर्त्तन्ते इत्यत आह यथा यथेति । पुटानां संख्याभेदेन कर्म्मभेदानाह दशादीत्यादि । दशादिशतपर्य्यन्तं व्याधिनिवारकं एवमन्यच्च । एतच्च विशिष्टज्ञानार्थं । यदा तु प्रतिपुटानन्तरं केतकीरजः सदृशं पेषणं वस्त्रपूतञ्च भवति तदा संख्यादिभेदप्रयोजनं

शतादिसहस्रान्तपुटस्तु रसायनार्थं ज्ञेयः † ।

* तावच्च चूर्णयेदेनं यावत् कज्जलसन्निभम् । करोति निहते नेत्रे नैव पीडां कथञ्चन इत्यतिरिक्तपाठः ।

† कज्जलसन्निभमित्यनेनकणाराहित्यं नतु कृष्णवर्णमितिभावः ।

पुटपाकौषधस्यापि क्वाथो वा स्वरसोऽपि वा ।
वक्ष्यमाणप्रमाणेन कर्त्तव्यो भिषजांवरैः ।
रसाभावे तु सर्वेषां क्वाथो ग्राह्यो मनीषिभिः ।
अभावे स्वरसस्यापि क्वाथ एव फलत्रिकात् ॥ १३६ ॥ *
त्रिफला त्रिवृता दन्ती कटुकी तालमूलिका ।
वृद्धदारकवह्निखिरवृषपत्रकचित्रकाः ।
शृङ्गवेरविड़ङ्गौ च भृङ्गभल्लातकौषधम् ।
दाड़िमस्य च पत्राणि शतपुष्पी पुनर्नवा ॥
कुठारक्रामकौ कन्दः तन्त्रीभेकस्यपर्णिका ।
हस्तिकर्णपलाशश्च कुलिशः केशराजकः ॥
माषःखण्डितकर्णश्च गोजिह्वा लोहमारकः ।
गिरिशान्तनकः प्रोक्तास्त्रिफलादिरयं गणः ॥
सामान्यपुटपाकार्थमेतानिच्छन्तिसूरयः ॥ १३७ ॥†

नास्ति—सप्ताष्टाभिरेव विशिष्टफलदं भवतीति । यदा संख्याविभेदो न कार्य्यस्तथा विभेदेपि यथाविधलौहं कर्त्तव्यं तदर्थमाह ताव-देवेति । १३५ ।

अथ पुटपाकौषधस्य क्वाथं स्वरसमपि यथा प्रयोज्यं तदर्थं वाधा-रणविधानमाह पुटपाकेत्यादि ॥ १३६ ॥

---

* फलत्रिकात् त्रिफलादित इत्यर्थः । त्रिफला च हरितकी आमलकी वहेड़ा ।

† दृश्चिर पुनर्नवा इति रत्नमाला ।

औषधं शुण्ठी । क्रामकः सुपारिमूलमिति लोके ।‡तन्त्री गुडूची-शुलञ्च इति ख्यातः ।*खण्डितकर्ण खारकोन इति लोके । गोजिह्वा दाड़िशाक इति लोके ।

विशेषपुटपाकाय मयान्यान् शृणूदितान्।
एरण्डवारिवौ द्राचा शिरीषाश्च प्रसारणी॥
माषमुद्गाख्यपर्णिन्यौ विदारीकन्दकेतकी।
एरण्डादिगणोह्येष सर्ववातविकारनुत्॥ १३८॥
किरातमस्ततानिम्ब कुस्तुम्बुरुशतावरी।
पटोलं चन्दनं पद्मं शाल्मलुडुम्बरौ जटा।
पैत्तिकामयहन्त्रायं किरातादिगणोमतः॥ १३९॥
शृङ्गवेरस्य मूलानि निर्गुण्डीकीटजं फलम्॥ *
करञ्जद्वितयं मूर्वा शोभाञ्जनशिरीषकौ। †
वरुणश्चार्कपर्णञ्च पटोलं कण्टकारिका॥

साधारण पुटपाकार्थं त्रिफलादिगणमाह त्रिफलेत्यादि।—त्रिवृता रक्ततेवड़ीति ख्याता। चित्रकं चितकमूलं शतपुत्री शतमूली। कुठारः कुड़ाड़िया इति ख्याता। क्रामकः क्रान्तक्रामकः कन्दः शूरणकन्दः कुलिशोऽस्थिसंहारः॥ १३७॥

विशेष पुटपाकार्थमाह विशेषेत्यादि।—एरण्डादिगणमाह एरण्डेति। एरण्डादिगणश्च वातघ्नः। तेन पुटनादिना लौहोपि वातघ्नो भवति॥ १३८॥

किरातादिगणमाह किरातमित्यादि।—कुस्तुम्बुरु धन्याकम्। किरातादिगणः पित्तघ्नः॥ १३९॥

---

* शृङ्गवेरः शुण्ठी चार्द्रकमित्येके।

† करञ्जद्वितयं लाटाकरञ्ज डहरकरञ्जा इति ख्याते।

शृङ्गवेरादिकोह्येष गणः श्लेष्मगदापहः॥ १४० ॥
गोक्षुरक्षुरको व्याघ्रीसिंहपुच्छीद्वयंस्थिरा। *
गोक्षुरादिरितिप्रक्तो वातश्लेष्महरोगणः॥ १४१ ।
पटोलपत्रकोशीरकाग्रमहीपराजिताः।
लोध्रेन्द्रीवरकह्लार वाराही कान्तया सह॥
पटोलादिरितिज्ञेयः पित्तश्लेष्म गदापहः॥
किंशुकः काश्मरी विश्वमग्निमन्थ स्त्रिकण्टकः।
श्योनाकः शालपर्णी च सिंहपुच्छीद्वयंस्थिरा।
पाटला कण्टकारी च वृहतीविल्वमेव च।
किंशुकादिगणोह्येष दोषत्रयहरोमतः।
शतावरी बला धात्री गुडुची वृन्दारकम्।
वानरी भृङ्गराजाख्य विदारीगोक्षुरक्षुरैः॥
वाजिगन्धाकषायुक्तैर्वाजीकर्म्मसु शस्यते॥ १४२ ॥†
विदारीकन्दपिण्डाह्व भृङ्गराजशतावरी।

शृङ्गवेरादिगणमाह शृङ्गवेरेति। शृङ्गवेरादिगणः कफघ्नः। कौटजं फलं इन्द्रयवम्॥ १४० ॥

गोक्षुरादिगणमाह गोक्षुरेति। गोक्षुरादिगणश्च वातश्लेष्मघ्नः। एवमन्यत्र॥ १४१ ॥

वाजीकर्म्मसु येन प्रवृत्तेत् तदाह शतावरीत्यादि। बला श्वेतवाट्यालं वाजिगन्धा अश्वगन्धा॥ १४२ ॥

---

* क्षुरकः तालमाखना इति ख्याता।

† पिण्डाह्वं तगरपादुका इति ख्याता।

चोरकञ्चुकभल्लातास्तकाचित्रकैस्तथा।
करिकर्णपलाशैश्च मूषलो मधुकैरपि।
मुण्डिरी केशराजैश्च पुटो देयो रसायने ॥ १४३ ॥
सामान्ये च विशेषे च पुटे यद्यत् प्रकीर्त्तितम्।
मिलितैरेकशो वा तैर्यथेष्टं पुटयेत्ततः ॥ १४४ ॥
पुटपाके फलादीनामयसा ग्रहणं समम् ॥ १४५ ॥

अथ पुटपाकप्रकारमाह।—

हस्तमात्रमिते गर्त्ते करीषेणार्द्धपूरिते।
अथवा तुषकाष्ठाभ्यां पूरितेऽर्द्धे निधापयेत्।
लौहमग्निं ततो दत्वा तथैवोर्द्धं प्रपूरयेत्॥
दिवा वा यदि वा रात्रौ विधिनानेनपाचकः।
चतुर्भिः प्रहरैरेर पुटपाकेन मारयेत् ॥ १४६ ॥

रसायनार्थं यैश्च पुटोदेयस्तानाह विदारीकन्देति।—विदारी शुक्लभूमिकुष्माण्डः ॥ १४३ ॥

सामान्यविशेषपुटकगणैर्व्यस्तैःसमस्तैर्वा पुटोदेय इत्यात आह सामान्य इत्यादि तैरेकशः समस्तैर्वा यथेष्टमिति दशादिसहस्रपर्य्यन्तं निर्म्मलत्वेन लघुत्वेन वा यथा हंसवत् जले सन्तरति तथा प्रपुटेदिति ॥ १४४ ॥

पुटनार्थञ्च पुटकगणस्य स्वरसो ग्राह्यः स्वरसाभावे लौहसमं पुटनद्रव्यं संग्रह्य यथोक्तक्काथः कर्त्तव्यः। तेनायश्चूर्णं पङ्कोपमं कुर्य्यात्। ततोलौहेऽन्यस्मिन् पात्रे वा स्थित्वा तत्तुल्येनापरपात्रेणाच्छाद्य सन्धिमालिप्य यथोक्तविधिना प्रपचेदिति ॥ १४५ ॥

पुटपाकप्रकारमाह हस्तमात्रेति हस्तैकमात्रं सर्वतो हस्तैक परिमाणं तेन हस्तैकमात्र खननं सममध्यं कोटाङ्गहृद्यं वर्त्तुलाकारं

पुटपाके चणादूर्द्धं स्थितो भवति भस्मसात्।
अधस्तादपकृष्टस्तु मन्दो भवति वीर्य्यतः॥
कुण्डस्थो भस्मनाच्छन्न आकृष्टव्यः सुशीतलः।
समाकृष्टस्य तप्तस्य गुणहानिः प्रजायते॥ १४७॥

इति पुटपाकविधिः॥

शुद्धस्य सूतराजस्य भागो भागद्वयं बलेः।
द्वयोः समं लौहचूर्णं मर्द्दयेत् कन्याकाद्रवैः॥
यामद्वयं ततो गोलं स्थापयेत्ताम्रभाजने।
आच्छाद्यैरण्डजैः पत्रैरुष्णो यामद्वयाद्भवेत्।
त्रिरात्रं धान्यराशिस्थं तत् ततो मर्द्दयेत् दृढम्।
रजस्तद्वस्त्रगलितं नीरे तरति हंसवत्।
तीक्ष्णं मुण्डं कान्तलौहं निरुत्थं जायते मृतम्॥ १४८॥

गर्त्तं कर्त्तव्यम्। वन्यकरीषेणतुषेणकाष्ठेन वार्द्धपूरिते तस्मिन् वह्निं निधाय सम्पुटन्दत्वा अपरमर्द्धं करीषादिभिः पूरयेत्। एवं विधानेन चतुर्भिः प्रहरैरेव पुटपाकः कीर्त्तितः। प्रतिपुटान्ते लौहपात्रे पाषाणपात्रे वा केतकीरजः सदृशं चूर्णयेदिति। अन्यत् लौहमारणादि विशेषविधानं लौह प्रदीपादौ बोध्यम्॥ १४६॥

पुटपाकस्य गुणदोषमाह पुटपाक इत्यादि॥ १४७॥

पुटपाकमतान्तरमाह शुद्धस्येत्यादि। सूतराजस्य पारदस्य भागैकं तथा बलेर्गन्धकस्य भागद्वयं द्वयोः समं लौहचूर्णं संग्रह्य मर्द्दयेत् यावत् कज्जलतामुपैति ततः कन्याद्रवैर्यामद्वयं पिष्ट्वा ताम्रपात्रे तद्गोलकं संस्थाप्य एरण्डपत्रैराच्छाद्य सम्पुटेत्। ततो वस्तुकपत्रैः पुनरावेष्ट्य धान्य-

मतान्तरम् ।

द्वादशांशेन दरदं तीक्ष्णचूर्णस्य मेलयेत् ।
कन्यानीरेण संमर्द्य यामयुग्मञ्च संपुटेत् ।
एवं सप्तपुटे स्त्वुं लौहचूर्णमवाप्नुयात् ॥ १४९ ॥

अथ लौहनिरुत्थीकरणम् ।—

सर्वमेतन् मृतं लौहं ध्मातव्यं मित्रपञ्चकैः ।
यद्येवं स्यान्निरुत्थञ्च सेव्यं रक्तिचतुष्टयम् ॥ १५० ॥
मधुसर्पिस्तथा गुञ्जा टङ्कणं गुग्गुलुस्तथा ।
मित्रपञ्चकमेतत्तु गलितं धातुमेलने ॥

मतान्तरम् ॥

गोघृतं गन्धकं लौहं तप्तखल्ले विमर्द्दयेत् ।
दिनैकं कन्यकाद्रावैरुद्ध्वा गजपुटे पचेत् ॥
इत्येवं सर्वलौहानां कर्त्तव्यं स्यान्निरुत्थितम् ।

रसायने विशेषो यथा—

घृतमधुगुञ्जाटङ्कणैःसमं लौलभस्म
मर्द्दयेच्च विचक्षणः ।
धमेद्दृढं पुनर्लौहं तदा योग्यं रसायने ॥ १५१ ॥

रात्रौ त्रिदिनं स्थापयेत् । तत उद्धृत्य मर्द्दयेत् । एवं पुनः पुनः कुर्य्याद् यावज्जले तरति ॥ १४८ ॥

मतान्तरमाह द्वादशांशेनेति । दरदं हिङ्गुलं तीक्ष्णं लौहम् ॥१४९॥

अथ निरुत्थलौहस्य परीक्षामाह सर्वमित्यादि ।—मित्रपञ्चकैरिति वक्ष्यमाणमित्रपञ्चकैः ॥ १५० ॥

मित्रपञ्चकमाह मधुसर्पिरित्यादि । मतान्तरपरीक्षामाह गोघृत-

कृष्णायः शोथशूलार्शःक्रिमिपाण्डुत्वशोषनुत्।
वयस्थं गुरु चक्षुष्यं सर्वमेदोऽनिलापहम्॥
आयुःप्रदाता बलवीर्य्यकर्त्ता रोगापहर्त्तामदनस्य कर्त्ता।
अयःसमानं न हि किञ्चिदस्ति रसायनं श्रेष्ठतमं नराणाम्॥
कुष्माण्डं तिलतैलञ्च रसोनं राजिकन्तथा।
मद्यमम्लरसञ्चैव त्यजेल्लौहस्य सेवकः॥
सामान्याद्द्विगुणं क्रौञ्चं कालिङ्गोऽष्टगुणस्ततः।
कलेः शतगुणं भद्रं भद्राद्वज्रं सहस्रधा।
वज्रात् शतगुणं पाण्डिनिरङ्गं दशभिर्गुणैः॥
ततः कोटिसहस्रैर्वा कान्तलौहं महागुणम्॥ १५२॥

इतिलौहमारणम्॥

मित्यादि। अत्र घृतं गन्धं लौहञ्च समभागम्। रसायने तु घृतमधु-शुण्ठाटङ्कणैः समं लौहं मर्द्दयित्वा वह्नौ धमेत् यदि पूर्ववत्संश्लिष्टं न भवति तदा योज्यं अन्यथा परित्याज्यमिति॥ १५१॥

मृतलौहस्य गुणमाह कृष्णेत्यादि।—कृष्णायः पाण्डिवज्रादि-व्यतिरिक्तं लौहम्। लौहसेवनकाले वर्ज्जनीयद्रव्याण्याह कुष्माण्ड-मित्यादि कुष्माण्डमित्युपलक्षणं। ककाराष्टकवर्जनाभिप्रायेन कुष्माण्ड-मित्युक्तं कृष्णायसो गुणं पूर्वमुक्तम्। इदानीं वज्रपाण्डादिगुणञ्चाह सामन्याद्द्विगुणमित्यादि॥ १५२॥

इति लौहाध्यायः।

ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके ।
तस्मात् सर्वत्र मण्डूरं रोगशान्त्यै प्रयोजयेत् ॥
शतोर्द्ध मुत्तमं किट्टं मध्यञ्चाशीति वार्षिकम् ।
अधमं षष्टिवर्षीयं ततोहीनं विषोपमम् ॥ १५३ ॥

दग्ध्वाक्षकाष्ठैर्मलमायसन्तु गोमूत्रनिर्वापितमष्टवारान् ।
विचूर्ण्य लीढं मधुना चिरेण कुम्भाह्वयं पाण्डुगदं निहन्ति ॥ १५४ ॥

किट्टाद्दशगुणं मुण्डं मुण्डात्तीक्ष्णं शताधिकम् ।
तीक्ष्णाल्लक्षगुणं कान्तं भक्षणात् कुरुते गुणम् ॥१५५॥

इति किट्टशोधनमारणम् ॥

—

अथ मण्डूरशोधनादिकमाह ये गुणा इति मृतलौहे ये गुणाः प्रोक्ताः मुण्डकिट्टे मण्डुरेऽपि ते गुणा वर्त्तन्ते । अत्र मुण्डं लौहोपलक्षितम् । यतो यल्लौहस्य यद्गुणं तदुत्थितमण्डुरेऽपि तद्गुणमिति । उक्तं हि यल्लौहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणमिति । यद्यन्मण्डूरं श्रेष्ठं यच्च हीनं तदाह शतोर्द्धमित्यादि शतोर्द्धं शतवर्षादूर्द्धम् ॥ १५३ ॥

इदानीं शोधनमाह दग्ध्वाक्षेत्यादि आयसं मलं मण्डूरं विभीतककाष्ठानलै र्दग्धव्यं यदाग्निवर्णं भवति तदा गोमूत्रे निर्वापयेदिति एवं सप्तवारं कृत्वा शोधयेदिति ॥ १५४ ॥

मण्डूरात् मुण्डादिलौहानां गुणविभेदमाह किट्टादित्यादि ॥१५५॥

—

नागैः सुवर्णं रजतञ्च ताप्यैर्गन्धेन ताम्रं शिलया च नागम्।
तालेन वङ्गं त्रिविधञ्च लोहं नारीपयोहन्ति च
हिङ्गुलेन ॥ १५६ ॥

इति स्वर्णादिशोधनमारणविधिः।

स्वेदयेद्दोलिकायन्त्रे जयन्त्याः स्वरसेन च।
मणिमुक्ताप्रवालानि यामैकेन च शोधयेत्॥ १५७ ॥
मुक्ताफलानि शुद्धानि खल्ले पिष्ट्वा पुटेल्लघु।
एवं भस्मत्वमाप्नोति वज्रकं काञ्जियोगतः॥
मतान्तरम्॥
कुमार्य्या तण्डुलीयेन तुल्येन च निषेचयेत्।
प्रत्येकं सप्तवारांश्च तप्ततप्तानि क्रमशः॥
मौक्तिकानिप्रवालानि तथा रत्नान्यशेषतः।
तृणादिविविधवर्णानि म्रियन्ते नात्रसंशयः॥ १५८ ॥

अथ स्वर्णादीनां साधारणमारणद्रव्यं समासत आह नागैरित्यादि नागैः सीसकैः ताप्यैः स्वर्णमाक्षिकैः शिलया मनःशिलया नारीपय इत्यस्य सर्वत्र सम्बन्धः॥ १५६ ॥

अथ मणिमुक्ताप्रवालादीनां साधारणशोधनमाह स्वेदयेदित्यादि॥ १५७ ॥

तेषां साधारणमारणमाह मुक्ताफलेति विशुद्धानि मुक्ताफलानि खल्ले पिष्ट्वा लघुपुटे पचेत्। वज्रकन्तु काञ्जिकसहितं पुटे पचेदिति। अथवा विविधानि मणिमुक्ताप्रवालानि सप्तवारान् तप्ततप्तानि कुमार्य्यादिस्वरसे प्रक्षेप्यानि॥ १५८ ॥

क्षीरदुग्धेन प्रवालञ्च भावयित्वा तु हण्डिके।
मध्येऽपि तक्रसहितं स्थापयेत् तां निरोधयेत्॥
तुल्लगर्भाग्निप्रतापेन म्रियते प्रहरद्वये॥ १५९॥

इतिप्रवालमारणम्॥

कुलत्थस्य पलशतं वारिद्रोणेन पाचयेत्।
तस्मिन् पादावशेषे च क्वाथेऽष्टौ मणयःशिलाः॥
आतपेत्रिदिनं शोध्याः क्वाथसिक्ताः पुनः पुनः।
शुध्यन्ति सर्वरत्नानि मणयश्च न संशयः। १६०।

इतिमुक्तादिशोधनमारणम्।

कृत्वा चणकसंस्थानं गोमूत्रैर्भावयेत्त्र्यहम्।
समटङ्कणसंपिष्टं मृतमित्युच्यते विषम्॥ १६१॥

विशेषमारणमाह क्षीरदुग्धेति। स्पष्टम्॥ १५९॥
कुलत्थेत्यादि। अष्टौ मणयःशिला इति अष्टौ मणयः मुक्तादयः शिला मनःशिला॥ १६०॥

अथ विषोपविषशोधनादिकमाह। विषं हि द्विविधं स्थावरजङ्गमभेदात्। मूलाद्यात्मकं स्थावरविषं दशविधम्। सर्पादिसम्भवं जङ्गमविषं षोड़शात्मकम्। मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सारं निर्य्यासो धातवः कन्दः स्थावरस्याश्रयादश। तत्र मूलविषं करवीरादि, पत्रविषं विषपत्रादि फलविषं कर्कोटकादि पुष्पविषं वेत्रादि त्वक्सारनिर्य्यास-

अथवा त्रैफले क्वाथे विषं शुध्यति पाचितम् ।
दोलायां त्रिफलाक्वाथे छागीक्षीरे च पाचितम् ॥ १६२ ॥
गोमूत्रपूर्णपात्रे च दोलायन्त्रे विषं पचेत् ।
दशतोलकमानेन चादौ वैद्यो दिवानिशम् ।

मतान्तरम् ॥

विषभागांश्चणकवत् स्थूलान् कृत्वा तु भाजने ।
तत्र गोमूत्रकं दत्वा प्रत्यहं नित्यनूतनम् ।

विषाणि करम्भादीनि क्षीरविषं स्नुह्यादि धातुविषं हरितालादि कन्दविषं वत्सनाभशृङ्गकादि तत्र कन्दजविषञ्चाष्टादशविधं यथा दार्विकं वत्सनाभञ्च सैकतं शृङ्गकं मुस्तकं सार्षपं कौर्म्मं शृङ्गी कालकूटं दर्दुरं हालाहलं यमदंष्ट्रा मेषशृङ्गी हारिद्रं कर्कटं रक्तशृङ्गी ग्रन्थिकं केशरञ्च कन्दजविषम् । तेषामाद्यञ्चाष्टविधविषं यौगिकम् । अन्यं दशविधञ्च विवर्जनीयमिति । जङ्गमविषस्य षोड़शाश्रयानाह दृष्टिनिश्वासदंष्ट्राश्च नखमूत्रमलानि च । शुक्रं लालामुखं स्पर्शः संदंशस्त्रावमर्द्दितम् । गुदास्थिपित्तशूकाणि दशषट् जङ्गमाश्रयाः । दृष्टिनिश्वासविषाः दिव्याः सर्पाः । दंष्ट्राविषाः भौमाः सर्पाः । नखविषाः व्याघ्रादयः । मूत्रपुरीषविषाः क्षुद्रगोधिकादयः । शुक्रविषाः मूषिकादयः । लालाविषाः उच्चिटङ्गादयः । लालास्पर्शमूत्रपुरीषार्त्तवशुक्रमुखसंदंशदंष्ट्रास्पर्शावमर्द्दितगुदपुरीषविषास्त्रिशीर्षादयः । अस्थिविषाः सर्पादयः । पित्तविषाः नकुलमत्स्यादयः । शूकविषाः भ्रमरादयः । एषां स्थावरोपलक्षितं यौगिकमष्टविधकन्दविषं यदुक्तं तेषां शोधनादिकमाह ।—कृत्वा चणकेति चणकसंस्थानं चणकसदृशम् । गोमूत्रैर्भावयेदिति गोमूत्रैर्दोलायन्त्रे स्वेदयेदिति ॥ १६१ ॥

अथवेत्यादौ—पाचितमित्यत्र त्र्यहमिति शेषः । एवं क्षीरे च पाचितमित्ति ॥ १६२ ॥

शोषयेत्त्रिदिनादूर्द्धं दत्वातीव्रातपे ततः।
प्रयोगेषु प्रयुञ्जीत भागमानेन तद्‌विषम्॥

इतिविषशुद्धिः॥

अर्कसेहुण्डधूस्तूरलाङ्गुलीकरवीरकाः।
गुञ्जाहिफेणावित्येताः सप्तोपविषजातयः।
धूस्तूरस्य च यद्बीजमन्यच्चोपविषञ्च यत्॥
तच्छोध्यं दोलिकायन्त्रे चीरपूर्णेऽथ पावके १६३।

इत्युपविषशुद्धिः॥

निस्तुषं जयपालञ्च द्विधा कृत्वा विचक्षणः।
एतद्बीजस्य मध्यन्तु पत्रवत् परिवर्जयेत्॥
अष्टमांशेन चूर्णेन टङ्कणस्य च मेलयेत्।
कोष्ठयन्त्रे च तद्भाव्यं पाच्यं दुग्धेन संप्लुतम्।
त्रिरात्रं शुद्धिमायाति जैपालममृतोपमम्॥ १६४॥ *

इतिजैपालशुद्धिः।

अथोपविषमाह अर्कत्यादि।—उपविषा गौणविषाः। अर्कादयश्च स्थावरविषान्तर्भुता एव। तेषां शोधनमाह धूस्तूरस्येति॥ १६३॥

अथ फलविषाणामन्तरे जैपालशोधनमाह निस्तुषमित्यादि।—तुषरहितं जैपालं द्विधाकृत्यमध्यस्थं पत्रवद्द्रव्यं परित्यज्य नूतनग

---

* मलकार्थैः कुमार्य्याश्च जैपालवीजशोधनं इन्द्रवारुणिकाकार्थे राजवृक्षस्य वीजकं समूलोत्तरवारुण्याधूस्तूरवीजशोधनम्। धात्रीफलरसेनैव पलाशवीजशोधनमित्यातिरिक्तपाठः।

चिञ्चापत्ररसे कर्षं वस्त्रपूते पलद्वयम् ।
स्नुहीक्षीरं रौद्रयन्त्रे भावयेत् यत्नतः सुधीः ।
द्रवे शुष्के समुत्तार्य्य सर्वयोगेषु योजयेत् ॥ १६५ ॥

इति स्नुहीक्षीरशुद्धिः ॥

———

चिरन्तनं जलौकान्तु ताम्रपात्रेषु रक्षयेत् ।
चतुर्माषं निशाचूर्णं जलाष्टकपलेक्षिपेत् ।
तस्मिन् क्षिपेत् जलौकान्तां स्वयं लालां परित्यजेत् ।
त्यक्तलाला जलौका च सायोज्या रक्तमोक्षणे ॥
रोमपृष्ठा च कपिला रक्तरेखा च दुर्बला ।
वर्जनीया विशेषेण भिषजा कीर्त्तिमिच्छता । १६६

इति जलौकाशोधनम् ॥

———

वीजमादौ समादाय रौद्रयन्त्रे विशोषयेत् ॥
ईषत् सैन्धवयुक्तेन द्रवेण यत्नतः सुधीः ।

रावोपरि घर्षणीयं यावन्निःस्नेहतां व्रजेत् ततोष्टमांशटङ्कनेन सह मिश्रीकृत्य कोष्ठयन्त्रेषु भाव्यं दुग्धेन च पाच्यमिति ॥ १६४ ॥

———

क्षीरविषाणां मध्ये स्नुहीक्षीरशोधनमाह चिञ्चापत्रेति ॥ १६५ ॥

अथ जलौकाशोधनमाह चिरन्तनमित्यादि वर्जनीयजलौकामाह रोमपृष्ठेति ॥ १६६ ॥

———

अपामार्गस्य वा तोयैर्वाद्धक्यं वीजशोधनम्॥

मतान्तरम्

वृद्धदारकवीजन्तु पक्वं दोलाकृतं पचेत्।
दुग्धपूर्णेषु पात्रेषु ततः शुध्यति निश्चितं॥ १६७॥

——

अपामार्गकषायेण निम्बवीजं विशोधयेत्।
शिग्रुकार्पासवीजानि अपामार्गस्य वीजकम्॥
घर्म्मेण शोधनन्तेषां न दद्यात् सैन्धवन्ततः।
तिक्ता कोषातकी दन्ती पटोली चेन्द्रवारुणी।
कटुतुम्बी देवदाली काकतुण्डी च शोधयेत्।
धात्रीफलरसेनैव महाकालस्य शोधनम्।
करञ्जयुग्मयोर्वीजं भृङ्गराजेन शोधयेत्।
गुञ्जादिसर्ववीजानां नरमूत्रैः पटुं विना।
नारिकेलाम्बुना शोध्यं विल्वं भल्लातकोद्भवम्॥
गुडुचीत्रिफलाक्काथे चीरेचैव विशेषतः।
पक्वा च खण्डशः शुद्धं स्त्रीयानन्दगुग्गुलुम्॥ १६८॥

इतिविषोपविषशोधनम्॥

——

वृद्धदारकशोधनमाह वीजमित्यादि।—वार्द्धक्यवीजमिति वृद्धदारकवीजम्॥ १६७॥

——

अन्येषां वीजानां साधारणशोधनमाह अपमार्गेति सप्तम्॥ १६८॥

क्षीराब्धेरुत्थितं देवं पीतवस्त्रं चतुर्भुजम्।
वन्दे धन्वन्तरिं भक्त्या नानागदनिसूदनम्॥ १॥ *
प्रायशो वपुषः शुद्धिं कृत्वा देयं तदौषधम्।
अतः पूर्वं चिकित्सानां रेचकौषधमुच्यते॥ २॥
तुल्यं टङ्कनपारदं समरिचं तुल्यांशकं गन्धकम्।

द्रव्यादीनां शोधनाद्यनन्तरं धर्म्मार्थकाममोक्षानां मूलस्यारोग्यस्य श्रेयसोजीवितस्यचापहन्तॄणां रोगानामुपशमनार्थमिदानीं चिकित्साध्यायः। शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं प्रारिप्सिताध्यायसमाप्तिफलकं तत्प्रतिबन्धकविघ्नध्वंसमात्रफलकं वा स्वयं कृतमादिदेवधन्वन्तरिनमस्कारं शिष्यशिक्षार्थं प्राक्प्राबोधयित्। अथवा धन्वन्तरिनामोत्कीर्त्तनमेव सर्वरोगनिवारकत्वात् गरीयस्त्वाच्च नमस्कारपूर्वं तन्नाम आदौ निबध्नाति क्षीराब्धेत्यादि।-क्षीराब्धेरुत्थितः क्षीरसमुद्रमन्थनाद्रत्नैः सह उत्थितः स च धन्वन्तरिः विष्णोरवतारविशेषः व्याधिपीड़ितानां देवानां रोगनिरासार्थं प्रजाहितार्थञ्चानुकम्पया प्रकाशितः देवमित्यादिदेवम्। नानागदनिसूदनमिति चिकित्सया किम्वा तन्नामश्रवणादेव व्याध्ययोदूरादेव पलायन्ते शरीरशोधनानन्तरमौषधं प्रदेयमाशुकारित्वादत आह प्रायश इत्यादि॥ २॥

तुल्येति प्रत्येकमेकभागतुल्यं विश्वा च द्विगुणा तत इति विश्वाया

---

* धर्म्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमं रोगास्तस्यापहन्तारः श्रेयसो जीवितस्य च। तेषां प्रशमनोपायमतिविस्तारतः स्मृतं आयुर्वेदविधिस्तेषां रोगानां परिनाशकः तेऽपि वैद्यादृते नास्ति तस्मात् वैद्यो हि जीवितम्। विकारनामाऽकुशलो न जिह्रीयात् कथञ्चन न हि सर्वविकाराणां नामतोऽस्ति ध्रुवास्थितिः। क्वचिदर्थः क्वचित् धर्म क्वचित् मैत्री क्वचित् यशः। विद्याभ्यासः क्वचिच्चापि चिकित्सा नास्ति निष्फला इत्यतिरिक्त पाठः।

विश्वा च द्विगुणा ततो नवगुणं जैपालचूर्णं क्षिपेत् ॥
गुञ्जैकप्रमितो रसो हिमजलैः संसेवितो रेचयेत्।
यावन्नोष्णजलं पिवेदपिवरं पथ्यञ्च दध्योदनम् ॥

इच्छाभेदीरसः ॥ ३ ॥

जैपालाष्टौ द्विकोगन्धस्त्रोशुण्ठी मरिचं द्विकम्।
एकः सूतः सोहगैका गुञ्जामाला वटीकृता
शूलव्याधिप्रभृतयः कुष्ठैकादशपित्तजाः।
भगन्दरादिहृद्रोगाः सर्वे नश्यन्ति भक्षणात् ॥

इच्छाभेदीरसः ॥ ४ ॥

रसवलिगगनार्कं शुद्धतालं विषञ्च।
त्रिफलात्रिकटुमेतत् टङ्कणं भृङ्गमेभिः ॥
सममिहजयपालोद्भूतचूर्णं विमर्द्य।
द्विनिशमनिशमेतद्भृङ्गराजोत्थवारा ॥
भवति गदमुरारिः स्वेच्छया भेदकोयम्।
हरति सकलरोगान् सन्निपातानशेषान् ॥
इह हि भवति पथ्यं मत्स्यमांसादि सर्वम्।
घृतविलुलितमस्मिन् भोजनं भूरि देयम्।

गदमुरारिरिच्छाभेदी ॥ ५ ॥

एकभागापेक्षया द्वैगुण्यं एवं जैपालचूर्णस्यापि नवगुणत्वं हिमजलैरिति शिशिरजलैः ॥ २ ॥

जैपालेति जैपालस्याष्टौ भागा। तथा गन्धकस्यापि द्वौ भागौ एवं शुण्ठीमरिचादीनां यथोक्तं भागं ग्राह्यम् ॥ ४ ॥

गदमुरारिरसे वलिर्गन्धकं गगनमभ्रं अर्कस्ताम्रम्। सममिहेति।

अभयाचूर्णमादाय नूतनैर्जयपालकैः।
पञ्चमांशेन मिलितैः स्नुहीदुग्धेन मर्दिताः॥
गुड़िकास्तस्याः कर्त्तव्या वर्त्तुलाश्चणकप्रभाः।
एकैकस्यास्य टङ्कस्य रेचनैश्च रसैस्तदा॥
रुक्मिशोन च दाहः स्यान्न च मूर्च्छाभ्रमः क्लमः।
वेगतः सारयेदेषा विशेषादामनाशिनी॥
निरूहेन तथानेव तथा विन्दुघृतेन च।
त्रिवृतान तथा रेच्या यथा स्याद् गुड़िकोत्तमा॥
अतिशुद्धं भवेद्देऽमतिप्रवलमुत्तमम्।
अतिरूपमति प्रौढ़मत्यायुस्करमुत्तमम्॥
विष्टम्भे गुड़िका देया चोदरेदारुणामये।
अधोदेशेषु सर्वेषु गुदेषु च महौषधिः॥
दीयते चीयते सामः कामकायविवर्द्धनः।

रुक्मिशोरसः॥ ६॥

पारदं गन्धकं कुर्य्यात् सौभाग्यं पिप्पलीसमम्।
समानि जयपालानि क्रियन्ते रेचनाय च॥
शीतेन रेचयेत् सम्यगुष्णेनैव प्रशाम्यति।

इच्छाभेदी गुड़िका॥ ७॥

*जैपालचर्णस्य सर्वचूर्णसमत्वं ज्ञेयं एतत् सर्वमेकीकृत्य भृङ्गराजोत्थरसैः निरन्तरं दिनद्वयं घर्षणीयम्॥ ५॥

अभयेत्यादौ पञ्चमांशेन मिलितैरिति हरीतकीचूर्णात् पञ्चमांशैः मिलितै र्जयपालकैः॥ ६॥

शुण्ठीमरिचसंयुक्तं रसगन्धकटङ्गणम् ।
जैपालास्त्रिगुणाःप्रोक्ताः सर्वमेकत्रचूर्णयेत् ॥
इच्छाभेदी द्विगुञ्जः स्यात् सितया सह दापयेत् ।
यावन्तश्चुलुकाः पीतास्तावद्वारान् विरेचयेत् ॥
तक्रोदनं खादितव्यमिच्छाभेदी यथेच्छया ।

इच्छाभेदीरसः ॥ ८ ॥

देवदाली स्वर्णपुष्पं गुडेन वटकीकृतम् ।
गुदमध्ये प्रदेयैषा पातयेच्च महागदम् ॥
अधश्च साममायाति पुनः सादीयते गुदे ।
प्रक्षाल्य वारिणाचैषा वारंवारं प्रयच्छति ॥
अनेन क्रमयोगेन मलसामं विरेचनम् ।
जायते सकलं देहं शुद्धवर्णं निरामयम् ॥

पुष्परेचनीगुड़िका ॥ ९ ॥

शुद्धसूतञ्च गन्धञ्च विषञ्च जयपालकम् ।
कटुत्रयञ्च त्रिफला टङ्गणञ्च समांशकम् ॥
अस्य मात्रा प्रयोक्तव्या गुञ्जात्रयसमा ततः ।

इच्छाभेदी गुड़िकायां सौभाग्यं टङ्गणक्षारं समानि जयपालानीति सर्वैस्तुल्यं जैपालचूर्णमित्यर्थः । शीतेनेति शीताचारेण ॥ ७ ॥

इच्छाभेदीरसे जैपालास्त्रिगुणेति एकभागापेक्षया जैपालचूर्णं त्रैगुण्यमित्यर्थः ॥ ८ ॥

पुष्परेचनीगुड़िकायां देवदाली हस्तिघोषकः स्वर्णपुष्पं आरग्वधः तस्य फलमज्जा ग्राह्या । गुड़ेन गुड़िकेति मिलितचूर्णाद् गुड़स्य द्वैगुण्यम् ॥ ९ ॥

सर्वेषु ज्वररोगेषु सामवाते विशेषतः॥
नाशयेत् श्वासकासञ्च अग्निमान्द्यं विशेषतः।
ब्रह्मणा निर्म्मितः पूर्वं रसः सर्वाङ्गसुन्दरः॥

सर्वाङ्गसुन्दरोरसः।

बालवृद्धक्षतक्षीणभीनसार्त्तभयार्द्दिताः।
रूक्षशोषतृषायुक्ता गर्भिणी च नवज्वरी॥
अधो गच्छति यस्यासृक् सूतिकातङ्कपीड़िता।
नैते विरेकयोग्याः स्युरन्येषाञ्च बलाबलम्॥
नवज्वरे च ये योगाः भेदकाः परिकीर्त्तिताः।
ते तथैव प्रयोक्तव्या वीक्ष्यदेहमलादिकम्॥

इतिविरेकाधिकारः॥ १०॥

थथ ज्वरचिकित्सा।

क्रमेण वृद्धान् रसगन्धहिङ्गुलान्
नैकुम्भवीजान्यथदन्तीवारिणा।
पिष्टास्य गुञ्जाभिनवज्वरापहा

निषिद्धविरेचकानाह बालवृद्धेति बालस्य सुकुमारत्वात्, वृद्धस्य क्षीणधातुत्वात्, क्षतस्य क्षीणप्रायत्वात्, भीतस्य व्याकुलमनस्त्वात्, रूक्षस्यविरेचनं ग्रहणीदूषकत्वात् शोषिणःपुरीषस्योपस्तम्भकत्वात् तृष्णार्त्तस्य रोगवर्द्धकत्वात्, नवज्वरेऽविपक्वदोषनिर्हरनैर्भेरवणप्रवृत्तात् एवं सर्वत्र निषिद्धम्॥ १०॥

जलेन चार्द्रासितया प्रयोजिता ॥

नवज्वराङ्कुशः ॥ १ ॥

तुल्यांशं मर्दयेत् खल्ले पिप्पलीं हिङ्गुलं विषम्।
द्विगुञ्जा मधुना देया वातज्वरनिवर्त्तये ॥

हिङ्गुलेश्वरः ॥ २ ॥

भवेत् समं सूतसमुद्रफेण
हिङ्गुलगन्धं परिमर्द्य यत्नात्।
नवज्वरे वल्लमितं विषस्र
मार्द्राम्बुनायं ज्वरधूमकेतुः ॥

ज्वरधूमकेतुः ॥ ३ ॥

अव्यक्तः सिद्धिदःशुद्धो रोगघ्नः कीर्त्तिवर्द्धनः।
यशःप्रदः शिवःसाचात् मृत्युञ्जयरसःस्मृतः ॥
विषस्यैकं तथाभागं मरिचं पिप्पलीकणा।
गन्धकस्य तथाभागं भागं स्याट्टङ्गणस्य च ॥
सर्वंत्र समभागं स्याद्धिङ्गुलन्तु द्विभागिकम्।
चूर्णयेत् खल्लमध्ये तु मुद्गमानां वटीश्चरेत् ॥

सर्वरोगप्राधान्यात् प्रथमं ज्वरचिकित्सामाह क्रमेणेत्यादि। नैकुम्भबीजानि दन्तीबीजानि। दन्तीवारिणेति भाव्यद्रव्यसमं काथ्यं काथ्यादष्टगुणं जलमित्यादिपरिभाषयादन्तीकाथं ग्राह्यं तेन काथेन पिष्ट्वा सप्तधा भावना कार्य्या ॥ १ ॥

हिङ्गुलेश्वरे वातज्वरेति वातप्रधानज्वर इत्यर्थः ॥ २ ॥

धूमकेतुरसे सूतादिद्रव्यचतुष्टयं समं समभागम्। परिमर्द्य त्रिवृत्त्वमिति आर्द्रकरसेन त्रिदिनं परिमर्द्य धूमकेतुर्भवेदित्यर्थः ॥ ३ ॥

जम्बीरस्य रसेनात्र कार्य्यं हिङ्गुलशोधनम्।
रससेत् समभागं स्याद्धिङ्गुलं नेष्यते तदा॥
गोमूत्रशोधितञ्चात्र विषं सौरविशोधितम्।
मृत्युरूपं ज्वरं हन्ति मृत्युञ्जयरसः स्मृतः॥
मृत्युर्विनिर्जितो यस्मात्तेन मृत्युञ्जयो रसः।
मधुना लेहनं प्रोक्तं सर्वज्वरनिवृत्तये॥
दध्योदकानुपानेन वातज्वरनिवर्हणः।
आर्द्रकस्य रसैः पानं दारुणे सान्निपातिके॥
जम्बीरद्रवयोगेन अजीर्णज्वरनाशनः।
अजाजीगुड़संयुक्ता विषमज्वरनाशिनी॥
तीव्रज्वरे महाघोरे पुरुषे यौवनान्विते।
पूर्णमात्रा प्रदातव्या पूर्णं वटीचतुष्टयम्।
स्त्रीवालवृद्धक्षीणेषु अर्द्धमात्रा प्रकीर्त्तिता।
अतिवृद्धे च क्षीणे च शिशौ चाल्पवयस्यपि॥
तूर्य्यमात्रा प्रदातव्या व्यवस्था सारनिश्चिता।
नवज्वरे महाघोरे यामैकान्नाशयेद्ध्रुवम्॥
मध्यज्वरे तथाजीर्णे त्रिरात्रान्नाशयेद्ध्रुवम्।
समाहात् सन्निपातोत्थं ज्वराजीर्णकसंज्ञकम्॥
मृत्युञ्जयो रसः॥ ४॥

मृत्युञ्जयरसे पिप्पलीकणेति षष्टिसमासः नतु कणाजीरकम्। यदाह सोमेश्वरः विषस्यैकं तथाभागं पिप्पल्या मरिचस्य च। गन्धकस्य तथाभागं भागं स्याट्टङ्गणस्य च। सर्वत्रसमभागं स्याद्धिङ्गुलस्तु हिम-गिरुमित्यादि॥ ४॥

विषं त्रिकटुकं मुस्तं हरिद्रा निम्बपत्रकम्।
विड़ङ्गमष्टमं चूर्णं छागमूत्रैः समं समम्॥
चणकाभा वटीकार्य्या स्याज्जया योगवाहिका।

जयावटी॥

विषं पाठाश्वगन्धा च वचा तालीशपत्रकम्।
मरिचं पिप्पली निम्बमजामूत्रेण तुल्यकम्॥
वटिका पूर्ववत् कार्य्या जयन्ती योगवाहिका।

जयन्तीवटिका॥

जयन्ती च जयावाथ चौरैः पित्तज्वरापहा।
मुद्गामलकयूषेण पथ्यं देयं घृतं विना॥
जयन्ती वाजया वाथ सचौद्रमरिचान्विता।
सन्निपातज्वरं हन्ति रसश्चानन्दभैरवः॥
जयन्ती विजया वाथ विषमज्वरनुत् घृतैः।
सर्वज्वरं मधुव्योषैः गवां मूत्रेण शीतकम्॥
चन्दनस्य कषायेन रक्तपित्तज्वरापहा।
जयन्ती वा जयावाथ माचिकेन च कासजित्॥
जयन्ती वा जयाचौरैः पाण्डुशोथविनाशिनी।
जयन्ती वा जयावाथ तण्डुलोदकपानतः।
अश्मरी हन्ति नोचित्रं मूत्रकृच्छ्रन्तु दारुणम्।
जयान्तीम्वा जयाम्वाथ गोमूत्रेण युतां पिवेत्॥
हन्त्याशु काकणं कुष्ठं सुलेपेन च तद्द्रुतम्।
द्विनिष्कं केतकीमूलं पिष्ट्वा तोयेन पातयेत्।
जयन्ती वा जयावाथ मेहं हन्ति सुराह्वयम्।
जयन्ती वा जयावाथ मधुना मेहजिद्भवेत्॥

लोध्रमुस्ताभयातुल्यं कट्फलञ्च जलैः सह।
क्काथयित्वा पिबेच्चानु मधुना सर्वमेहजित्॥
जयन्ती वा जयावाथ गुडैः कोष्णजलैः पिबेत्।
त्रिदोषोत्थं हरेद्गुल्मं रसोवानन्दभैरवः॥
जयन्ति वा जया हन्ति शुण्ठ्या सर्व्वं भगन्दरम्।
जयन्ती वा जयावाथ तक्रेण ग्रहणीं प्रणुत्॥
जयन्ती वा जयावाथ रसश्चानन्दभैरवः।
रक्तपित्ते त्रिदोषोत्थे शीततोयेन पाययेत्।
जयन्ती वा जयावाथ भृङ्गद्रावैर्निशान्धनुत्।
जयन्ती वा जयावाथ घृष्ट्वा स्तन्येन चाञ्जयेत्।
स्रावणं सर्वदोषोत्थं मांसवृद्धिञ्च नाशयेत्॥

जयाजयन्तीवटी॥ ५॥

भस्म षोड़शनिष्कं स्यादारन्योपलकोद्भवम्।
निष्कत्रयञ्च मरिचं विषनिष्कञ्च चूर्णयेत्॥
अयं भस्मेश्वरो नाम सन्निपातनिकृन्तनः।
पञ्चगुञ्जामितं खादेदार्द्रकस्य रसेन तु भस्मेश्वरः।
ताम्रभस्मविषं हेम्नः शतधा भावितं रसैः।
गुञ्जार्द्धं सन्निपातादिनवज्वरहरं परम्॥
आर्द्राम्बुशर्करासिन्धुयुतः स्वच्छन्दभैरवः।
इक्षुद्राक्षासिताश्चापि दधिपथ्यं रुचौ ददेत्॥

स्वच्छन्दभैरवोरसः॥ ६॥

जयावटिकायां जयन्तीमूलचूर्णं तुल्यांशं देयं योगवाहिकत्वेन एवं जयन्तीवटिकायामपि॥ ५॥

हिङ्गुलञ्च विषं व्योषं टङ्कणं नागराभया।
जयपालसमायुक्तं सद्योज्वरविनाशनम्॥

ज्वरमुरारिरसः॥ ७॥

सगन्धटङ्कं रसतालकञ्च विमर्द्दयेद्भावयेन्मीनपित्तैः।
दिनद्वयं वल्लमितं प्रदद्यादद्धन्नाकतक्रौदनमेव पथ्यम्॥
नवज्वरेभाङ्कुशनामधेयः क्षणेन घर्मोद्गममातनोति।

नवज्वरेभाङ्कुशः॥

सूतार्कगन्धचपलाजयपालतिक्ता
पथ्या त्रिवृच्च विषतिन्दुकजं समांशम्।
संमर्द्द्य वह्निपयसा मधुनाद्विगुञ्जः,
त्रैलोक्यडुम्बररसोऽभिनवज्वरघ्नः॥

त्रैलोक्यडुम्बूररसः॥ ८॥

विषहिङ्गुलजैपालटङ्कणं क्रमवर्द्धितम्।
रसः प्रतापमार्त्तण्डः सद्योज्वरविनाशनः॥

प्रतापमार्त्तण्डोरसः॥

जैपालगन्धं विष पारदञ्च, तुल्यं कुमारी
स्वरसेन पिष्टम्।
अस्य द्विगुञ्जा हि शीतोदकेन ख्यातोरसोऽयं
तरुणज्वरारिः॥

स्वच्छन्दभैरवरसे हेम्न इति धूस्तूरस्य॥ ६॥

ज्वरमुरारिरसे सर्वचूर्णसमं जयपालचूर्णं सर्वं पिष्ट्वा कलायप्रमाणा वटीकार्य्या॥ ७॥

त्रैलोक्यडम्बुररसे अर्कस्ताम्रं, चपला, पिप्पली, तिक्ता, कटुकी, विषतिन्दुकजं, मधुरतेन्दुकफलम्॥ ८॥

दातव्य एषोऽहनि पञ्चमे वा षष्ठेऽथवा सप्तम एव वापि।
जाते विरेके विजितोज्वरः स्यात् पटोल
मुद्गाम्बु निषेवणेन॥

तरुणज्वरारिरसः॥ ९॥

रसबलिशिललौहव्योषताम्राणि तुल्यान्यथ
सदरदनागं भागमेतत् प्रदिष्टम्।
भवति गदमुरारिश्चास्य गुञ्जाद्वयं वै चपयति
दिवसेन प्रौढ़मामज्वराख्यम्॥

गदमुरारिः॥ १०॥

रसो गन्धस्ताम्रं त्रिकटुकटुकीटङ्कणवरा
त्रिवृद्दन्ती हेमद्युमणि विषमेतत् सममिदम्।
समस्तै स्तुल्यं स्याद्विमलजयपालोद्भवरजः
ततः स्नुक्चीरेण प्रचुरमृदितं दन्तिसलिलैः
द्विगुञ्जास्य प्रौढ़ं जयति वटिकासाममतुलं
ज्वरं पाण्डुं गुल्मं ग्रहणीगुदकीलोद्भवरुजः
मरुत्शूलाजीर्णं प्रबलमथसामं क्रिमिगदं
विबद्धं प्लीहानं प्रबलमपि विद्याधररसः॥

विद्याधररसः॥ ११॥

तरुणज्वरारिरसे तुल्यमिति सर्वं समभागं नतु स्वरसेन तुल्यम्॥ ९॥
गदमुरारिरसे शिला मनःशिला, कान्दकत्वाद्गूह्वः। नाग
सीसकम्॥ १०॥

विद्याधररसे—वरा, त्रिफला, हेम, धूस्तूरवीजं, द्युमणिः अर्क-
मूलं, विमलजयपालोद्भवरज इति शोधितजयपालवीजचूर्णम्॥ ११॥

हिङ्गुलं मरिचं टङ्कं पिप्पलीविषमेवच ।
जातीकोषं समं सर्वं जम्बीराद्भिर्विमर्द्दितम् ॥
गुञ्जाद्वयं त्रयं वापि देयञ्च सान्निपातिके ।
कासश्वासौ जयत्याशु सर्वज्वरविनाशनः ॥

अमृतमञ्जरी ॥

सूतं गन्धं विषं तुल्यं धूर्त्तवीजं त्रिभिः समम् ।
चतुर्णां द्विगुणं व्योषचूर्णं गुञ्जाद्वयं हितम् ॥
जम्बीरस्य च मज्जाभिरार्द्रकस्य रसैर्युतम् ।
महाज्वराङ्कुशो नाम ज्वराष्टकनिसूदनः ॥
ऐकाहिकं द्व्याहिकं वा त्र्याहिकञ्च चतुर्थकम् ।
विषमञ्च त्रिदोषोत्थं हन्ति सर्वं न संशयः ॥

महाज्वराङ्कुशः ॥ १२ ॥

शुद्धसूतं विषं व्योषं गन्धं त्रिफलमेव च ।
जयपालं समं कुर्य्याद्भृङ्गतोयेन मर्द्दयेत् ॥
वटिकां गुञ्जमात्रान्तु कृत्वा वैद्यः प्रयत्नतः ।
प्रमाणं सर्षपाकारं बालानाञ्च प्रशस्यते ॥
नारिकेलाम्बुनावापि सर्वज्वरविनाशिनी ।
नारिकेलजलं शस्तं कर्षत्रयं पिबेदनु ॥
सितया च समं पीत्वापित्तज्वरविनाशिनी ।
मरिचेन च पीतासा सन्निपातज्वरं जयेत् ॥
पिप्पलीजिरकाभ्यान्तु दाहज्वरविनाशिनी ।

महाज्वराङ्कुशे व्योषचूर्णमिति मिलितत्रिकटुचूर्णं सर्व्वापेक्षया द्विगुणम् ॥ १२ ॥

विषमज्वरभूतोत्थं ज्वरं प्लीहानमेव च ॥
अग्निमान्द्यमजीर्णञ्च श्वयथुञ्च सुदारुणम्।
शूलाजीर्णं तथागुल्मं कुष्ठाष्टादश पित्तजान् ॥
ज्वरकेशरिकाख्याता तरुणज्वरनाशिनी।
ज्वरकेशरिका ॥ १३ ॥

शुद्धसूतं तथागन्धं लौहं ताम्रञ्च सीसकम्।
मरिचं पिप्पलींविश्वं समभागं विचूर्णयेत् ॥
अर्द्धभागं विषं दद्यात् मर्द्दयेद्वासरद्वयम्।
शृङ्गवेरानुपानेन दद्यात् गुञ्जाद्वयं भिषक् ॥
नवज्वरे महाघोरे वातसंग्रहणी गदे।
नवज्वरेभसिंहोऽयं सर्वरोगे प्रयोजयेत्
नवज्वरेभसिंहः ॥ १४ ॥

अथ निरामज्वरे।

सूतोगन्धष्टङ्कणः सोषणः स्यादेतैस्तुल्या शर्करा मत्स्यपित्तैः ॥
भूयो भूयो भावयेत्तु त्रिरात्रं वल्लोदेयःशृङ्गवेरस्य वारा ॥
सम्यक् तापे वारिभक्तं सतक्रं वृन्ताकाद्यं पथ्यमेव प्रदिष्टं।
अङ्गरोगं हन्ति सामं प्रभावात् पित्ताधिक्ये
मूर्द्ध्निवारि प्रयोगः ॥
उदकमञ्जुरीरसः ॥ १५ ॥

ज्वरकेशरिकायां त्रैफलामिति त्रिफलाचूर्णम् ॥ १३ ॥
नवज्वरेभसिंहे विश्वं शुण्ठीचूर्णम् ॥ १४ ॥

अत्र शर्करास्थाने मनः शिलायां चन्द्रशेखरोभवति।

चन्द्रशेखरो रसः॥

रसोगन्धष्टङ्कणः सोषणोयं फणी पिप्पलीत्येषधूस्तूरपिष्टः

जयेत् सन्निपातं द्विगुञ्जानुपानं भवेदर्क

मूलाम्बुसव्योषचूर्णम्॥

पञ्चवक्त्रं रसम्॥ १६

शुद्धसूतं द्विधागन्धं मर्द्यं भृङ्गरसेन च।

मृतं ताम्रं लौहभस्म पादांशेन तयोःक्षिपेत्॥

लौहपात्रे च विपचेत् चालयेत् लौहचाटुना।

तत् क्षिपेत् कदलीपत्रे गोमयोपरिसंस्थिते॥

पश्चात् संचूर्णयेत् खल्ले निर्गुण्ड्याभावयेद्दिनम्।

जयन्ती त्रिफला कण्या वासाभार्गीकटुत्रिकैः॥

भृङ्गाग्निमूलं मुण्डिभिः भावयेद्दिनसप्तकम्।

अङ्गारैः स्वेदयेत् किञ्चित् पर्पटाख्यो महारसः॥

चतुर्गुञ्जामितं भक्ष्यं सम्यक् श्लेषज्वरं जयेत्।

पथ्याशुण्ठ्यमृताक्काथमनुपानं प्रयोजयेत्॥

पर्पटीरसः॥ १७

मृतसूताभ्रमुस्तार्कतीक्ष्णमाक्षिकतालकम्।

गन्धकं मर्दयेत्तुल्यं यष्टीद्राक्षामृतारसैः॥

उदकमञ्जरीरसे—अथवा मरिचं शर्कराविषं तच्च सर्वद्रव्यसमम्। त्रिरालमिति चतुर्विंशतिप्रहरपर्यन्तं, हन्ताको वार्त्ताकुफलम्॥ १५॥

पञ्चवक्त्ररसे धूस्तूरपिष्ट इति धूस्तूररसैः पिष्टः॥ १६॥

पर्पटीरसे तयोरिति रसगन्धकयोः॥ १७॥

धात्रीशतावरीद्रावैः द्रवैः क्षीरविदारिजैः।
दिनं दिनं विभाव्याथ सितक्षौद्रयुतावटी।
माषमात्रं निहन्त्याशु वातपित्तज्वरं क्षयम्।
दाहं तृषां भ्रमं शोषं वातपित्तान्तको रसः।
सिताक्षीरं पिबेच्चानु यष्टीक्वाथसितायुतम्॥

वातपित्तान्तकोरसः॥ १८॥

मृतसूतार्कतीक्ष्णञ्च तालं गन्धञ्च कट्फलम्।
मेषशृङ्गीवचाशुण्ठीभार्गी पथ्या च वालकम्॥
धान्यकं मर्दयेत्तुल्यं पर्पटोत्थद्रवैर्दिनम्।
मद्यं माषं लिहेत् क्षौद्रैः कफपित्तमदात्तये॥
रसो विश्वेश्वरो नाम प्रक्तो नागार्जुनेन च।
काकमाचीरसं चानु सैन्धवेन युतं पिबेत्॥

विश्वेश्वररसः।

पारदं गन्धकं शुद्धं टङ्कणञ्च समं समम्।
पारदाद्द्विगुणं देयं जैपालं तुषवर्जितम्॥
सैन्धवं मरिचं चिञ्चात्वग्भस्मशर्करापि च।
प्रत्येकं सूतकं तुल्यं जम्बीरैर्मर्दयेद्दिनम्॥
द्विगुञ्ज स्तप्ततोयेन वातश्लेष्मज्वरापहः।
रसःशीतारीनामायं शीतज्वरहरः परः॥

शीतारीरसः॥ १९॥

वातपित्तान्तकरसे तीक्ष्णं लौहं, तालं हरितालम्॥ १८॥
शीतारिरसे शर्करा विषम्॥ १९॥

रसविषगन्धकटङ्कणताम्रयवक्षारकम्।
व्योषं तालकफलत्रयञ्च चौद्रैः शतं वारान्॥
संमर्द्दयेत्त्रिमितवटिका कार्य्या भिषग्भिः प्राज्ञैः।
शुण्ठीपिष्टेन सममेकां द्वेवाथवातिस्रः संप्राश्य॥
नारिकेलजलमनुपेयं सेवयेत् सैन्धवम्।
जीरं तक्रपथ्यं प्रयोक्तव्यं
प्रशमयति सन्निपातज्वरम्,॥
तथा जीर्णज्वरं विविधञ्च॥
प्लीहानं चाध्मानकं कासं श्वासं वह्निमान्द्यञ्च।
चिन्तामणिरसोयं किलस्वयं भैरवेन निर्द्दिष्टः

चिन्तामणिरसः॥२०॥

रसं गन्धं विषं लौहं धूर्त्तबीजन्तु तत् समम्॥
द्वौ भागौ ताम्रवह्निञ्च व्योषचूर्णञ्च तत् समम्।
जम्बीरस्य च मज्जाभिरार्द्रकस्य रसैर्युतम्।
अस्यानुपानेन वटीं ज्वरे देयं प्रयत्नतः॥
गुञ्जाद्वयं वटीं खादेत् सद्योज्वरं व्यपोहति।
वातिकं पैत्तिकञ्चापि श्लैष्मिकं सान्निपातिकम्॥
ऐकाहिकं द्व्याहिकञ्च चातुर्थकविपर्य्ययम्।
असाध्यञ्चापि साध्यञ्च ज्वरञ्चैवातिदुस्तरम्॥
अग्निमान्द्येऽप्यजीर्णे च आध्मानेऽनिलसम्भवे।
अतिसारे छर्द्दिते च अरोचकनिपीड़िते॥

चिन्तामणिरसे व्योषं त्रिकटुकं, फलत्रयं त्रिफला॥२०॥

ज्वरान् सर्वान् निहन्त्याशु भास्करस्तिमिरं यथा ।
चिन्तामणिरसो नामसर्वज्वरं व्यपोहति ॥

चिन्तामणिरसः ॥ २१ ॥

अथ सन्निपातज्वरे ।

शुद्धसूतं मृतं ताम्रं मृतं नागं मनःशिला ।
तुल्यकं तस्य तुल्यांशं दिनमेकं विमर्द्दयेत् ॥
द्रवैर्धौत्तरवारुण्याश्वणमालावटीकृता ।
सन्निपातं निहन्त्याशु नस्यमात्रेण दारुणम् ॥
एषा कुलवधूर्नाम जले घृष्ट्वा प्रयोजयेत् ।

कुलवधूः ॥ २२ ॥

भस्मसूताभ्रकं तारं मुण्डतीक्ष्णालमाक्षिकम् ।
वङ्गटङ्कणकव्योषं समं संमर्द्दयेद्दिनम् ॥
पाठा निर्गुण्डिकाषष्टी विल्वमूलकषायकैः ।
ततो मूषागतं रुद्धा विपचेत् भूधरे पुटे ॥
माषैकं दशमूलस्य कषायेण प्रयोजयेत् ।
अञ्जनेनाथवा नस्यात् सन्निपातं जयेद्ध्रुवम् ॥

जयमङ्गलः ॥ २३ ॥

चिन्तामणिरसे—भूर्त्तवीजन्तुतत्सममिति मिलितसर्वचूर्णसमम् । धूस्तूरवीजम् ॥ २१ ॥

कुलवध्वां—तस्य तुल्यांशमित्येकभागतुल्यम् । यद्यपि नस्यमित्युक्तं तथाप्यत्राञ्जनेन व्यवहरन्ति वृद्धाः ॥ २२ ॥

जयमङ्गले वङ्गस्थितकः ॥ २३ ॥

मृतसूतार्कतीक्ष्णाग्निं टङ्कणं खर्परं समम् ।
सव्योषमर्कदुग्धेन दिनं सं मर्द्दयेद्दृढम् ॥
अर्कक्षीरयुतं नस्यं सन्निपातहरं परम् ।

नस्यभैरवः ॥

सूततीक्ष्णकणागन्धमेकांशं जयपालकम् ।
सर्वैस्त्रिगुणितं जम्बुवारिणा च सुपेषितम् ॥
नेत्राञ्जनेन हन्त्याशु सर्वोपद्रवमुद्धतम् ।

अञ्जनभैरवः ॥ २४ ॥

गन्धेशं लशुनाम्भोभिर्मर्द्दयेद्यामकमात्रकम् ।
तस्योदकेन संयुक्तं नस्यं तत्प्रतिबोधकृत् ॥
मरिचेन समायुक्तं हन्ति तन्द्रो प्रलापकान् ।

अञ्जनोरसः ॥ २५ ॥

वाह्लीकं रसकं तुल्यं कर्पूरं मृतशुल्वकम् ।
कासमर्द्दरसैर्मर्द्यं दिनार्द्धं वटकीकृतम् ।
अञ्जनं ज्वरदाहघ्नं सर्वदोषसमुद्भवम् ।

अञ्जनोरसः ॥ २६ ॥

रसगन्धकयोर्माषौ प्रत्येकं कज्जलीकृतौ ।
शक्रश्च मुषलीश्चैव धूस्तूरकेशराजकम् ॥

अञ्जनभैरवे एकांशमिति प्रत्येकमेकांशम् ॥ २४ ॥
अञ्जनरसे देयः मारदः ॥ २५ ॥
अञ्जनरसे वाह्लिकं हिङ्गु, रसकं स्फटिकारीति लोके ।
कासमर्द्दः कालकासन्दा इति ख्याता क्षुपविशेषः ॥ २६ ॥

देवदाली जयन्ती च तथा मण्डूकपर्णिका।
एषां पत्ररसैः शाणैः शिलायां खल्लयेत् पुनः॥
शोषयित्वा वटी कार्य्यास्तिनेका राजिकोपमा।
त्रिदोषजं ज्वरं हन्ति तथा प्रबलकोष्ठकम्॥
तस्मै तु नारिकेलस्य जलं देयं प्रयत्नतः।
तदावटी न कार्य्या तु तदाखाद्येतु रत्तिका॥
त्रैलोक्यसुन्दरोनाम सन्निपातहरो रसः।

त्रैलोक्यसुन्दरः॥ २७॥

रसगन्धकयोः शाणं प्रत्येकं कज्जलीकृतम्।
सुवर्णमाक्षिकं शाणं शुद्धमेकत्र कारयेत्॥
रुद्रजटा निशुन्दा च नागदामलकी तथा।
विषकण्टालिका चैषां स्वरसं शाणमात्रकम्॥
दत्वा संशोध्य संमर्द्य कार्य्या मुद्गसमा वटी।
आर्द्रकस्य रसैः पेया जीरकञ्चानुभक्षयेत्॥
स्वच्छन्दोभैरवाख्यायं सन्निपातोग्रहृन्मतः।
ग्रहणीसूतिकातङ्कं नाशयेदविचारतः॥

स्वच्छन्दभैरवः॥ २८॥

त्रैलोक्यसुन्दरोरसे शक्रः, कुटजः, भूषली इत्यत्र सुषरीति केचित् पठन्ति तत्तु न सम्यक्व्यवहारसिद्धम्। देवदाली, हस्तिघोषकः॥ २७॥

स्वच्छन्दभैरवरसे नागदा, हरीतकी, विषकण्टालिका, विषकाटो-लीतिख्याता॥ २८॥

अथ शीताङ्गसन्निपातलक्षणम्।

शीतं शरीरं शीताङ्गे छर्द्यतिसारकम्पनम्।
क्षुद्विघातोऽङ्गमर्दश्च हिक्काश्वासभ्रमोऽरतिः।
सर्वाङ्गशिथिलत्वञ्च सन्निपाते प्रजायते॥ २९॥
हिङ्गुलञ्च विषं व्योषं मरिचं टङ्कणं कणा।
जातीकोषसमं चूर्णं जम्बीरद्रवमर्दितम्॥
रक्तिमानां वटीं कुर्य्यात् खादेदार्द्रकसंयुताम्।
वटीद्वयं त्रयं वापि सन्निपाते सुदारुणे॥
ज्वरमष्टविधं हन्ति तथातिसारनाशनः।
जीर्णज्वरहरश्चैव तथा सर्वाङ्गभेदकः॥
आमवातादिरोगञ्च नाशयेदविकल्पतः।

आनन्दभैरवः॥ ३०॥

विषं त्रिकटुकं गन्धं टङ्कणं मृतशुल्वकम्।
धूस्तूरस्य च बीजानि हिङ्गुलं नवमं स्मृतम्॥
एतानि समभागानि दिनैकं विजयाद्रवैः।
मर्द्दयेत् चणकाभान्तु वटीञ्चानन्दभैरवीम्॥
भक्षयेच्च पिवेच्चानु वरिमूलकषायकम्।
सव्योषं हन्तिनोचिरं सन्निपातं सुदारुणम्॥

आनन्दभैरवीवटिकायां शीताङ्गसन्निपातइत्युक्तं किन्तु रोगविनिश्चयसंग्रहे शीताङ्गसन्निपातलक्षणं नोक्तं तस्मादत्रतल्लक्षणमाह शीतं शरीरमित्यादि॥ २९॥

आनन्दभैरवरसे व्योषं त्रिकटुकं अत्र पिप्पल्याभागद्वयं व्योषमध्ये पठितत्वात् पृथगुपादानाच्च एवं मरिचस्यापि॥ ३०॥

शीताङ्गे सन्निपाते वा सामान्ये वा त्रिदोषजे।
धन्याकं पिप्पली शुण्ठी कट्की कण्टकारिका॥
क्वाथं पिप्पलीसंयुक्तं चतुर्गुञ्जा च पर्पटी।
सन्निपातज्वरं हन्ति वटिकानन्दभैरवी॥
मूलञ्च कटुरोहिण्याः समं विल्वं सजीरकम्।
दध्नापिष्टं पिवेच्चानु वटिकानन्दभैरवी॥
सन्निपातातिसारघ्नी पथ्यं शाकविवर्ज्जितम्।
आनन्दभैरवीं पीत्वा क्वाथं वरुणसम्भवम्॥
पाययेदश्मरीं हन्ति सप्तरात्रान्नसंशयः।
वागुजीसम्भवैस्तैलैर्वटीञ्चानन्दभैरवीम्॥
लेहयेन्निष्कमात्रान्तु गलत्कुष्ठञ्च नाशयेत्।
दधिमस्तुसिताक्षौद्रैः वटीञ्चानन्दभैरवीम्॥
भक्षयेन्मूत्रकृच्छ्रार्त्तो यवक्षारं सितान्वितम्।
गोदुग्धं क्वथितञ्चानु शीतलं मधुना पिवेत्॥
गुञ्जामूलं पिवेत्क्षीरैरनुपानं प्रशस्यते।
अनेन चानुपानेन वटिकानन्दभैरवी॥
देया रुद्रजटाक्षौद्रैः सर्वमेहप्रशान्तये।

आनन्दभैरवी॥ २१॥

शुद्धसूतं तथा गन्धं सूतार्द्धं विषसंयुतम्।*

आनन्दभैरवीवटीकायां विजया जयन्ती, त्रैलोक्यविजयेति केचित्। रविमूलकषायकं अर्कमूलक्वाथः कटुरोहिण्यामूलं कटुकीमूलम्। वागुजी हाकुचीति ख्याता सोमवाजीति केचित्। रुद्रजटेति स्वनामख्याता॥ २१॥

* सूताभ्रं विषसंयुतमिति भैषज्यरत्नावली।

समस्तं मर्द्दयेत्तालमूलीनीरैस्त्र्यहं बुधः॥
पूरयेत् कूपिकान्ते च सन्निरोध्य विशोषयेत्।
सप्तभि मृत्तिकावस्त्रैर्वेष्टयित्वा तु शोषयेत्॥
पुटेत् कुम्भीप्रमाणेन स्वाङ्गशीतं समुद्धरेत्।
गृहीत्वा कूपिकामध्यान्मर्द्दयेच्च दिनन्ततः॥
अजाजीजीरकं हिङ्गुसर्जिकाटङ्गणैर्युतम्।
गुग्गुलुः पञ्चलवणं यवक्षारो यमानिका॥
मरिचं पिप्पलीचैव प्रत्यकञ्च समांशतः।
एषां कषायेण पुन र्भावयेत् सप्तधातपे॥
नागवल्लीदलयुतं पञ्चगुञ्जं रसेश्वरम्।
दद्यान्नवज्वरे तीव्रे कोष्णं वारि पिवेदनु॥
प्राणेश्वररसो नाम्ना सन्निपातप्रकोपजित्।
शीतज्वरे दाहपूर्वे गुल्मे शूले त्रिदोषजे॥
वाञ्छितं भोजनं दद्यात् कुर्य्याच्चन्दनलेपनम्।
तावदेव प्रशमनो नानातिसारनाशनः॥
भवेच्च नात्रसन्देहः स्वास्थ्यञ्च लभते नरः।

प्राणेश्वरः॥ ३२॥

ताम्रं गन्धं रसं श्वेतगुञ्जा मरिच पूतना।
समीनपित्तजैपालान् तुल्यानेकत्रमर्द्दयेत्॥
गुञ्जाचतुष्टयञ्चास्य नवज्वरहरं परम्।

प्राणेश्वररसे कूपिकामिति काचकूपिकां, प्रत्यकञ्च, समांशत इति अजाद्यादिद्रव्यं प्रत्येकं सूततुल्यम्॥ ३२॥

ज्वराङ्कुशः सन्निपातभैरवोऽयं प्रकाशितः ।

सन्निपातभैरवः ॥ ३३ ॥

रसो हिङ्गुल गन्धश्च जैपालं सम्मितं त्रिभिः ।
दन्तीक्वाथेन संमर्द्य रसो ज्वरहरः परः ॥
आर्द्रकस्य रसेनैव दापयेद्रक्तिकाद्वयम् ।
नवज्वरं महाघोरं नाशयेद् याममात्रतः ॥
शर्करादधिभक्तञ्च पथ्यं देयं प्रयत्नतः ।
शीततोयं पिबेच्चानु इक्षुसुं इरसोहितः ॥
शीतभञ्जीरसो नाम सर्वज्वरकुलान्तकः ।

शीतभञ्जीरसः ॥ ३४ ॥

रसं गन्धञ्च तुल्यांशं धूस्तूरफलजैर्द्रवैः ।
मर्द्दयेद्दिनमेकन्तु तुल्यं त्रिकटुकं क्षिपेत् ॥
उन्मत्ताख्यो रसो नाम नस्यःस्यात् सन्निपातजित् ।
सन्निपातार्णवे मग्नं योऽभ्युपैति च रोगिनम् ॥ *
कस्तेन न कृतो धर्म्मःकाचपूजां न सोऽर्हति ।

उन्मत्तरसः ॥ ३५ ॥

म्लेच्छस्य भागाश्चत्वारो जैपालस्य त्रयोमताः ।†
द्वौ भागौ टङ्कणस्यैव भागैकममृतस्य च ॥

सन्निपातभैरवे पूतना हरीतकी, मीनपित्तं मत्स्यपित्तम् ॥ ३३ ॥
शीतभञ्जीरसनाहरस इत्यादि । रसादिगन्धान्तैस्त्रिभिस्तुल्यं जैपालं रसादित्रयाणां त्रयोभागाः ॥ ३४ ॥
उन्मत्तरसे तुल्यं त्रिकटुकमिति त्रिकटुचूर्णं प्रत्येकं रसतुल्यं प्रदातव्यम् ३५

* योऽभ्युद्धरति रोगिनं इति पाठान्तरम् । † हिङ्गुलभागाश्चत्वार इति भैषज्यरत्नावली तत्तु न सम्यक् ताम्रेणैव व्यवहारः ।

तत्सर्वं मर्द्दयेत् श्लक्ष्णं शुष्कं यामं भिषग्वरः ।
शृङ्गवेराम्बुना देयं व्योषचित्रकसैन्धवैः ॥*
माषद्वयमितन्तापं हरत्येव विनिश्चयः ।
घनसारेण सारेण चन्दनेन विलेपनम् ॥
विदध्यात् कांस्यपात्रे च सेचयेद्रोगिनं भिषक् ।
शाल्यन्नं तक्रसहितं भोजयेदिक्षुसंयुतम् ॥
सन्निपाते महाघोरे त्रिदोषे विषमज्वरे ।
आमवाते वातशूले गुल्मे प्लीह्नि जलोदरे ॥
शीतपूर्वं दाहपूर्वं विषमे सततज्वरे ।
अग्निमान्द्ये च वाते च प्रयोज्योऽयं रसेश्वरः ।
मृतसञ्जीवनो नाम विख्यातोऽयं रसायने ।

मृतसञ्जीवनीरसः ॥ ३६ ॥

शुद्धताम्रस्य भागैकं मरिचस्य तथैव च ॥
विषं तत्तुल्यकं दद्यात् तत्सर्वं श्लक्ष्णचूर्णितम् ।
लाङ्गलीरससंयुक्तं तत् सर्वं पुटके पचेत् ॥
रक्तिकाद्वितयं वापि त्रितयं वा प्रकल्पयेत् ॥
दोषे व्योषसमायुक्तस्त्रिदोषशमनो भवेत् ।
भक्षयेत् पवने चोग्रे वड़वानलसञ्ज्ञितम् ॥

स्वल्पवड़वानलरसः ॥ ३७ ॥

मृतसञ्जीवनरसमाह शुद्धस्येत्यादि शुद्धस्य ताम्रस्य अमृतस्य, विषस्य, घनसारेण कर्पूरेण, सारेणेति चन्दनेन सह सम्बन्धः ॥ ३६ ॥

---

* व्योषत्रिकटु हरितकी आमलकी वहेडेति द्रव्यत्रयम् ।

सूतकं गन्धकञ्चैव हरितालं मनःशिला।
अभ्रकं वत्सनाभञ्च दारुजङ्गमजं विषम्॥
जैपालात् सार्द्धशतकं सर्वं संचूर्ण्य मर्द्दयेत्।
मात्स्यमाहिषमायूरच्छागपित्तैर्विभावयेत।
वटिकां शीततोयेन कुर्य्यात् गुञ्जाप्रमानतः।
वड़वानलनामायं नारिकेलजलेन वै॥
भक्षयेत् सन्निपातार्त्तो मृत्युस्तस्यामुखो भवेत्।

बृहद्वड़वानलोरसः॥ ३८॥

रसगन्धकनागञ्च विषं स्थावरजङ्गमम्।
मात्स्यवाराहमायूरच्छागपित्तैर्विभावयेत्॥
सूचिकाभरणो नाम भैरवेण प्रकीर्त्तितः।
सूचिकाग्रेण दातव्यः सन्निपातनिवर्हनः॥

सूचिकाभरणोरसः॥ ३९॥

शम्भोःकण्ठविभूषणं समरिचं दैत्येन्द्र रक्तं रविः।
पक्षौ सागरलोचनं शशियुगं भागोर्कसङ्ख्यान्वितः॥
खल्ले तत्परिमर्द्दितं रविजलैर्गुञ्जैकमात्रं ददेत्।
सिंहोऽयं ज्वरदन्तिदर्पदलनः पञ्चाननाख्यो रसः॥

पञ्चाननरसः॥ ४०॥

खल्ववड़वानलरसे विषं तत्तुल्यकमितेएकभागसमं विषम्। लाङ्गलीविषलाङ्गलीति ख्याता॥ ३७॥

बृहद्वड़वानलरसे वत्सनाभं स्वनामख्यातमूलविषं, जङ्गमविषं कालसर्पविषं, दारुदारुमूषं, जैपालात्सार्द्धशतकमिति च्याकृतिमानात्॥ ३८॥

सूचिकाभरणोरसे विषं स्थावरजङ्गममिति स्थावरविषं जङ्गमविषञ्च। पेयोऽयमार्द्रकरसेन॥ ३९॥

रसेन गन्धं द्विगुणं क्रमात्तुरसैर्विमर्द्द्याष्टदिनानि घर्मे।
रसाष्टभागन्त्वमृतञ्च दद्यात् विमर्दयेत वह्निरसेन किञ्चित्॥
पित्ते तु सम्भावित एष देयः त्रिदोषनीहारविनाशसूर्य्यः।

त्रिदोषनीहाररसः॥ ४१॥

पलं शुद्धस्य सूतस्य पलं ताम्रमयस्तथा।
अभ्रं नागं पलं वङ्गं पलं गन्धकतालकम्॥
पलं शुद्धविषं चूर्णं सर्वमेकत्र कारयेत्।
मर्द्दयेत् काकमाचश्राश्च आर्द्रकस्य रसेन च॥
मात्स्यवाराहमायूरच्छागमाहिषपित्तकैः।
मर्द्दयेद्भिन्नभिन्नञ्च त्रिकटोरम्बुभिस्तथा॥
सिद्धोऽयं रसराजेन्द्रो धन्वन्तरिसुसंस्कृतः।
गुञ्जामात्रं रसं दद्यात् सुरसारससंयुतम्॥
मेघवारि प्रवाहेन धारितं वारि मस्तके।
अनिवारो यदा दाहस्तदा देया च शर्करा॥
भोजनं दधिसंयुक्तं वारमेकन्तु दापयेत्।
ईश्वरेण हतः कामः केशवेन च दानवः॥
पावकेन यथा शीतमनेन च तथाज्वरः।

रसराजेन्द्रः॥ ४२॥

* स्वानन्दरसे, शम्भोः कण्ठविभूषणं विषं दैत्येन्द्रो गन्धकः, रक्तं हिङ्गुलं, रविस्ताम्रं विषादीनां यथाक्रमं पञ्चावादिभागो बोध्यः। रविजलैः अर्कमूलरसैः॥ ४०॥

' त्रिदोषनीहाररसे क्रमात्तुचित्रकः, अमृतं विषं तच्च रसस्याष्टमांशम्॥ ४१॥

शुद्धसूतं द्विधागन्धं खल्वे तत् कज्जलीकृतम् ।
अभ्रलौहकयोर्भस्मताम्रभस्मसमं समम् ॥
विषं तालं वराटञ्च शिलाहिङ्गुलचित्रकान् ।
हस्तिशुण्डी चातिविषा त्रूषणं हेममाक्षिकम् ॥*
चूर्णं विमर्द्दयेद्द्रावैरार्द्रकस्य दिनत्रयम् ।
निर्गुण्डी विजयाद्द्रावैस्त्रिदिनं मर्द्दयेत् पुनः ॥
काचकूप्यां निवेश्याथ वालुकायन्त्रगे पचेत् ।
द्वियामान्ते समुद्धृत्य मर्द्दयेदार्द्रकैर्द्रवैः ॥
मृतसञ्जीवनो नाम रसोऽयं शङ्करोदितः ।
मृतोपि सन्निपातार्त्तो जीवत्येव न संशयः ॥

मृतसञ्जीवनोरसः ॥ ४३ ॥

कण्टकारी सिन्धुवारस्तथा नाटकरञ्जकम् ।
अमीषां रसमादाय कृत्वा खर्परखण्डके ॥
प्रक्षिप्य गन्धकं तत्र ज्वालां मृद्वग्निना ददेत् ।
गन्धके स्नेहतापन्ने पारदं तत्समं क्षिपेत् ॥
मिश्रीकृत्य ततो द्वाभ्यां द्रवं तमवतारयेत् ।
आमर्द्दयेत्तथा तन्तु यथा स्यात् कज्जलप्रभम् ।

रसराजेन्द्ररसे अयो लौहम् । तच्च पलं पाद्यं एवं गन्धकं तालकमपि प्रत्येकं पलं त्रिकटोरम्बुभिस्त्रिकटुककाथैः सुरसातुलसी ॥ ४२ ॥

मृतसञ्जीवनरसे समं सममिति अभ्रादीनां प्रत्येकं गन्धकसममित्यर्थः । द्वियामान्ते समुद्धृत्येति वालुकायन्त्रं प्रहरद्वयं पक्त्वा ततः कूपिकायाः समाकृष्य पुनरार्द्रकद्रवैः संमर्द्य वटिकाकार्य्येत्यर्थः ॥ ४३ ॥

---

* त्रूषणं त्रिकटु ।

ततस्तु रक्तिकामस्य जीरकस्य च माषकम् ॥
माषैकं लवणस्यापि पर्णे कृत्वा प्रदापयेत्।
ज्वरे त्रिदोषजे घोरे जलमुष्णं पिवेदनु ॥
छर्द्द्यां शर्करया दद्यात् शामे दद्यात्तथा गुड़म्।
क्षये च छागदुग्धं स्यादनुपानं प्रयोजितम् ॥
रक्तातिसारे कुटजमूलवल्कलजं रसम्।
रक्तवान्तौ तथा दाद्यादुडुम्बरभवं रसम् ॥
सर्वव्याधिहरश्चायं गन्धकः कज्जलीकृतः।
आयुर्वृद्धिकरश्चायं मृतञ्चापि प्रवोधयेत् ॥

गन्धककज्जलीविधिः ॥ ४४ ॥

ये रसाः पित्तसंयुक्ताः प्रोक्ताः सर्वत्र शम्भुना।
जलसेकावगाहैश्च वलिनस्ते तु नान्यथा ॥
यथा लाभेन पित्तेन वसाः सर्वे भवन्ति हि।
रसं गन्धं विषञ्चैव मरिचालं समांशिकम् ॥
शिलायां मर्द्दयेत्तावद्यावज्जायेत कज्जलम्।
गुञ्जामात्रं प्रयोक्तव्यं हरेद्वादशसंज्ञकम्।
साध्यासाध्यं निहन्त्याशु सन्निपातं सुदारुणम्।
दन्तपङ्क्तिर्दृढ़ा यस्य लोचने भ्रान्ततारके।
चलिते चेन्द्रियग्रामे वेतालं विनियोजयेत्।

गन्धकज्जलीमाह कण्टकारीत्यादि कण्टकार्य्यादीनां स्वरसं खर्परे कृत्वा तत्र गन्धकं निःक्षिप्य ज्वलन्वदराङ्गारोपरि स्थापयेत् द्रवीभूते गन्धके तत्तुल्यं पारदं निक्षिप्य द्रवं मिश्रितमालोक्य अवतार्य्य कज्जलीकृत्य च पर्णादिभिः सह भक्षयेत् ॥ ४४ ॥

स्नानेषु लिप्तदेहेषु मोहयस्तेषु देहिषु ॥
दातुमर्हति वेतालो यमदूतनिवारकः ॥

वेतालीरसः ॥ ४५ ॥

शुद्धसूतं समं गन्धं मरिचं टङ्गणन्तथा।
चतुस्तुल्या शिलायोज्या मत्स्यपित्तेन भावयेत्।
त्रिदिनं मर्द्दयेत्तेन रसोऽयं चन्द्रशेखरः ॥
द्विगुञ्जमार्द्रकद्रावैर्देयं शीतोदकं पुनः ॥
तक्रभक्तञ्च वृन्ताकं भिषक् तत्र प्रयोजयेत्।
त्रिदिनात् श्लेषपित्तोत्थमतुग्रञ्च नाशयेज्ज्वरम्।

चन्द्रशेखरः।

हिङ्गुलञ्च विषं टङ्गं जातीकोषफलन्तथा। *
मरिचं पिप्पलीचैव कस्तूरी च समं समम् ॥
रक्तिद्वयं ततः खादेत् सन्निपाते सुदारुणे ॥

कस्तूरीभैरवः ॥

मृतं वङ्गं खर्परञ्च स्वर्णं कस्तूती तारकम्।
एतेषां समभागेन कर्षमिकं पृथक् पृथक् ॥
सूतं कान्तं पलं देयं हेमसारं द्विकार्षिकम् ॥
रसभस्मलवङ्गञ्च जातिकाफलमेव च।

वेतालरसे चालं हरितालम्। चलिते चेन्द्रियग्राम इति स्वविषय-ग्रहणाशक्ते इन्द्रियसमूहे ॥ ४५ ॥

* जातीकोषफलं जैयत्री जातीफलञ्च।

वच्यमाणौषधैर्भाव्यं प्रत्येकं दिनसप्तकम् ॥
द्रोणपुष्परसैर्वापि नागवल्लयारसेन च ।
द्विचन्द्रौ त्रिकटुर्देयो यत्नतो वटिकाचरेत् ॥
वातात्मके सन्निपाते महाश्लेष्मगदेषु च ।
त्रिदोषजनिते घोरे सन्निपाते सुदारुणे ॥
नष्टगर्भे नष्टशुक्रे प्रमेहे विषमज्वरे ।
कासे श्वासे चये गुल्मे महाशोथे महागदे ॥
स्त्रीणां शतं गच्छति च न च शुक्रचयो भवेत् ।
एतान् सर्वान् निहन्त्याशु भास्करस्तिमिरं यथा ॥

बृहत्कस्तूरीभैरवः ॥ ४६ ॥

मृगमद शशि सूर्या धातकी शूकशिम्बी,
कनक रजत मुक्ता विद्रुमो लौह पाठाः ।
क्रिमिरिपुघनविश्वातोयतालाभ्रधात्री,
रविदलरसपिष्टः कस्तूरी भैरवोऽयम् ॥
कस्तूरीभैरवः ख्यातः सर्वज्वरविनाशनः ।
आर्द्रकस्य रसैः पेयो विषमज्वरनाशनः ॥
द्वन्द्वजं भौतिकान् वापि ज्वरान् कामादिसम्भवान् ।
अभिचारकृतांश्चैव तथा शुक्रकृतान् पुनः ॥

बृहत्कस्तूरीभैरवे तारकं रौप्यं हेमसारं स्वर्णमाक्षिकं द्विचन्द्रमिति कर्पूरं द्विकर्षमित्यर्थः । एवं त्रिकटुचूर्णाख्यपि । तानि कर्पूरत्रिकटुचूर्णानि भावनानन्तरं देयानि । महाश्लेष्मगदेति स्थाने तुल्यने ॥ ४६ ॥

निहन्याद्भक्षणादेव डाकिन्यादियुतां स्तथा।

बृहत्कस्तूरीभैरवः ॥ ४७ ॥

सौभाग्यामृतजीरपञ्चलवणव्योषाभयाचामला
निश्चन्द्राभ्रकशुद्धगन्धकरसानेकीकृतान् भावयेत्॥
निर्गुण्डीयुगभृङ्गराजक वृषापाकार्गपत्रोल्लसत्।
प्रत्येक स्वरसेन सिद्धगुड़िका हन्ति त्रिदोषोदयम्।
निद्राघोरतरा समस्तकरणव्यामोहमुग्धं मनः।
शूलश्वासवलासकाससहितं मूर्च्छारुचिष्टट् ज्वरम्॥
तेषां वै परिहृत्य मृत्युवदनात् प्रत्यानयेत् जीवनम्।

सौभाग्यवटी ॥ ४८ ॥

पारदं गन्धकं टङ्कं सोषणं गजपिप्पली।
व्योषञ्च धूस्तूरजलैः पिष्टं गुञ्जाद्वयं द्रुतम्॥
सन्निपातं निहन्त्यर्ककषायैर्व्योषचूर्णितैः।

सन्निपातहरः ॥ ४९ ॥

रसाष्टकोऽमृतं सप्तस्यात् षष्ठोगन्धतालयोः।

अपरबृहत्कस्तुरीभैरवे मृगमदः कस्तुरी शशीकर्पूरं सूर्य्यंस्ताम्रं क्रिमिरिपुर्विड़ङ्गं घनं मुस्तकं तोयं वालकं तालं हरितालं रविदल-रसः अर्कपत्ररसः ॥ ४७ ॥

सौभाग्यवटीमाह सौभाग्येत्यादि सौभाग्यं टङ्कणं अमृतं विषं, सौभाग्यादिसप्तद्रव्यानि समभागेन चैकीकृतानि लौहपात्रे पाषाण-पात्रे वा कृत्वा भावयेत्। युगभृङ्गराजः भृङ्गराजः केशराजश्च। सिद्धगुड़िकेति सिद्धफला गुड़िका ॥ ४८ ॥

सन्निपातहररसे धूस्तूरजलैः धूस्तूररसैः ॥ ४९ ॥

दन्तीबीजानि षट् भागाः पञ्चभागन्तु टङ्कणम् ॥
चत्वारि धूर्त्तबीजस्य व्योषस्य त्रितयो भवेत्।
एतानि वह्निमूलस्य क्वाथेन परिमर्द्दयेत्॥
आर्द्रकस्य रसेनाथ देयं गुञ्जाद्वयं हितम्।
वड़वानलसंज्ञोऽयं सन्निपातहरःपरः॥

सन्निपातवड़वानलो रसः॥

लौहपात्रगते गन्धे द्राविते तत्र निःक्षिपेत्।
शुद्धसूतं समं चाभ्रं भार्गीद्रावं तयोःसमम्।
निर्गुण्ड्याः पल्लवोत्थञ्च तुल्यं तुल्यं प्रदापयेत्।
पचेन्मृदग्निना तावद्यावत् शुष्कं द्रवं द्वयम्॥
विषपादयुतः सोऽयं सिंहनादरसोत्तमः।
गुञ्जामात्रः प्रदातव्यः सन्निपातज्वरान्तकः।
अनुपानं पिबेद्द्राग्लोकाथं पुष्करचूर्णितम्॥

सिंहनादरसः॥ ५०॥

रसेन गन्धं द्विगुणं विमर्द्य, तत्पादभागं रवितारहेम।
भस्मीकृतं योजयेन्मर्द्दयित्वा, दिनत्रयं वह्निरसेन घर्म्मे॥
विषञ्च दत्वार्द्धकला प्रमाणं मत्स्यादिपित्तैः परिभावयेच्च।
वल्लद्वयञ्चास्य ददीत वह्नि, कटूत्रयार्द्रद्रवसंप्रयुक्तम्॥
तैलेन चाभ्यञ्जनमेव कुर्य्यात् स्नानं जलेनापि च शीतलेन।

सिंहनादरसे भार्गीद्रावं तयोः समभिति रसगन्धकयोः समं भार्गीद्रावं निर्गुण्ड्याः स्वरसञ्च। विषपादमिति गन्धकापेक्षया चतुर्थांशम्॥ ५०॥

यावद्भवेद्दाहः सह शीतमस्य, मूत्रं पुरिषञ्च शरीरकम्पः।
पथ्यं यदीच्छा परिजायतेऽस्य, मरिचखण्डं दधिभक्तकञ्च।
स्वल्पं ददीताद्रकमतक्रशाकं,
दिनान्तरं स्नानविधिञ्च कुर्य्यात्॥

सन्निपातसूर्य्यः॥ ५१॥

अथाभिन्यासे॥

सूतगन्धकलौहानि रौप्यं संमर्द्दयेत्त्र्यहम्।
सूर्य्यावर्त्तश्च निर्गुण्डी तुलसी गिरिकर्णिका॥
अग्निवल्लाद्रकं वह्निं विजयाथ जया सह।
काकमाचौ रसैरेषां पञ्चपित्तैश्च भावयेत्॥
अन्धमूषागतं पश्चात् वालुकायन्त्रगं दिनम्।
विपचेच्चूर्णितं खादेन्माषैकं चाद्रकद्रवैः॥
निर्गुण्डीदलमूलानां कषायं सोषणं पिवेत्।
अभिन्यासं निहन्त्याशु रसः स्वच्छन्दनायकः॥
छागीदुग्धेन मुद्गं वा पथ्यमत्र प्रयोजयेत्।

स्वच्छन्दनायकः॥५२॥

मायूरमात्स्यवाराहछागमाहिषमेव च।
पञ्चपित्तमिदं देयं भावनासु च सर्वदा॥
शुद्धसूतः समोगन्धः दरदं शुद्धखर्परम्।

सन्निपातसूर्य्यें कृतपादभस्मेति मत्सीकृतं रवितारचूर्णेन प्रत्येकं मिलितरसगन्धकयोः पादभागम्॥ ५१॥

रसस्य द्विगुणौ देयौ मृततास्राम्लवेतसौ ॥
भृङ्गराजद्रवैर्भाव्यं प्रत्यहं भावना पृथक् ।
दातव्यं तच्चतुर्गुञ्जं मार्द्रकस्य रसैः सह ॥
सन्निपातं निहन्त्याशु सन्निपातान्तकोरसः ।

सन्निपातान्तको रसः ॥ ५३ ॥

अथ जीर्णं विषमज्वरे ॥

यःस्यादनियतात् कालाच्छीतोष्णाभ्यां तथैवच ।
वेगतश्चापि विषमः स ज्वरो विषमः स्मृतः ॥

इति विषमज्वरलक्षणम् ।

त्रिसप्ताहव्यतीतस्तु ज्वरोयस्तनुतां गतः ।
प्लिहाग्निसादं कुरुते स जीर्णज्वर उच्यते ॥
रसस्य द्विगुणं गन्धं गन्धतुल्यञ्च टङ्कणम् ।
रसतुल्यं विषं योज्यं मरिचं पञ्चधा विषात् ॥
कटफलं दन्तीवीजञ्च प्रत्येकं मरिचोन्मितम् ।
ज्वराङ्कुशो रसो नाम मर्द्दयेद्यामयमात्रकम् ॥
माषैकेन निहन्त्याशु ज्वरं जीर्णं त्रिदोषजम् ।

ज्वराङ्कुशोरसः ॥

अथाभिन्यासज्वरचिकित्सामाह मृतेत्यादि ॥ ५२ ॥
सन्निपातान्तकरसे मिलितौ ताम्राम्लवेतसौ रसस्य द्विगुणौ देयौ ॥ ५३ ॥

अभ्रं ताम्रं रसं गन्धं विषञ्चैव समं समम्। *
द्विगुणं धूर्त्तबीजञ्च व्योषं पञ्चगुणं मतम्॥
आर्द्रकस्य रसेनैव वटीकार्य्या द्विगुञ्जिका।
अनुपानं प्रयोक्तव्यं यथा दोषानुसारतः॥
अभ्रं ज्वरारिनामेदं सर्वज्वरविनाशनम्।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्॥
विषमाख्यान् ज्वरान् सर्वान् धातुस्थान् विषमज्वरान्।
प्लीहानं यकृतं गुल्ममग्रमांसं सशोथकम्॥
हिक्कां श्वासञ्च कासञ्च मन्दानलमरोचकम्।
नाशयेन्नात्रसन्देहो वृक्षमिन्द्राशनिर्यथा॥

ज्वरारि अभ्रम्॥ ५४॥

रसं गन्धं सैन्धवञ्च विषं ताम्रं समांशिकम्।
सर्वचूर्णसमं लौहं तत्समं शुद्धमभ्रकम्॥
लौहे च लौहदण्डे च निर्गुण्डीस्वरसेन च।
मर्द्दयेत् यत्नतः पश्चान्मरिचं सूततुल्यकम्॥
नागवल्यादलेनैव दातव्यो रक्तिसम्मितः।
सर्वज्वरहरः श्रेष्ठो ज्वरान् हन्ति सुदारुणान्॥
कासं श्वासं महाघोरं विषमाख्यं ज्वरं वमिम्।

ज्वरारि अभ्रे द्विगुणं धूर्त्तबीजमिति एकभागापेक्षया द्विगुणं एवं व्योषमप्येकभागापेक्षया पञ्चगुणम्॥ ५४॥

* ताम्रासद्भावे ताम्रस्थाने टङ्कं ग्राह्यमित्युपदेशः।

धातुस्थं परमं दाहं ज्वरं दोषत्रयोद्भवम् ॥

ज्वराशनिरसः।

रसगन्धौ समौ शुद्धौ विषं ग्राह्यञ्च तत्समम्।
जैपालं तत्समं ग्राह्यं मरिचञ्च चतुर्गुणम् ॥
त्रिफलाया रसैर्मर्द्यं भावना पञ्चधा तथा।
जम्बीराणां द्रवैर्नस्य मेकस्मिन्नासिकापुटे ॥
शरीरार्द्धगतं घोरं ज्वरं हन्ति न संशयः।
अर्द्धनारीश्वरो नाम रसः शम्भुप्रकीर्त्तितः ॥

अर्द्धनारीश्वरोरसः ॥ ५५ ॥

रक्तचन्दनह्रीवेरपाठोशीरकणा शिवा *
नागरोत्पलधात्रीभिस्त्रिमदेन समन्वितम् ॥
लौहं निहन्ति विविधान् समस्तान् विषमज्वरान्। †

चन्दनादिलौहम् ॥ ५६ ॥

शुद्धसूतं द्विधागन्धं विषञ्चैव कटुत्रयम्।

अर्द्धनारीश्वररसे विषं ग्राह्यञ्च तत्समिति मिलितरसगन्धकयोः समम्। जैपालं तत्समिति विषतुल्यं जैपालं देयम्। मरिचञ्च चतुर्गुणमित्येकभागापेक्षया मरिचस्य चातुर्गुण्यमिति श्रीकण्ठः। शोमेश्वरस्तु मिलितरसगन्धकापेक्षया चतुर्गुणमित्याह व्यवहारोऽप्यनेनैव ॥५५॥

चन्दनादिलौहे लौहं सर्व्वचूर्णसमं लौहप्रधानयोगत्वात् जीर्णज्वरहरत्वाच्च ॥ ५६ ॥

---

* ह्रीवेरः वालकं वाला इति ख्यातं उशीरः वीरणमूलं विडङ्ग चित्रकमुस्ताश्च त्रिमदं परिकीर्त्तितम्।

† लौहं निहन्ति पत्नीभिरिति वा पाठः पत्नीभिः कुलजपत्नैरित्यर्थः।

नागभस्म शिलाचैव प्रत्येकं कर्षमानकम् ॥
शुद्धतालार्द्धकर्षञ्च शुल्वमेकन्तु कारयेत्।
धूस्तूरस्य च वीजानि कार्षिकानि प्रकल्पयेत्॥
रोहितमत्स्यपित्तेन अर्कक्षीरार्द्रकाम्बुना।
मर्द्दयेद्दुदयास्तञ्च चणकाभा वटीकृता॥
आर्द्रकस्य रसैः कर्षमधुमाषसमायुतम्।
भक्षयेत् प्रातरुत्थाय ज्वरारिरससञ्ज्ञितम्॥
वातिकं पैत्तिकञ्चैव कफजं नाशयेद्ध्रुवम्।
वातपित्तसमुद्भूतं वातश्लैष्मिक मेवच॥
भयादुत्पैत्तिकं वापि शोकोत्पन्नमथापि वा।
अभिचाराभिसापोत्थ भूतोत्थञ्च ज्वरं जयेत्॥
सन्ततं भेदः प्राप्तञ्च रसस्थे तु ज्वरे तथा।
सन्निपातज्वरे देयो मधुव्योषसमायुतः॥
घर्म्मं पिच्चं तथा कम्पं दाहं हन्ति न संशयः।
इन्द्रवज्रं यथा वृक्षं तथा ज्वरविनाशनः॥
वर्ज्जयेत् क्षीरमांसञ्च दधितक्रसुराघृतम्।
ज्वरे मांसास्थिगेचैव रक्तस्थे तु ज्वरे नृणाम्॥
शैत्ये दाहे तथा घर्म्मे प्रलापे चातुराह्निके।
महावेगे ज्वरे चैव जीर्णज्वरे प्रदापयेत्॥

ज्वरारिरसः॥ ५७॥

चित्रकं त्रिफलाव्योषं विड़ङ्गं मुस्तकन्तथा।
श्रेयसी पिप्पलीमूलमुशीरं देवदारु च॥

ज्वरारिरसे शुल्वमपि कर्षार्द्धमानम्॥ ५७॥

किराततिक्तकं पाठा कटुकी कण्टकारिका।
शोभाञ्जनस्य बीजानि मधुकं वत्सकं समम्॥
लौहतुल्यं गृहीत्वा तु वटिकां कारयेद्भिषक्।
सर्वज्वरहरं लौहं सर्वरोगहरन्तथा॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्।
द्वन्द्वजं विषमाख्यञ्च धातुस्थञ्च ज्वरं जयेत्॥
शीतं कम्पं तृषादाहं घर्म्मश्रुतिवमिभ्रमीन्।
रक्तपित्तमतीसारं मन्दाग्निं कासमेव च॥
प्लीहानं यकृतं गुल्मं सामवातं सुदारुणम्।
अर्शांसि घोरमुदरं मूर्च्छां पाण्डुं हलीमकम्॥
अजीर्णं ग्रहणीञ्चैव यक्ष्माणं शोथमेव च।
बल्यं वृष्यं पुष्टिकरं सर्वरोगनिसूदनम्॥
सर्वज्वरहरं लौहं चन्द्रनाथेन भाषितम्।

सर्वज्वरहरलौहम्॥ ५८॥

पारदं गन्धकञ्चैव ताम्रमभ्रञ्च माक्षिकम्।
हिरण्यं तारतालञ्च कर्षमेकं पृथक् पृथक्॥
कान्तलौहं पलं देयं सर्वमेकीकृतं शुभम्।
वक्ष्यमाणौषधैर्भाव्यं प्रत्येकं दिनसप्तकम्॥
कारवेल्लरसैर्वापि दशमूलरसेन च।
पर्पट्यास्य कषायेण त्रिफलाक्वाथकेन वा।
गुडूच्याः स्वरसेनैव नागवल्लीरसेन च।

सर्वज्वरहरलौहे व्योषं त्रिकटु, श्रेयसी गजपिप्पली, उशीरं वीरणमूलं, किराततिक्तकं भूनिम्बं, वत्सकं कुटजं समभागेन मिलितचूर्णं लौहतुल्यं गृहीत्वा माषकोन्मिता वटिका कार्या॥ ५८॥

काकमाचीरसेनैव निर्गुण्ड्याः स्वरसैस्तथा ॥
पुनर्नवार्द्रकाम्भोभिर्भावना परिकीर्त्तिता ।
रक्तिकादिक्रमेणैव वटिकां कारयेद्भिषक् ॥
गुड़पिप्पलीसंयुक्ता वटिका ज्वरनाशिनी ।
ज्वरमष्टविधं हन्ति जीर्णज्वरहरन्तथा ॥
वारिदोषोद्भवञ्चैव नानादोषोद्भवन्तथा ।
सततादिज्वरं हन्ति साध्यासाध्यमथापि वा ॥
चयोद्भवञ्च धातुस्थं कामशोकभवन्तथा ।
भूतावेशभवञ्चैव त्रिदोषजनितन्तथा ॥
अभिघातज्वरञ्चैव तथाभिचारसम्भवम् ।
अभिन्यासं महाघोरं विषमं त्र्याहिकन्तथा ॥
शीतपूर्वं दाहपूर्वं त्रिदोषं विषमज्वरम् ।
प्रलेपकज्वरं घोरमर्द्धनारीश्वरन्तथा ॥
प्लीहजरं तथा कासं चातुर्थकविपर्य्ययम् ।
पाण्डुरोगं कामलाञ्च अग्निमान्द्यं महागदम् ॥
एतान् सर्वान् निहन्त्याशु पचार्द्धेन न संशयः ।
शाल्यन्नं तक्रसहितं भोजयेद्धिङ्संयुतम् ॥
ककारपूर्वकं सर्वं वर्जनीयं न संशयः ।
मैथुनं वर्जयेत्तावद्यावन्न बलवान् भवेत् ॥
सर्वज्वरहरं लौहं दुर्लभं परिकीर्त्तितम् ।

बृहत्सर्वज्वरलौहम् ॥ ५८ ॥

बृहत्सर्वज्वरहरलौहे माचिकं स्वर्णमाचिकं तारं रौप्यं, तालं हरितालं, नागवल्लीपर्णपत्रम् ॥ ५८ ॥

रस गन्धकमभ्रञ्च प्रत्येकं कर्षसम्मितम् ।
वृद्धदारक वङ्गञ्च लौहं कर्षार्द्धकं क्षिपेत् ॥
स्वर्णं ताम्रं कर्पूरञ्च प्रत्येकं कर्षपादिकम् ।
शक्राशनं वरीचैव श्वेतसर्ज लवङ्गकम् ॥
कोकिलाक्षं विदारी च मूषली शूकशिम्बिकम् ।
जातीफलं तथा कोषं वला नागवला तथा ॥
माषद्वयमितं भागं तालमूल्या रसेन च ।
पिष्ट्वा च वटिका कार्य्या चतुर्गुञ्जाप्रमाणतः ॥
मधुना भक्षयेत् प्रातर्विषमज्वरशान्तये ।
धातुस्थांश्च ज्वरान् सर्वान् हन्यादेव न संशयः ॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ।
ज्वरं नानाविधं हन्ति कासं श्वासं क्षयन्तथा ॥
वलपुष्टिकरं नित्यं कामिनीं रमयेत् सदा ।
न च शुक्रक्षयं याति न वलं ह्रासतां व्रजेत् ॥
ऊर्द्धगं श्लेष्मजं हन्ति सन्निपातं सुदारुणम् ।
कामलां पाण्डुरोगञ्च प्रमेहं रक्तपित्तकम् ॥
महाराजवटीख्याता राजयोग्या च सर्वदा ।

महाराजवटी ॥ ६० ॥

हाटकं रजतं तालं मुक्ता गन्धकपारदौ । *

महाराजवटिकायां वृद्धदारकं वृद्धदारकवीजं तच्च शोधितं ग्राह्यं शक्राशनं त्रैलोक्यविजयावीजं, वरी शतमूली, श्वेतसर्जो श्वेतधूनकः, मूषली तालमूली, कोषं जातीकोषम् ॥ ६० ॥

* हाटकं स्वर्णं कुनटी मनःशिला ।

त्रिकटु कुनटीचैव कस्तूरी च पृथक् समम्॥
जलेन वटिका कार्य्या द्विगुञ्जाफलमानतः।
चिन्तामणिरसोह्येष ज्वराष्टानां निकृन्तनः॥

चिन्तामणिरसः।

भागत्रयं स्वर्णभस्म द्विभागं तारमभ्रकम्।
लौहात् पञ्चप्रवालञ्च मौक्तिकन्त्रयसम्मितम्॥
भस्मसूतं समकञ्च सर्वं मर्द्दन्तु कन्यया।
छायाशुष्का वटीकार्य्या छागीदुग्धानुपानतः॥
चयं हन्ति तथा कासं गुल्मञ्चापि प्रमेहनुत्।
जीर्णज्वरहरश्चायं उन्मादन्तु निकृन्तनः॥
सर्वरोगहरश्चापि वारिदोषनिवारणः।

त्रैलोक्यचिन्तामणिरसः॥ ६१॥

रसं गन्धं विषञ्चैव त्रिकटुत्रैफलन्तथा।
शिलाह्वा रौप्यकं स्वर्णं मौक्तिकं तालकं समम्॥
मृगकस्तूरिकायाश्च ग्राह्यं षन्माषिकं भिषक्।
भृङ्गराजरसेनैव तुलस्याः स्वरसेन वा॥
आर्द्रकस्य रसेनैव वटीं कुर्य्यात् द्विगुञ्जिकाम्।
चिन्तामणिरसोह्येष सर्वरोगकुलान्तकः॥
सन्निपातज्वरहरः कफरोगं विनाशयेत्।
एकजं द्वन्द्वजञ्चैव विविधं विषमज्वरम्॥

त्रैलोक्यचिन्तामणिरसे द्विभागं तारमभ्रकमिति तारमभ्रकं प्रत्येकं द्विभागम्। वटिका तु द्विगुञ्जामाना॥ ६१॥

अग्निमान्द्यं शिरःशूलं विद्रधिं सभगन्दरम् ।
एतान्येव निहन्त्याशु भास्करस्तिमिरं यथा ॥

वृहच्चिन्तामणिरसः ॥ ६२ ॥

हिङ्गुलसम्भवं सूतं गन्धकेन सुकज्जलम् ।
रसपर्पटीवत् पाच्यं सूताङ्घ्रि हेमभस्मकम् ॥
लौहं ताम्रमभ्रकञ्च रसस्य द्विगुणं क्षिपेत् ।
वङ्गञ्चैव प्रवालञ्च रसार्द्धञ्च विनिःक्षिपेत् ॥
मुक्ता शङ्खं शुक्तिभस्मरसपाटिकमेव च ।
मुलाष्टहे च संस्थाप्य पुटपाकेन साधयेत् ॥
भक्षयेत् प्रातरुत्थाय द्विगुञ्जाफल मानतः ।
अनुपानं प्रयोक्तव्यं कणा हिङ्गु ससैन्धवम् ॥
ज्वरमष्टविधं हन्ति वातपित्तकफोद्भवम् ।
प्लीहानं यकृतं गुल्मं साध्यासाध्यमथापि वा ॥
सन्ततं सतताख्यञ्च त्र्याहिकं चतुराहिकम् ।
कामलां पाण्डुरोगञ्च शोथं मेहमरोचकम् ॥
ग्रहणीमामदोषञ्च कासं श्वासञ्च दारुणम् ।
मूत्रकृच्छ्रातिसारञ्च नाशयेदविकल्पतः ॥ *

पुटपाकविषमज्वरान्तकलौहम् ॥ ६३ ॥

वृहच्चिन्तामणिरसे शिलाह्वा मनःशिला, तालकं हरितालम् ॥६२॥

---

* भास्करो गन्धक रुव्यौदेवी विडङ्गतीक्ष्णकं शोधितं गगनञ्चैव रसाञ्जनसुवर्चकम् । भूनिम्बादिगणैर्भाव्यं मधुना गुड़क्षौद्रवं चातुर्यकं

शुद्धसूतं तथा गन्धं कारयेत् कज्जलीं शुभाम् ॥
मृतसूतं हेमतारं लौहमभ्रञ्च ताम्रकम् ।
तालसत्वं वङ्गभस्ममौक्तिकं सप्रवालकम् ॥
सुवर्णमाक्षिकञ्चापि चूर्णयित्वा विभावयेत् ।
निर्गुण्डी नागवल्ली च काकमाची सपर्पटी ॥
त्रिफला कारवेल्लञ्च दशमूली पुनर्नवा ।
गुडूचीवृषकश्चापि सभृङ्गकेशराजकः ॥
एतेषाञ्चरसेनैव भावयेत् त्रिदिनं पृथक् ।
गुञ्जामानां वटीं कुर्य्यात् शास्त्रवित् कुशलो भिषक् ॥
पिप्पली गुड़केनैव लिहेच्च वटिकां शुभाम् ।
ज्वरमष्टविधं हन्ति निरामं साममेव वा ॥

विषमज्वरान्तकलौहे हिङ्गुलसम्भवं सूतं हिङ्गुलोत्थपारदं तुल्यांश-गन्धकेनसह कज्जलीं कृत्वा वक्ष्यमाणरसपर्पटीवत् पर्पटीकृतं ततः पारदाच्चतुर्थांशं स्वर्णभस्म, लौहं ताम्रमभ्रञ्च प्रत्येकं द्विगुणं वङ्गं प्रवालञ्चार्द्धभागं मुक्ताशङ्खं शुक्तिभस्म च पादांशं निःक्षिप्य कन्यानीरेण मर्द्दयेत् । ततः शुक्तिसम्पुटे कृत्वा वन्यकरिषाग्निना पुटपाकविधिना पचेत् । वटिका च द्विगुञ्जामाना ॥ ६२ ॥

तृतीयञ्च ज्वरं सन्ततकं तथा। आमज्वरं भूत कृतं सर्वज्वरमपोहति इति विषमज्वरान्तकः। व्यवहारस्तु हिङ्गुलसम्भवं सूतमित्यादिना भास्करः ताम्रः सर्वः पारदः देवी सौराष्ट्रसूत् विहङ्गं स्वर्णमाक्षिकं शोधितं हिङ्गुलं भूनिम्बादिगणस्वरसैः भूनिम्बाद्यष्टादशाङ्गो यथा भूनिम्बदारुदशमूलमहौषधाब्दतिक्तेन्द्रबीजधनिकेभकणा इति।

सप्तधातुगतञ्चापि नानादोषोद्भवन्तथा।
सततादिज्वरं हन्ति सध्यासाध्यमथापि वा॥
अभिघाताभिचारोत्थं जीर्णज्वरं विशेषतः।
बृहद्विषमज्वरान्तको रसः॥ ६४॥

तालकं दरदोद्भूतपारदो गन्धकः शिला।
क्रमवृद्धा ताम्रपात्रीं द्रवैरेतैर्विलेपयेत्॥
अधोमुखीं दृढ़े भाण्डे तां निरुध्याथ पूरयेत्।
चूर्णैर्वा वालुकयायन्त्रमग्निं प्रज्वालयेद्दृढम्॥
शीते स चूर्णमाशोस्य नागवल्लीदले स्थितः।
भक्षितो मरिचैः सार्द्धं समस्तान् विषमज्वरान्॥
शीतदाहादिकं हन्यात् पथ्यं शाल्योदनं पयः।
शीतभञ्जीरसः॥ ६५॥

तालकं शुल्वकं चूर्णं शिखिग्रीवं समांशिकम्।*
संपिष्य कारयेत्सर्वं चन्द्रिकासन्निभं शुभम्।

बृहद्विषमज्वरान्तके मृतसूतं रससिन्दूरं तालसत्वं हरितालभस्म, सुवर्णमाक्षिकं स्वर्णमाक्षिकम्॥ ६४॥

शीतभञ्जीरसे दरदोद्भूतपारदः हिङ्गुलोत्थरसः। शिला मनःशिला, क्रमवृद्धेति यथाक्रमं भागवृद्धा। अधोमुखीति तां ताम्रपात्रीं भाण्डे अधोमुखीं निरुध्य वालुकयाभाण्डं प्रपूर्य्य दृढाग्निसन्तापे द्वादशप्रहरं यावत् पचेत्॥ ६५॥

---

* चिन्तामणिरसे शुल्कं ताम्रं शिखिग्रीवं तुत्थकम्। ज्वराङ्कुशरसे सुवर्णद्रावैः करञ्जारसैः।

शरावपिहितं रात्रौ पचेद्गजपुटेन तु।
स्वाङ्गशीतं समुद्धृत्य भक्षयेन्माषमात्रकम्।
शर्करासहितं सेव्यं सर्व्वज्वरहरं परम।

चिन्तामणि।

ताम्रतोद्विगुणं तालं मर्द्दयेत् स्नुषक्षीरद्रवैः।
प्रपुटेत् भूधरे शीते वज्रीक्षीरैर्विमर्द्दयेत्।
प्रपुटेत् भूधरे पश्चात् पञ्चगुञ्जामितं शुभम्।
आर्द्रकस्य रसेनैव सर्व्वज्वरनिकृन्तनः।
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्चातुराह्निकम्॥
विषमञ्चापिशीताढ्यं ज्वरं हन्ति ज्वराङ्कुशः।

ज्वराङ्कुशः॥

अभ्रं कांस्यं मृतं ताम्रं त्रिभिस्तुल्यञ्च गन्धकम्।
रसेन मेघनादस्य पिष्ट्वा बद्धा पुटे पचेत्॥
भक्षयेत् पर्णखण्डेन विषमज्वरनाशनम्।
अस्य मात्राद्विगुञ्जा स्यात् पथ्यं दुग्धौदनं हितम्।

मेघनादोरसः॥ ६६॥

सूतमाक्षिकगन्धानां भागश्चारुष्करस्य च।
तथाष्टौ तालकाचूर्णां द्रविदुग्धस्य षोड़श॥
स्नुहीक्षीरस्य चैवाष्टौ सर्वं मृदग्निना पचेत्।
स्वाङ्गशीतं समुद्धृत्य ततःखल्ले विमर्द्दयेत्॥

मेघनादरसे मेघनादो रक्ततण्डुलीयकः। मात्राचास्य द्विगुञ्जा-
माना॥ ६६॥

शीतज्वरहरोनाम्ना रसोयं परिकीर्त्तितः।

शीतज्वरहरः॥ ६७॥

पारदं रसकं तालं तुत्थं टङ्कणगन्धकम्।
सर्व्वमेतत् समं शुद्धं कारवेल्लरसेर्द्दिनम्॥
मर्द्दयेत्तेन कल्केन ताम्रपात्रोदरं लिपेत्।
अङ्गुलार्द्धार्द्धमानेन तं पचेत् सिकताह्वये॥
यन्त्रे यावत् स्फुटन्त्येव व्रीह्यस्तस्य पृष्ठतः।
ततस्तत्शीतलं ग्राह्यं ताम्रपात्रोदराद्भिषक्॥
माषैकं पर्णखण्डेन भक्षयेन्मरिचैः समम्।
शीतभञ्जीरसोनाम त्रिदिनान्नाशयेज्ज्वरम्

शीतभञ्जीरसः॥ ६८॥

रसकं तालकं तुत्थं टङ्कणं रसगन्धकम्।
तुल्यांशं सुषवीतोयैर्मर्द्दयेद्यामयुग्मकम्॥

शीतज्वरहरे सूतादीनामेकोभागः, हरितालस्याष्टौभागाः अर्क-दुग्धस्य षोड़शभागाः, तथास्नुहीदुग्धस्याष्टौभागाः एतत् सर्व्वमेकीकृत्य पुटपाकविधिना स्वह्वग्नौ पचेदित्यर्थः॥ ६७॥

शीतभञ्जीरसे रसकः खर्परमिति माधवः स्फटिकारीति चन्द्रिका-कारः। पारदादिषड्द्रव्येनोदरलिप्तं ताम्रपात्रं अधोमुखं कृत्वा स्थाल्यां संस्थाप्य पात्रान्तरेणाच्छाद्यवदरीपत्रकल्केन सन्धिं निरुध्य च वालुकाभिः स्थालीं प्रपूर्य्य च तदुपरि व्रीहीन् प्रक्षिपेत् ततः पात्राधो ज्वालादेया यावत् व्रीहयो न स्फुटन्ति ततस्तत्पात्रस्थमृत्पिष्टल्यां समरिचैः सह चूर्ण-येत्। मात्राचास्य द्विगुञ्जामाना॥ ६८॥

कृत्वा गोलं ताम्रपात्रे नाधोवक्त्रेन रोधयेत्।
स्थालीं मृत्कर्पटे लिप्त्वा पचेत् चूल्यां दिनं ततः॥
तच्छीतं ताम्रभस्मापि गृह्णीयात् सुरसाजलैः।
यामं मर्द्यं ततोवल्लं तुलसीमरिचैर्युतम्॥
हन्ति सर्वज्वरं घोरं विषमञ्च त्रिदोषजम्।
धात्रीकल्केन वा युक्तं दाहाख्यं बिषमं जयेत्॥
पथ्यं दुग्धौदनं दद्यात् मुद्गयूषं सशर्करम्।
ज्वरे धातुगते दद्यात् पिप्पली चौद्रसंयुतम्॥
अयं पञ्चाननो नाम विषमज्वरनाशनः।

पञ्चाननोरसः॥ ६९॥

कुमारीमूलकर्षैकं पिवेत् कोष्णजलेन तु।
विषमन्तु ज्वरं हन्ति वमनेन चिरन्तनम्॥ ७०॥
दरदं गन्धकं सूतं तुल्यांशं मर्द्दयेद्द्रवैः।
अश्वत्थजैस्त्र्यहं पश्चात् रसैः कानकमूलजैः॥
निदिग्धिकारसैः काकमाचीकायारसैः पुनः।
द्विगुञ्जां वा त्रिगुञ्जां वा गोक्षीरेण प्रदापयेत्॥
रात्रिज्वरं निहन्त्याशु नाम्ना विश्वेश्वरो रसः।

विश्वेश्वरोरसः॥ ७१॥

पञ्चाननरसोऽपि शीतमङ्गोवत् द्वादश प्रहरं पचेत्॥ ६९॥
वमनयोगमाह कुमारिकेति कोष्णजलेन कर्ष पिष्टं कुमारिकामूलं कोष्णजलेनैव पिवेत्॥ ७०॥
विश्वेश्वररसे दरदं हिङ्गुलं अश्वत्थजैरिति अश्वत्थवल्कलरसैः॥७१॥

रसेन गन्धं शङ्खञ्च शिखिग्रीवञ्च पादिकम्।
गोजिह्वया जयन्त्या च तण्डुलीयैश्च भावयेत्॥
प्रत्येकं सप्तसप्ताथ शुष्कं गुञ्जाचतुष्टयम्।
जरणेन घृतेनाद्यात् त्र्याहिकज्वरशान्तये॥

त्र्याहिकारिरसः॥ ७२॥

हरितालं शिला तुत्थं शङ्खचूर्णञ्च गन्धकम्।
समांशं मर्द्दयेत् प्राज्ञः कुमारीरसभावितम्॥
शरावसंपुटे कृत्वा पश्चाद् गजपुटे पचेत्।
कुमारिकारसेनैव वल्लमात्रा वटीकृता॥
दत्वा शीतज्वरं हन्ति चातुर्थकं विशेषतः।
मरिचघृतयोगेन तक्रं पीत्वा चरेद्वटीम्॥
एतया रमणं भूत्वा ज्वरस्तस्माद्विनश्यति।

चातुर्थकारिः॥

रसं गन्धं विषं शुल्वं मृतमभ्रं फलत्रिकम्॥
त्र्यूषणं दन्तिवीजञ्च समं खल्ले विमर्द्दयेत्।
द्रोणपुष्पीरसैर्भाव्यं शुष्कं तद्वस्त्रगालितम्॥
चिन्तामणिरसोह्येष अजीर्णं ग्रसते सदा।
ज्वरमष्टविधं हन्ति सर्वशूलहरः परः॥
गुञ्जैकास्या त्रिगुञ्जास्या देयमार्द्रकवारिणा।

चिन्तामणिरसः॥ ७३॥

त्र्याहिकारिरसे शिखिग्रीवं तुत्थकं पादिकमिति रसगन्धयोः पादिकम्॥ ७२॥

चिन्तामणिरसे शुल्वं ताम्रम्। त्र्यूषणं त्रिकटुकम्॥ ७३॥

रसगन्धकलोहानि ताम्रं तारं हिरण्मकम्।
हरितालं खर्परञ्च कांस्यं वङ्गञ्च विद्रुमम्॥
मुक्तामाक्षिककाशीशं शिला टङ्कणकं समम्।
कर्पूरञ्च समं दत्वा भावना सप्तसप्तकम्॥
भार्गी वासा च निर्गुण्डी नागवल्ली जयन्तिका।
कारवेल्लं पटोलञ्च शक्राशनं पुनर्नवा॥
आर्द्रकञ्च ततो दद्यात् प्रत्येकं वारसप्तकम्।
चिन्तामणिरसो नाम सर्वज्वरविनाशनः॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्।
द्वन्द्वजं विषमाख्यञ्च धातुस्थञ्च ज्वरं जयेत्॥
कासं श्वासं तथा शोथं पाण्डुरोगं हलीमकम्।
प्लीहानमग्रमांसञ्च यकृतञ्च विनाशयेत्॥

बृहत्ज्वरचिन्तामणिः॥ ७४॥

पारदं गन्धकं ताम्रं हिङ्गुलं तालमेव च।
वङ्गं लौहं माक्षिकञ्च खर्परञ्च मनःशिला॥
मृताभ्रकं गैरिकञ्च टङ्कणं दन्तिबीजकम्।
सर्वाण्येतानि द्रव्याणि चूर्णयित्वा विभावयेत्॥
जम्बीरविजयाचित्रतुलसीतिन्तिड़ीरसैः।
एभिर्दिनत्रयं भाव्यं निर्ज्जने रौद्रसङ्कुले॥

बृहच्चिन्तामणिरसे तारं रौप्यं विद्रुमं प्रवालं माक्षिकं स्वर्णमाक्षिकं शिला मनःशिला, काशीशं धातुकाशीशम्। भागश्चादिभिः प्रत्येकशः सप्तसप्तकं भावना देया॥ ७४॥

चणमात्रां वटीं कृत्वा छायाशुष्काञ्च कारयेत्।
मन्दाग्निदीपनीचैव सर्वज्वरविनाशिनी॥
द्वन्द्वजं सर्वजञ्चैव चिरकालसमुद्भवम्।
ऐकाहिकं द्व्याहिकञ्च ज्वरन्तु सान्निपातिकम्॥
चातुर्थकं तथात्युग्रं जलदोषसमुद्भवम्।
सर्वान् ज्वरान् निहन्त्याशु भास्करस्तिमिरं यथा॥
महाज्वराङ्कुशोनाम रसोयं मुनिभाषितः।

महाज्वराङ्कुशः॥

पारदं हिङ्गुलं ताम्रं माक्षिकं तुल्यमेव च।
वङ्गं मृतञ्च गन्धञ्च खर्परञ्च मनःशिला॥
तालकं घनपाषाणं गैरिकं टङ्कणन्तथा।
दन्तिबीजानि सर्वाणि चूर्णयित्वा विभावयेत्॥
भावना पूर्ववत् देया वटीं कुर्य्याच्च पूर्ववत्।

तन्त्रान्तरोक्तमहाज्वराङ्कुशः॥ ७५॥

विशुद्धं गगनं ग्राह्यं द्विकर्षं शुद्धगन्धकम्।
तोलकं तोलकार्द्धञ्च हिङ्गुलोत्थरसन्तथा॥
कर्पूरं केशरं मांसी तेजपत्रं लवङ्गकम्।
जातीकोषफलञ्चैव सूक्ष्मैलाकरिपिप्पली॥
कुष्ठं तालीशपत्रञ्च धातकीचोचमुस्तकम्।
हरीतकी मरिचञ्च शृङ्गवेरं विभीतकम्॥

महाज्वराङ्कुशरसे घनपाषाणं कान्तपाषाणम्॥ ७५॥

पिप्पल्यामलकञ्चैव शाणभागं विचूर्णितम् ।
सर्वमेकीकृतं पिष्ट्वा वटीं कुर्य्याद्विगुञ्जिकाम् ॥
भक्षयेत् पर्णखण्डेन मधुना सितयापि वा ।
रोगं ज्ञात्वानुपानञ्च प्रातःकुर्य्याद्विचक्षणः ॥
हन्तिमन्दानलान् सर्वान् आमदोषं विसूचिकाम् ।
पित्तश्लेष्मभवं रोगं वातश्लेष्मभवन्तथा ॥
अनाहं मूत्रकृच्छ्रञ्च संग्रहग्रहणीं वमिम् ।
अम्लपित्तं शीतपित्तं रक्तपित्तं विशेषतः ॥
चिरज्वरं पित्तभवं धातुस्थं विषमज्वरम् ।
कासं पञ्चविधं हन्ति कामलां पाण्डुमेव च ।
सर्वलोकहितार्थाय शिवेन भाषितः पुरा ॥
सर्वतो भद्रनामायं रसः साक्षान्महेश्वरः ।

सर्वतोभद्ररसः ॥ ७६ ॥

रसं गन्धं तोलकञ्च जातीकोषफले तथा ।
हेमभस्म तु पादैकं तोलार्द्धं रूप्यलौहकम् ॥
अभ्रं शिलाजतुचैव भृङ्गराजञ्च मुस्तकम् ।
केशराजमपामार्गं लवङ्गञ्च फलत्रिकम् ॥

सर्वतोभद्ररसे गगनभस्मं पलार्द्धमानं, गन्धकं तोलकमानम् । अन्यत् सर्वं तोलार्द्धं, केशरं नागकेशरं फलं जातीफलम् । करिपिप्पली । गजपिप्पली चोचं गुड़त्वक् ॥ ७६ ॥

---

* शाणं अर्द्धतोलकपरिमानमिति वैद्यक परिभाषा ।

वराङ्गवल्कलञ्चैव पिप्पलीमूलमेव च।
सैन्धवञ्च विड़ञ्चैव गुडूचीचूर्णमेव च॥
कण्टकारीरसोनञ्च धान्यकं जीरकद्वयम्।
चन्दनं देवकाष्ठञ्च दार्वीन्द्रयवमेव च॥
किराततिक्तकं वालं तोलकञ्च समाहरेत्।
द्वितोलं मरिचं देयं भावयेदार्द्रकैरसैः।
मषार्द्धं भक्षयेत् प्रातर्मधुना मधुरीकृतम्।
ज्वरं नानाविधं हन्ति शुक्लस्थं चिरकालजम्॥
साध्यासाध्यविचारोऽत्र नैवकार्य्योभिषग्वरैः।
अन्तर्धातुगतञ्चैव नाशयेन्नात्र संशयः॥
भूतोत्थं श्रमजञ्चापि सन्निपातज्वरन्तथा।
असाध्यञ्च ज्वरं हन्ति यथा सूर्य्योदयस्तमः॥
गरुड़ञ्च समालोक्य यथा सर्पः पलायते।
तथैवास्य प्रसादेन ज्वरः शीघ्रं पलायते।
वलदं पुष्टिदञ्चैव मन्दाग्निनाशनं परम्।
वीर्य्यस्तम्भकरञ्चैव कामला पाण्डुरोगनुत्॥
सदा तु रमते नारीं न वीर्य्यं क्षयतां व्रजेत्॥
प्रमेहं विविधञ्चैव विविधां ग्रहणीं तथा।
अनुपानविशेषेण सर्वव्याधिं विनाशयेत्।

वृहत्ज्वरान्तकलौहम्॥ ७७।

वृहज्ज्वरान्तकलौहे तोलकमिति रसादिफलान्तं प्रत्येकं तोलकभागं, हेमभस्म तु पादैकमिति एकभागापेक्षया पादैकम्। वराङ्गवल्कलं

मृतं सूत प्रवालञ्च स्वर्णं तारञ्च वङ्गकम्।
शुल्वं मुक्ता तीक्ष्णमभ्रं सर्वमेकत्र योजयेत्॥
जलेन पिष्ट्वा वटिका कार्य्या वल्लप्रमाणतः।
धातुस्थं सन्निपातोत्थं ज्वरं विषमसम्भवम्॥
कामशोकसमुद्भूतं त्रिदोषजनितन्तथा।
कासं श्वासञ्च विविधं शूलं सर्वाङ्गसम्भवम्॥
शिरोरोगं कर्णशूलं दन्तशूलं गलग्रहम्।
वातपित्तसमुद्भूतं ग्रहणीं सर्वसम्भवाम्।
आमवातं कटीशूलमग्निमान्द्यं विसूचिकाम॥
अर्शांसि कामलां मेहं मूत्रकृच्छ्रादिकञ्च यत्।
तत्सर्वं नाशयत्याशु विष्णुचक्रमिवासुरान्॥
चूड़ामणिरसोह्येष शिवेन परिकीर्त्तितः।

चूड़ामणिरसः॥ ७८॥

सुवर्णं रससिन्दूरं प्रवालं वङ्गमेव च।
लौहं ताम्रं तेजपत्रयमानी विश्वभेषजम्॥
सैन्धवं मरिचं कुष्ठं खदिरं द्विहरिद्रकम्।
रसाञ्जनं माक्षिकञ्च समभागञ्च कारयेत्॥

गुड़त्वक्। गुडुचीचूर्णमित्यत्र गुडुचीसत्वमिति व्यवहरन्ति वृद्धाः। रसोन् रसोनकन्दं तच्च दुग्धेन परिशोधितं ग्राह्यम्। भावयेदार्द्रक-द्रवैरिति आर्द्रकरसैः सप्तवारं भावयेत्॥ ७७॥

चूड़ामणिरसे मृतसूतं रससिन्दूरं शुल्वं ताम्रं तीक्ष्णं लोहं अत्र सर्वं समभागम्॥ ७८॥

वारिणा वटिका कार्य्या रक्तिद्वयप्रमाणतः ।
भक्षयेत् प्रातरुत्थाय सर्वज्वरकुलान्तकृत् ॥
भानुचूड़ामणिः ॥ ७८ ॥ *

कस्तूरिका विद्रुम रौप्य लौहं, ।
तालं हिरण्यं रससिन्दूरञ्च ॥
सुवर्णसिन्दूर लवङ्गमौक्तिकं, ।
चोचं घनं माक्षिकराजपट्टम् ॥
गोक्षुरजातिफल जातीकोषं,
मरिचकर्पूर शिखिग्रीवञ्च ॥
प्रगृह्य सर्वं हि समं प्रयत्नात् ।
अथाश्वगन्धादिगुणं हि वैद्यः ॥
वक्ष्यमाणौषधैर्भाव्यं प्रत्येकं मुनिसंख्यया ।
निर्गुण्डी फञ्जिका वासा रविमूल त्रिकण्टकैः ॥
तद्वीर्यं कथयिष्यामि वातिकं पैत्तिकं ज्वरम् ।
कफोद्भवं द्विदोषोत्थं त्रिदोषजनितन्तथा ॥

भानुचूड़ामणिरसे द्विहरिद्रकमिति हरिद्रा दारुहरिद्रा च ॥७८॥

---

* हिङ्गुलसम्भवं सूतं गन्धकं टङ्कणं तथा ताम्रं वङ्गं माक्षिकञ्च सैन्धवं मरिचं तथा समं सर्व्वं समाहृत्य द्विगुणं स्वर्णभस्मकं तदर्द्धं कान्तलौहञ्च भस्मकृष्णञ्च तत्समम् । एतत्सर्व्वं विचूर्ण्याथ भावयेत् कण्टकारैः शेफालीदलजैश्चापि दशमूलरसेन च किराततिक्तकक्वाथै स्त्रिवारं भावयेत् सुधीः । भावयित्वा ततः कार्य्या गुञ्जाद्वयमिता वटी । अनुपानं प्रदातव्यं जीरकं मधुसंयुतं निखिलं ज्वरनाशनं हन्ति श्रीशिव शासनात् जयमङ्गलनामाऽयं रसः श्रीशिवनिर्मितः ग्रन्थान्तरे ।

सन्ततं सततं हन्ति तृतीयकचतुर्थकौ ।
ऐकाहिकं द्व्याहिकञ्च विषमं भूतसम्भवम् ॥
नाशयेदचिरादेव वृत्रमिन्द्राशनिर्यथा ।
चूड़ामणिरसोह्येष शिवेन परिभाषितः ॥

बृहच्चूड़ामणिरसः ॥ ८० ॥

सुवर्णसिन्दूरं स्वर्णं लोहं तारं मृगाङ्कजम् । *
जातीफलं जातिकोषं लवङ्गञ्च त्रिकण्टकम् ॥
कर्पूरं गगनञ्चैव चोचं मूषलतालकम् ।
प्रत्येकं कर्षमानन्तु तुरङ्गञ्च द्विकार्षिकम् ॥
विद्रुमं भस्मसूतञ्च मौक्तिकं माक्षिकं तथा ।
राजपट्टं शिखिग्रीवं सर्वं संचूर्ण्य यत्नतः ॥

बृहच्चूड़ामणिरसे विद्रुमं प्रवालं लौहं कान्तलौहं घनं मुक्तकं माक्षिकं स्वर्णमाक्षिकं राजपट्टं कान्तपाषाणं शिखिग्रीवं तुत्थकं समभित्येकभागसमं अश्वगन्धाया एकभागमेतया द्वैगुण्यम् । सुनिसङ्ग्येति सप्तवारं फञ्जिका ब्राह्मणयष्टिका । रविमूलमर्कमूलम् ॥ ८० ॥

---

* मूर्च्छितरसकर्षैकं यदर्द्धं जारिताभ्रकं तारं ताप्यञ्च रजतं रसकं तालकं तथा । मौक्तिकं विद्रुमं लौहं गिरिजं गैरिकं शिला गन्धकं हेमसारञ्च पलार्द्धञ्च पृथक् पृथक् । चौराची सुरवल्ली च शोथघ्नी गणिकारिका भाङ्गामलाज्योतिष्मिका च सतिक्ता च सुदर्शना । अग्निजिह्वा-पूतितैला स्वर्णपर्णी प्रसारणी प्रत्येकस्वरसं दत्वा मर्द्दयेत् त्रिदिनावधि भक्षयेत् पर्णखण्डेन चतुर्गुञ्जा प्रमाणतः । महाग्निकारकः रोगसङ्करघ्नः प्रयोगराट् सन्ततादिज्वरान् हन्ति भास्करस्तिमिरं यथा ज्वरकुञ्जरपारीन्द्रः प्रेषितः पृथिवीतले इति जरकुञ्जरपारीन्द्ररसः अतिरिक्त पाठः ।

खल्ले तु चूर्णमादाय भावयेत् परिकीर्त्तितैः।
निर्गुण्डी फञ्जिका वासा रविमूल चिकण्टकैः॥
ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा।
बृहत्ज्वरचूड़ामणिः॥ ८१॥

इति रसेन्द्रसारसंग्रहे ज्वराधिकारः।

अथ ज्वरातिसारचिकित्सा। *

मागधी वत्सनाभश्च तयोस्तुल्यश्च हिङ्गुलम्॥
मृतसञ्जीवनीख्याताजम्बीररसमर्द्दिता।
मूलकस्य च बीजानां वटिकातुल्यरूपिणी॥
पानीयाशीततोयेन ज्वरातिसारनाशिनी।

बृहज्ज्वरचूड़ामणिरसे मृगाङ्कजं कस्तूरी, गगनञ्चाभ्रं मयूरी तालभूली, तुरङ्गं गन्धकं, भस्मसूत रससिन्दूरं, राजपट्टं कान्तपाषाणम्। स्वर्णसिन्दूरादितालान्तं प्रत्येकं कर्षमानं तथा तुरङ्गादिशिखिग्रीवपर्य्यन्तं प्रत्येकं द्विकर्षं एवं सर्वमेकीकृत्य निर्गुण्ड्यादिरसैः सप्तवारं भावयेत्॥ ८१॥

इति ज्वराधिकारः।

---

* पित्तज्वरे पित्तभवोऽतिसारस्तथातिसारे यदि वा ज्वरः स्यात्। दोषस्य दुष्यस्य समानभावात् ज्वरातिसारः कथितो भिषग्भिरित्यतिरिक्त पाठः।

विसूच्यां सन्निपाते च ज्वरे चैवाति दुस्तरे॥

मृतसञ्जीवनीवटी॥ ८२॥

हिङ्गुलञ्च विषं व्योषं टङ्कणं गन्धकं समम्।
जम्बीररससंयुक्तं मर्द्दयेद्यामकद्वयम्॥
कासश्वासातिसारेषु ग्रहण्यां सान्निपातिके।
अपस्मारेऽनिलेमेहेष्यजीर्णेवह्निमान्द्यके॥
गुञ्जाभावः प्रदातव्यो रस आनन्दभैरवः॥

आनन्दभैरवोरसः॥

हिङ्गुलाख्यो रसो लौहं टङ्कणं गन्धकं शटी।
धान्यकं वालकं मुस्तं पाठा जीरं घुणप्रिया॥
प्रत्येकं तोलकं चूर्णं छागीदुग्धेन पेषयेत्।
माषैका वटिका कार्य्या रसोऽयममृतार्णवः॥
वटिकां भक्षयेत् प्रातर्गहनानन्दभाषिताम्।
धान्यजीरकयूषेण विजयाशणवीजतः॥

ज्वरे सतुपद्रवत्वेनातीसारस्य सम्भवात् ज्वरानन्तरं ज्वरातिसार उच्यते। माधवेन तु तल्लक्षणं पृथङ्नोक्तं ज्वरातीसारयोर्मेलकत्वात्। उक्तं हि सिद्धसारे ज्वरतीसारयोरुक्तं निदानं यत् पृथक् पृथक्। तत्स्याज्ज्वरातीसारस्य तेन नात्रोदितं पुनरिति। ननु एवं चिकित्सापि भविष्यतीति चेत् नैवं मिथोर्वर्द्धनात्। उक्तं हि ज्वरातिसारयोरुक्तं भेषजं यत् पृथक् पृथक्। न तन्मिलितयोः कार्य्यमन्योन्यं वर्द्धयेद् यत इति। प्रायेन हि ज्वरहरमौषधमनुलोमनं, अतिसारहरञ्च स्तम्भनमिति परस्परविरुद्धत्वात् मिलितयोर्नकार्य्यमित्यर्थः। मृतसञ्जीवनी वटिकायां मागधी पिप्पली॥ ८२॥

मधुना छागदुग्धेन मण्डेन शीतवारिणा ।
कदलीमोचकरसैः कुटजद्रवकेन च ॥
अतिसारं जयेदुग्रमेकजं द्वन्द्वजं तथा ।
दोषत्रयसमुद्भूतमुपसर्गसमन्वितम् ॥
शूलघ्नो वह्निजननो ग्रहण्यर्शोविकारनुत् ।
अम्लपित्त प्रशमनः कासघ्नो गुल्मनाशनः ॥

अमृतार्णवः ॥ ८३ ॥

गन्धं शाभ्रं पृथग्वेदभागमन्यच्च भागिकम् ।
स्वर्जिं टङ्कं यवक्षाराः पञ्चैव लवणानि च ॥
वराव्योषेन्द्रबीजानि द्विजीराग्नि यमानिका ।
सहिङ्गुबीजसारश्च शतपुष्पा सुचूर्णिता ॥
सिद्धप्राणेश्वरः सूतः प्राणिनां प्राणदायकः ।
माषैकं भक्षयेदस्य नागवल्लीदलैर्युतम् ॥
उष्णोदकानुपानञ्च दद्यात्तत्र पलत्रयम् ।
ज्वरातीसारेऽतिसृतौ केवलेवाज्वरेपिवा ॥
ज्वरे त्रिदोषजे घोरे ग्रहण्यादिगदेपि च ।
वातरोगे तथा शूले शूले च परिणामजे ॥

सिद्धप्राणेश्वरोरसः ॥ ८४ ॥

अमृतार्णवरसे अजाजी जीरकं घुणप्रिया अतिविषा धान्य-जीरकयूषेणेति यूषयोनित्वात् प्रचुरतरं तक्रं प्रदातव्यम् ॥ ८३ ॥

सिद्धप्राणेश्वररसे ईशः पारदः ; स्वर्जि स्वर्जिक्षारं ; टङ्कं टङ्कण-क्षारं, वरा त्रिफला, इन्द्रबीजं इन्द्रयवं बीजसारं विडङ्गम् ॥ ८४

अथ शुद्धस्य सूतस्य गन्धकस्याभ्रकस्य च।
प्रत्येकं कर्षमानन्तु ग्राह्यं रसगुणैषिणा॥
ततः कज्जलिकां कृत्वा व्योषचूर्णं प्रदापयेत्।
केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चित्रकस्य च॥
ग्रीष्मसुन्दरकस्याथ जयन्त्याः स्वरसं तथा।
मण्डूकपर्ण्याः स्वरसं तथा शक्राशनस्य च॥
श्वेतापराजितायाश्च स्वरसं पर्णसम्भवम्॥
दापयेद्रसतुल्यञ्च विधिज्ञः कुशलो भिषक्।
रसतुल्यं प्रदातव्यं चूर्णं मरिचसम्भवम्।
देयं रसार्द्धभागेन चूर्णं टङ्कणसम्भवम्।
शुभे शिलामये पात्रे घर्षणीयं प्रयत्नतः।
शुष्कमातपसंयोगात् वटिकां कारयेत् भिषक्।
कलायपरिमाणान्तु खादेत्तान्तु प्रयत्नतः।
दृष्ट्वा वयश्चाग्निबलं यथा व्याध्यनुपानतः।
हन्ति कासं क्षयं श्वासं वातश्लेष्मभवं रुजम्।
परं वाजीकरः श्रेष्ठो बलवर्णाग्निवर्द्धकः।
ज्वरे चैवातिसारे च सिद्ध एष प्रयोगराट्।
नातः परतरः श्रेष्ठो विद्यतेऽभ्ररसायनात्।
भोजने शयने पाने नास्त्यत्र नियमः क्वचित्।
दधिचावश्यकं भक्ष्यं प्राह नागार्जुनो मुनिः।

अभ्रवटिका॥ ८५॥

अभ्रवटिकायां व्योषचूर्णमपि कर्षमानम्। केशराजादीनां स्वरसः रसतोऽन्मितोदेयः॥ ८५॥

हिङ्गुलं मरिचं गन्धं टङ्कणं पिप्पली विषम्।
कनकस्य च वीजानि समांशं विजयाद्रवैः।
मर्द्दयेद्यामसात्रन्तु चणमात्रा वटी कृता।
भक्षणाद्ग्रहणीं हन्ति रसः कनकसुन्दरः।
अग्निमान्द्यं ज्वरं तीव्रमतिसारञ्च नाशयेत्।

कनकसुन्दरोरसः॥ ८६॥

सुवर्णवीजं मरिचं मरालपादं कणा टङ्कणकं विषञ्च।
गन्धं जयाद्भिर्दिवसं विमर्द्द्य गुञ्जाप्रमाणां वटिकां विदध्यात्।
एषातिसारग्रहणीं ज्वराग्निमान्द्यं निहन्यात् कनकप्रभेयम्।
दध्योदनं भोज्यमनुष्णवारिमांसं भजेत्तित्तिरिलावकानाम्।

कनकप्रभा॥ ८७॥

भस्मसूताद्द्विधा गन्धं तथाद्दिव्यं सृताभ्रकम्।
दिनं सार्षपतैलेन पिष्ट्वा यामं विपाचयेत्।
रसैर्मार्कवमूलोत्थैः पिष्ट्वा यामं विपाचयेत्।
विचार पञ्चलवण विषव्योषाग्निजीरकैः।
सविडङ्गैस्तुल्यभागैरयं कारुण्यसागरः।
माषमात्रं ददीतास्य भिषक् सर्व्वातिसारके।

कनकसुन्दररसे टङ्कणमित्यत्र अभ्रकमिति केचित् पठन्ति। विजया-द्रवैरिति विजया भङ्गाख्यनम्। तस्य द्रवः क्वाथः॥ ८६॥

कनकप्रभायां सुवर्णवीजं कृष्णधुस्तूरवीजम्। मरालपादं प्रानङ्ग-श्रीतिख्याता। जयाद्भिरिति विजयारसैः॥ ८७॥

सज्वरे विज्वरे वापि सशूले शोणितोद्भवे।
निरामे शोथयुक्ते वा ग्रहण्यां सान्निपातिके।
अनुपानं विनाप्येष कार्य्यसिद्धं करिष्यति।
कारुण्यसागरः॥ ८८॥

शुद्धसूतं समं गन्धं मरिचं टङ्कणन्तथा।
स्वर्णबीजं समं मर्द्यं भार्गीद्रावैर्दिनार्द्धकम्।
सूततुल्यं मृतञ्चाभ्रं रसः कनकसुन्दरः।
चास्य गुञ्जाद्वयं हन्ति पित्तातिसारमुग्रकम्।
वृहत्कनकसुन्दरः॥ ८९॥

रसगन्धौ समौ ग्राह्यौ सूतपादं विषं क्षिपेत्।
सर्व्वतुल्यं मृतञ्चाभ्रं मर्द्यं धूस्तूरजैर्द्रवैः।
सर्पाक्ष्याश्च द्रवैर्यामं कषायेनाथ भावयेत्।
धातक्यतिविषा मुस्तं शुण्ठी जीरकवालकम्।
यमानी धान्यकं विल्वं पाठा पथ्या कणान्वितम्।
कुटजस्य त्वचं बीजं कपित्थं बालदाड़िमम्।
प्रत्येकं कर्षमात्रं स्यात् कुट्टितं क्वाथयेज्जलैः।
चतुर्गुणं जलं दत्वा यावत्पादावशेषितम्।
अनेन त्रिदिनं भाव्यं पूर्व्वोक्तं मर्द्दितं रसम्।
रुद्धा तद्वालुकायन्त्रे चणं मृदग्निना पचेत्।

कारुण्यसागररसे गन्धको द्विगुणः रसभस्मनोऽभावे शुद्धसूतस्य भागैकम्। विपाचयेदिति वालुकायन्त्रके मृत्कर्पटे वा विपाचयेत्। मार्कवमूलं भृङ्गराजमूलम्। समभागानि त्रिचारादिविड़ङ्गान्तानि पञ्चदशद्रव्याणि प्रत्येकमिलित रसादीनां समानि मिश्रयेदित्यर्थः॥ ८८॥

वृहत् कनकसुन्दररसे स्वर्णबीजं कृष्णधूस्तूरबीजम्॥ ८९॥

मृतसञ्जीवनो नाम चास्य गुञ्जा चतुष्टयम् ।
दातव्यमनुपानेन चासाध्यमपि साधयेत् ।
षट्प्रकारमतीसारं साध्यासाध्यं जयेद्ध्रुवम् ।
नागराति विषा मुस्तं देवदारु कणा वचा ।
यमानी वालकं धान्यं कुटजत्वक् हरीतकी ।
धातकीन्द्रयवौ विल्वं पाठा मोचरसं समम् ।
चूर्णितं मधुना लेह्य मनुपानं सुखावहम् ।

मृतसञ्जीवनोरसः ॥ ९० ॥

रसगन्धकमभ्रञ्च टङ्कणं शतपुष्पकम् ।
यमानी जीरकाख्यञ्च प्रत्येकं कर्षयुग्मकम् ॥
कर्षमेकं यवक्षारं हिङ्गु पटुकपञ्चकम् ।
विड़ङ्गेन्द्रयवं सर्ज्जरसकञ्चाग्निसंज्ञितम् ॥
घृष्ट्वा च वटिका कार्य्या नाम्ना प्राणेश्वरोरसः ।

प्राणेश्वरोरसः ॥ ९१ ॥ *

इति रसेन्द्रसारसंग्रहे ज्वरातिसार चिकित्सा ।

मृतसञ्जीवनरसे रसगन्धौ समौ समभागौ तेन द्वयोर्मिलितयोःकर्षः, विषमर्द्धतोलकं, सर्पाक्षी शार्ङ्गिष्ठो, रास्नेति केचित् । कषायैर्योति वत्सनाभधातक्यादिजलेन । धातक्यादिवत्सान्तानि सप्तदशद्रव्याणि प्रत्येकं कर्षमात्रं गृहीत्वा क्वाथयेत् तेन क्वाथेन त्रिदिनं विमर्द्य तत् हण्डिकामध्ये स्थापयेत् ततः खल्पशरावेनाच्छाद्य सन्धिं रुद्ध्वा च वालुकाभिः हण्डिकामापूर्य्य चणमिति दण्डचतुष्टयं पचेदित्यर्थः ॥ ९० ॥

---

* समानौ रसगन्धौ च मरिचं विषमेव च सूतात् मरिचद्वैगुण्यं फलं सूतसमं तथा एतानि सर्वभागानि तिन्तिडाद्भिर्विमर्द्दयेत् रामवान इति ख्यातः ज्वरातिसारसम्भवे ग्रन्थान्तरे ।

अथातिसारचिकित्सा।

दरदं कृतकर्पूरं मुस्तेन्द्रयवसंयुतम्।
सर्वातिसारशमनं खाखसीक्षीरभावितम्॥

अतिसारवारणोरसः॥ ६२॥

शुद्धञ्च तालकं लौहं गगनञ्च पलं पलम्।
कर्पूरं पारदं गन्धं प्रत्येकं वटकोन्मितम्॥
जातीकोषसुरापत्रं शटी तालीश केशरम्।
व्योषं चोचं कणामूलं लवङ्गं पिचुसम्मितम्॥
भक्षयेत् प्रातरुत्थाय गुरुदेवद्विजार्चकः।
नानारूपमतीसारं ग्रहणीं सर्वरूपिनीम्॥
अम्लपित्तं तथा शूलं शूलञ्च परिणामजम्।
रसायनवरश्चायं वाजीकरण उत्तमः॥

पूर्णचन्द्रोदयोरसः॥ ६३॥

कणा नागरपाठाभिस्त्रिवर्गत्रितयेन च।
विल्वचन्दनह्रीवेरैः सर्वातिसारजिद्भवेत्॥
सर्वोपद्रवसंयुक्तामपि हन्ति प्रवाहिकाम्।

प्राणेश्वरोरसे पटुपञ्चकं पञ्चलवणं, सर्जरसः धूनकः अग्निसंज्ञित-श्चित्रकः॥ ६१॥

ज्वरोपद्रवस्यातीसारस्य चिकित्सा मभिधाय सम्प्रति स्वतन्त्रस्याती-सारस्य चिकित्सामाह दरदमित्यादि कृतकर्पूरं पक्वकर्पूरम्। खाखसी-क्षीरं अहिफेणम्॥ ६२॥

पूर्णचन्द्रोदयरसे वटकोन्मितमिति, माषकाष्टकपरिमितम्। पत्रं तेजपत्रं; पिचुसम्मितं कर्षमानम् ६३॥

नानेन सदृशं लौहं विद्यते ग्रहणीहरम् ॥

कणाद्यं लौहम् ॥ ८४ ॥

पारदं गन्धकञ्चाभ्रं लौहञ्चापि वराटकम् ।
रूप्यं चातिविषं कर्षं समभागं प्रकल्पयेत् ॥
धान्य शुण्ठीकृतक्वाथैर्भावयेच्च पृथक् पृथक् ।
गुञ्जाप्रमाणां वटिकां कारयेत् कुशलो भिषक् ॥
भक्षयेत् प्रातरुत्थाय गुरुदेवद्विजार्चकः ।
दग्धविल्वं गुड़ेनैव कुर्य्यात्तदनुपानकम् ॥
अजादुग्धेन वा पेयं जम्बूत्वक् साधितं रसम् ।
अतीसारे ज्वरे घोरे ग्रहण्यामरुचौ तथा ॥
सामे सशूले रक्ते च पिच्छास्रावे भ्रमे तथा ।
शोथे रक्तातीसारे च संग्रहे ग्रहणीषु च ॥

वृहद्गगनसुन्दरः ॥

भस्मसूतस्य भागैकं चत्वारः शुद्धगन्धकात् ।
क्षिप्ता वराटिकागर्भे टङ्कणेन निरुध्य च ॥
भाण्डे रुद्ध्वा पुटे पाच्यं स्वाङ्गशीतं समुद्धरेत् ।
लोकनाथरसो नाम क्षौद्रैर्गुञ्जा चतुष्टयम् ॥
नागरातिविषा मुस्तं देवदारु वचान्वितम् ।
कषायमनुपानन्तु सर्वातिसारनाशनः ॥

लोकनाथोरसः ॥

शुद्धसूतं मृतं ताम्रं गन्धकं प्रतिकार्षिकम् ।
चूर्णयेद्द्विषकर्षार्द्धं विषार्द्धं तिन्तिड़ीफलम् ॥

कणादिलौहेत्रिवर्गं त्रितयेनचेतित्रिकटू त्रिफला त्रिमदैः ८४ ।

मर्द्दयेत् खल्लमध्ये तु चाम्लेन गोलकीकृतम्।
गर्भं षड़ङ्गुलं कुर्य्यात् सर्वतो वर्त्तुलं शुभम्॥
नागवल्लग्राः क्षिपेत् पत्रमाद्रौ पात्रे च गोलकम्।
आच्छाद्य तच्च पात्रेण रुद्ध्वा गजपुटे पचेत्॥
स्वाङ्गशीतं समुद्धृत्य सपत्रञ्च विशेषतः।
कर्षार्द्धं मरिचं दत्वा कर्षार्द्धं तिन्तिड़ीफलम्॥
गुञ्जामितां वटीं कुर्य्याच्चिन्तामणिरसो महान्।
अतिसारे त्रिदोषोत्थे संग्रहग्रहणी गदे॥
अनुपानं विधातव्यं यथा दोषानुसारतः।

चिन्तामणिरसः॥ ९५॥

अहिफेणं सखर्ज्जूरं घृष्ट्वा गुञ्जैकमात्रकम्।
रक्तस्रावमतीसारमतिवृद्धं विनाशयेत्॥

अहिफेणवटिका॥ ९६॥

रसगन्धकयोः कर्षं ग्राह्यमेकं सुशोधितम्।
ततः कज्जलिकां कृत्वा मृदुपाकेन साधयेत्॥
जातीफलं तथा कोषं लवङ्गारिष्टपत्रके।
सिन्धुवारदलञ्चैव एलावीजं तथैव च॥
एषाञ्च कर्षमानेन तोयेनाथ विमर्द्दयेत्।
मुक्तागृहे पुनःस्थाप्य पुटपाकेन साधयेत्।

चिन्तामणिरसे प्रतिकार्षिकमिति प्रत्येकं कर्षपरिमितम्। तिन्तिड़ीफलं पक्वतिन्तिड़ीफलम्। चाम्लेन काञ्जिकेन॥ ९५॥
अहिफेण वटिकायां खर्ज्जूरं पिण्डखर्ज्जूरम् ९६॥

घनपङ्के वहिर्लिप्त्वा पुटमध्ये निधापयेत्।
गुञ्जाषट्कप्रमाणेन प्रत्यहं भक्षयेन्नरः॥
एतत् प्रोक्तं कुमाराणां रक्षणाय महौषधम्।
ज्वरघ्नं दीपनञ्चैव वलवर्णप्रसाधनम्॥
दुर्वारं ग्रहणीरोगं जयत्येव प्रवाहिकाम्।
सूतिकाञ्च जयेदेतद्रक्तार्शौ रक्तसवभ्रम्॥
पिशाचा दानवा दैत्या वालानां विघ्नकारकाः।
यत्रौषधवरस्तिष्ठेत् तत्र सीमां न यान्ति ते।
वालानां गदयुक्तानां स्त्रीणाञ्चैव विशेषतः।
महागन्धकमेतद्धि सर्व्वव्याधि निसूदनम्।
विना पाकेन सर्व्वाङ्गसुन्दरोयं प्रकीर्त्तितः।

महागन्धकम्॥ ९७॥

ग्रहण्यां ये रसाः प्रोक्तास्तेऽतीसारे प्रकीर्त्तिताः।

इति रसेन्द्रसारसंग्रहे अतिसाररोगचिकित्सा।

महागन्धके रसगन्धकयोः प्रतेयकं कर्षः जातीफलादीनामपि प्रतेयकं कर्षः। आदौ कज्जलीं वक्ष्यमाणरसपर्पटीवत् पचेत् ततः सर्व्वमेकीकृत्य जलेन पिष्ट्वा एकस्मिन् शुक्तागर्भे औषधं संस्थाप्य अपरेणाच्छाद्य घनपङ्केनालिप्य करीषाग्निमध्ये प्रक्षिपेत् यदा वहिरारक्तता भवति तदैवा-लघ्यपाहरः॥ ९७॥

इत्यतीसाराधिकारः।

अथ ग्रहणीरोगचिकित्सा ।

जातीफलं टङ्कणमभ्रकञ्च धूस्तूरबीजं समभागचूर्णम् ।
भागद्वयं स्याद्‌हिफेनकस्य गन्धालिकापत्ररसेन मर्द्दम् ॥
पणप्रमाणा वटिका विधेया यत्नाद्विदध्याद्ग्रहणीगदेषु ।
सामेषु रक्तेषु सशूलकेषु पक्वेष्वपक्वेषु गुदामयेषु ॥
रोगेषु दद्यादनुपानभेदैर्मधुप्रयुक्ता ग्रहणीगदेषु ।
पथ्यं सदध्योदनमत्र देयं रसोत्तमोयं ग्रहणीकपाटः ॥

जातीफलादिग्रहणीकपाटः ॥ ९८ ॥

टङ्कणक्षारगन्धाभ्ररसं जातीफलन्तथा ।
बिल्वं खदिरसारञ्च जीरकञ्च मधूलिका ॥
कपिहस्तकबीजञ्च तथा चौरकपुष्पकम् ।
एषां भागं समादाय श्लक्ष्णचूर्णञ्च कारयेत् ॥
बिल्वपत्रककार्पासफलं शालिञ्च दुग्धिका ।
शालिञ्च मूलं कुटजं तथा कच्चटपत्रकम् ॥
सर्व्वेषां स्वरसेनैव वटिकां कारयेद्भिषक् ।
रक्तिकैकप्रमाणेन खादयेद्दिवसत्रयम् ॥
दधिमस्तु ततः पेयं पलमात्रप्रमाणतः ।
अपियोगशताक्रान्तां ग्रहणी मुद्धतां जयेत् ॥
आमशूलं ज्वरं कासं श्वासञ्चैव प्रवाहिकाम् ।

ग्रहण्यतीसारयोः परस्परं कार्य्यकारणभावसम्बन्धादनन्तरं, ग्रहणी-चिकित्सितमुच्यते । तत्र ग्रहणीकपाटरसे समभागचूर्णमिति प्रत्येकं समभागम् । गन्धालिकप्रसारणी, गुदामय इत्यर्शरोगे ॥ ९८ ॥

रक्तस्रावकरं द्रव्यं कार्य्यं नैवात्र युक्तितः॥
कूष्णवार्त्ताकु मत्स्यञ्च दधि तक्रञ्च शस्यते।
ज्ञात्वा वायोः कृतिं तत्र तैलं वारि प्रदापयेत्॥

ग्रहणीकपाटोरसः॥ ९९॥

अभ्रस्य सूतस्य च गन्धकस्य प्रत्येकशोमाष चतुष्टयञ्च। *
विधाय शुद्धोपल पात्रमध्ये सुकज्जलीं वैद्यवरः प्रयत्नात्॥
जातीफलं शाल्मलीवेष्टमुस्तं
सटङ्कणं सातिविषं सजीरम्।
प्रत्येकमेषां मरिचस्य शाण
प्रमाणमेकं विषमाषकञ्च॥
विचूर्ण्य सर्वांख्यवलोड्य पश्चात्
विभावयेत् पत्ररसैरमीषाम्।
इन्द्राशिकेन्द्राशनकञ्च जम्बु
जयन्तिका दाड़िमकेशराजौ॥
अविद्धकर्णापि च भृंगराजो
विभाव्य सम्यक् वटिका विधेया।
कोलास्थिमानाय बहुप्रकारं
सामं निहन्यादनिलान् गदांश्च॥

अपरग्रहणीकपाटरसे विल्वं विल्वशलाटू। मधूलिका मूर्वा कपित्थस्तकवीजं मूकशिम्बावीजम्। दुग्धिकाचोरिका। एषां विल्वपत्रादीनां स्वरसैः सप्ताहं भावयेत्॥ ९९॥

---

* विशुद्धसूतस्य च गन्धकस्य इति केचित पठन्ति।

कुर्य्याद्विशेषादनलप्रवृद्धिं
कासञ्च पञ्चात्मकमम्लपित्तम्।
इयं निहन्याद् ग्रहणीमसाध्याम्
मर्त्यस्य जीर्णग्रहणीं प्रवृद्धाम्॥
असारकत्वं त्वतिसारमुग्रं
श्वासं तथा पाण्डुमरोचकञ्च।
चिरोद्भवां संग्रहकोष्ठदुष्टिं
जयेद्भृशं योगशतैरसाध्याम्॥
अनेकसम्भावितमर्त्यलोका
नानाविधव्याधिपयोधिनौका। *

जातीफलाद्या वटिका॥ १००॥

रसं गन्धं घनं लौहं धातकीपुष्पविल्वकम्।
विषं कुटजवीजञ्च पाठा जीरक धान्यकम्॥
रसाञ्जनं टङ्गणञ्च शिलाजतु फलन्तथा।

जातीफलादिवटिकायां उपलमध्ये पाषाणखल्ले, शाल्मलीवेष्टकं मोचरसं, इन्द्राशिका निर्गुण्डी, इन्द्राशनं विजया, अविद्धकर्णा अम्बष्ठकी भृङ्गराजौ भृङ्गराजकेशराजौ, असारकत्वं अल्पसारकत्वं तच्च वातातीसारे भवति॥ १००॥

---

* विवर्ज्जनीयास्त्विहभ्रष्टमत्स्यामत्स्यरसाथामाण्डुरवर्ग एव रम्भाफलं मूलमथोदलञ्च वुधैर्विधेयं न कदाचिदत्र जातिफलाद्यावटीका विधेया यशोऽर्थिना वैद्यवरस्य हृद्या इति भैषज्यरत्नावल्यामतिरिक्तपाठः।

अभ्रांशञ्च फलं ग्राह्यं प्रत्येकं तोलकत्रयम् ।
भेकपर्णी पञ्चमूली बलाकञ्चटदाड़िमम् ।
शृङ्गाटं केशरं जम्बु दधिमस्तु जयन्तिका ॥
केशराजं भृङ्गराजं प्रत्येकं तोलकद्वयम् ।
द्विमाषा वटिका कार्य्या तक्रेण परिसेविता ।
इयं पूर्णकलानाम ग्रहणीगदनाशिनी ।
शूलघ्नी दाहशमनी वह्निदाज्वरनाशिनी ।
भ्रमच्छर्द्दिछेदकरी संग्रहग्रहणीं जयेत् ।

पूर्णकला वटी ॥ १०१ ॥

पारदं गन्धकञ्चैव अहिफेणं समोचकम् ।
त्रिकटु त्रैफलञ्चैव समभेकत्र कारयेत् ॥
भङ्गभृङ्गद्रवैस्तैतद्भावयेच्च पुनः पुनः ।
रक्तित्रयं ततश्चास्य मधुना सह भक्षयेत् ॥
असाध्यां ग्रहणीं हन्ति रसो वज्रकपाटकः ।

वज्रकपाटोरसः ॥ १०२ ॥

पारदाभ्रकसिन्दूरं गन्धं जातीफलं समम् ।
कुटजस्य फलञ्चैव धूर्त्तवीजानि टङ्कणम् ॥
व्योषं मुस्ताभयाचैव चूतवीजं तथैव च ।

पूर्णकलावटिकायां घनं मुस्तकं एषामभ्रान्तानां प्रत्येकं कर्षमानम् । फलं त्रिफला तच्च प्रत्येकं तोलकत्रयमिति । पञ्चमूली स्वल्पपञ्चमूली ॥ १०१ ॥

वज्रकपाटरसे मोचकं शाल्मलीनिर्य्यासं, समभिति समभागं, भङ्गा विजया, भावयेच्च पुनःपुनरिति सप्तवारम् ॥ १०२ ॥

विल्वकं सर्ज्जवीजञ्च दाड़िमीफलवल्कलम् ॥
एतानि समभागानि निःक्षिपेत् खल्लमध्यतः।
विजया स्वरसेनैव मर्द्दयेत् श्लक्ष्णचूर्णितम् ॥
गुञ्जाफलप्रमाणान्तु वटिकां कारयेद्भिषक्।
एकां कूटजमूलत्वक्कषायेण प्रयोजयेत् ॥
आमातिसारं हरते कुरुते वह्निदीपनम्।
मधुना विल्वशुण्ठेन रक्तग्रहणिकां जयेत् ॥
शुण्ठीधान्यकयोगेन चातिसारं निहन्त्यसौ ॥
जातीफलरसोऽह्येष ग्रहणीगदनाशनः।

जातीफलरसः ॥ १०३ ॥

रसगन्धलौहानि शङ्खटङ्कणरामठम्।
शठी तालीशमुस्तानि धान्यजीरक सैन्धवम् ॥
धातक्यतिविषा शुण्ठी गृहधूमो हरीतकी।
भल्लातकं तेजपत्रं जातीफल लवङ्गकम् ॥
त्वगेला वालकं विल्वं मेथी शक्राशनं समम्।
छागीदुग्धेन वटिका रसवैद्येन कारिता ॥
गहनानन्दनाथेन भाषितेयं रसायने ॥
वटी गजेन्द्रसंज्ञेयं श्रीमता लोकरक्षणे ॥
ग्रहणीं विविधां हन्ति ज्वरातिसारनाशिनी।
शूलगुल्माम्लपित्तानि कामलाञ्च हलीमकम् ॥
वलवर्णाग्निजननी सेविता च चिरायुषी।
कण्डूं कुष्ठं वीसर्पञ्च गुदभ्रंशं क्रिमिं जयेत् ॥

जातीफलरसे हिङ्गूरं रससिन्दूरं, चूतफलवीजमाम्रास्थिमज्जा। १०२।

माषद्वयां वटीं खादेच्छागीदुग्धानुपानतः।
वयोऽग्निबलमावीक्ष्य युक्त्या वा त्रुटिवर्द्धनम् ॥

ग्रहणीगजेन्द्रवटिका ॥ १०४ ॥

सूतमभ्रं गन्धकञ्च तारं लौहं सटङ्गणम्।
रसाञ्जनं माक्षिकञ्च शाणमेकं पृथक् पृथक् ॥
लवङ्गं चन्दनं मुस्तं पाठा जीरकधान्यकम्।
समङ्गातिविषा लोध्रं कुटजेन्द्रयवं त्वचम् ॥
जातीफलं विश्वविल्वं कनकं दाड़िमीच्छदम्।
समङ्गा धातकी कुष्ठं प्रत्येकं रससम्मितम् ॥
भावयेत् सर्वमेकत्र केशराजरसैः पुनः।
चणकाभा वटी कार्य्या छागीदुग्धेन पेषिता ॥
अनुपानं प्रदातव्यं दग्धविल्वं समं गुड़ैः।
हन्ति सर्वानतिसारान् ग्रहणीं चिरजामपि ॥
आमसंपाचनो सम्यग्वह्निवृद्धिकरस्तथा।
पीयूषवल्लीनामायं ग्रहणीरोगनाशनः ॥ *

पीयूषवल्लीरसः ॥ १०५ ॥

ग्रहणीगजेन्द्ररसे शक्राशनं विजया तस्या वीजं ग्राह्यम् ॥ १०४ ॥ पीयूषवल्लीरसे तारं रौप्यं, माक्षिकं स्वर्णमाक्षिकं, समङ्गावराहक्रान्ता, विल्वं विल्वशलाटु। आदौ केशराजरसे सप्तधा विभाव्य पश्चात् छागीदुग्धे निक्षिप्य वटिका कार्या ॥ १०५ ॥

---

* काश्यपायददेऽश्विभ्यां ततः प्राप प्रजापतिः धन्वन्तरिस्ततः प्राप देवतानां पतिस्ततः। परम्पराप्राप्त एषरमस्तु लोकस्य दुर्लभ इत्यतिरिक्तपाठः।

रसगन्धकयोश्चापि कर्षमेकं सुशोधितम्।
द्वयोः कज्जलिकां कृत्वा हाटकं षोड़शांशतः॥
लवङ्गं निम्बपत्रञ्च जातीकोषफले तथा।
एतेषां कर्षचूर्णेन सूक्ष्मैलां सह मेलयेत्॥
मुक्तागृहेन संस्थाप्य पुटपाकेन साधयेत्।
गुञ्जापञ्चप्रमाणेन प्रत्यहं भक्षयेन्नरः॥
सूतिकां ग्रहणीरोगं हरत्येष सुनिश्चितः।
अर्शोघ्नो दीपनश्चैव बलपुष्टिप्रसादनः॥
कासश्वासातिसारघ्नो बलवीर्य्यकरःपरः।
दुर्वारं ग्रहणीरोगञ्चामशूलञ्च नाशयेत्।
संसारलोकरक्षार्थं पुरा रुद्रेण भाषितः॥

ग्रहणीशार्दूलरसः॥ १०६॥

रसस्य शाणं संगृह्य काञ्जिकेन तु शोधयेत्।
चित्रकस्य रसेनापि त्रिफलायाश्च बुद्धिमान्॥
रसार्द्धं गन्धकं शुद्धं भृङ्गराजरसेन वा।
द्वाभ्यां संमूर्च्छनं कृत्वा स्वरसैः शाणसम्मितैः॥
खल्लयेत्तु शिलाखण्डे क्रमशो वक्ष्यमाणजैः।
निर्गुण्डी मधुकश्वेता कुठेर शोषसुन्दरैः॥
भृङ्गाव्हकेशराजैश्च तथा चेन्द्राशनोत्कटैः।

ग्रहणीशार्दूलरसे मिलितयोः रसगन्धकयोः कर्षमेकं ग्राह्यं हाटकं षोड़शांशत इति कर्षमानापेक्षया स्वर्णभस्मषोड़शांशम्। लवङ्गादीनां प्रत्येकं कर्षमानम्। एतत् सर्वमेकीकृत्य शुक्तिसम्पुटे कृत्वा पुटपाकवत् पचेदित्यर्थः॥ १०६॥

सर्षपाभां वटीं कृत्वा दद्यात्तां ग्रहणीगदे ॥
सामवातेऽग्निमान्द्ये च ज्वरे प्लीहोदरेषु च।
वातश्लेष्मविकारेषु तथा श्लेष्मगदेषु च।
अम्लतक्रादिसेवाञ्च कुर्वीत स्वेच्छाया बहु ॥
श्रीमता वैद्यनाथेन लोकानुग्रहकारिणा।
स्वप्नान्ते ब्राह्मणस्येयं भाषिता लिखितेन तु ॥

वैद्यनाथवटी।

याम्लपित्ते विधातव्या गुड़िका च चुधावती ॥
तत्र प्रोक्तविधा शुद्धौ समानौ रसगन्धकौ।
संमर्द्द्य कज्जलाभन्तु कुर्य्यात् पात्रे दृढ़ाश्मनि ॥
ततो वादरवह्निस्थलौहपात्रे द्रवीकृतम्।
गोमयोपरिविन्यस्तकदलीपत्रपातनात् ॥
कुर्य्यात् पर्प्पटिकाकारमस्य रक्तिद्वयं क्रमात्।
द्वादशरक्तिकां यावत् प्रयोगः प्रहरार्द्धतः ॥
तदूर्द्धं वहुपूगस्य भक्षणं दिवसे पुनः।
तृतीय एव मांसाज्य दुग्धाद्यत्र विधीयते ॥
वर्ज्यं विदाहिस्त्रीरम्भामूलं तैलञ्च सार्षपम्।
कृष्णामत्स्याम्बुजखगांस्त्यक्तनिद्रः पयः पिवेत् ॥
ग्रहणीक्षयकुष्ठार्शः शोथ।जीर्णविनाशिनी।
रसपर्प्पटिकाख्याता निवद्धा चक्रपाणिना ॥

रसपर्पटिका ॥ १०७।

रसपर्पटीमाह याम्लेत्यादि तत्रेति तत्र चुधावत्यां यथा विधी यो रसगन्धकशुद्धिप्रकारो वक्तव्य स्तेन शुद्धावित्यर्थः। शुद्धपारदकं।

हाटकं रजतं ताम्रं यद्यत्र परिदीयते।
विजयाख्यातु सा ज्ञेया सर्व्वरोगनिसूदनी॥

विजयपर्प्पटी॥ १०८॥

रसोत्तमं पलं शुद्धं हेमतोलकसंयुतम्।
शिलायां मर्द्दयेत्तावद् यावदेकत्वमागतम्॥
गन्धकस्य पलञ्चैकमयः पात्रे ततोदृढ़े।
मर्द्दयेद्दृढ़पाणिभ्यां यावत् कज्जलतां व्रजेत्॥
ततः पाकविधानज्ञः पर्पटीं कारयेत् सुधीः।
रक्तिकादिक्रमेणैव योजयेदनुपानतः॥
ग्रहणीं विविधां हन्ति तथा सर्व्वज्वरापहा।

स्वर्णपर्प्पटी॥ १०९॥

अष्टौ गन्धकमाषका रसदलं लौहं तदर्द्धं शुभम्।
लौहार्द्धञ्च वराभ्रकं सुविमलं ताम्रं तथाभ्रार्द्धिकम्॥

गन्धक कर्ष १ एतद्दयं खल्ले तावद् घर्षणीयं यावत् कज्जलाभं भवति। ततो लौहदर्व्विकायामेतच्चूर्णं दत्वा वदराङ्गारोपरि विन्यस्य लौहदण्डेन सञ्चाल्य यदा द्रवीभूतं भवति तदा आर्द्र गोमयपिण्डोपरि स्थापित कोमलकदलीपत्रे चालनीयं अपरकदलीपत्रान्तरेण संपीड्य पर्प्पटिकाकृतिः कार्य्यत्रा। रक्तिद्वयं क्रमादिति प्रथमं गुञ्जायुगलं प्रतिदिनमेकैकवृद्धितो भक्ष्यमिति क्रमादित्यर्थः॥ १०७॥

विजयपर्पटीमाह हाटकमित्यादि यद्यपि रसपर्पटीकायां स्वततुल्यं स्वर्ण रजतं ताम्रञ्च दीयते तदा सा विजयाख्या ज्ञेया॥ १०८॥

स्वर्णपर्पटिकायां रसोत्तमः हिङ्गुलोत्थपारदः। पर्पटीं कारयेदिति रसपर्प्पटी विधिवत् पचेदित्यर्थः॥ १०९॥

पात्रे लौहमये च मर्द्दनविधौ चूर्णीकृतञ्चैकतः।
दार्व्याबादरवह्निनातिमृदुना पाकं विदित्वा दले॥
रम्भाया लघु ढालयेत् पटुरियं पञ्चामृता पर्प्पटी।
ख्याता चौद्रघृतान्विता प्रतिदिनं गुञ्जाद्वयम् वृद्धितः॥
लौहे मर्द्दन योगतः सुविमलं भच्चक्रिया लौहवत्।
गुञ्जाष्टावथवा त्रिकं त्रिगुणितं सप्ताहमेवं भजेत्॥
नानावर्णग्रहण्यामरुचिसमुदये दुष्टदुर्णामकादौ।
छर्द्द्यां दीर्घातिसारे ज्वरभवकलिते रक्तपित्ते चयेपि॥
वृष्याणां वृष्यराज्ञो वलिपलितहरानेत्ररोगैकहन्त्री।
तस्यं दीप्तस्थिराग्निं पुनरपि नवकं रोगि देहं करोति॥

पञ्चामृतपर्पटी॥ ११०॥ *

शुद्धसूतं समं गन्धं त्रिकटुपटुपञ्चकम्।
टङ्गकं तुल्यतुल्यञ्च विजया सर्वसम्मिता॥
भावयेच्चित्र भृङ्गोत्थैस्त्रिधा च विजयाद्रवैः।
दीप्ताग्निना तु यामैकं वालुकायन्त्रगे पचेत्॥

पञ्चामृतपर्पटिकायां अष्टौ गन्धकमाषका रसदलमिति भद्रादि सम्मतः पाठः पाश्चात्यास्तु माषका इत्यत्र तोलका इति पठन्ति। अन्ये तु रसपलमिच्छन्तो गन्धकस्याष्टमाषकत्वमाक्षिपन्ति ते पारदबाहुल्यात् पर्प्पटीत्वं न स्यात्। तेन गन्धकस्याष्टमाषका रसस्य दलमर्द्धभागम् इत्यर्थः॥ ११०॥

अन्यविधानि विजयलौहस्वर्णपर्पटीप्रभृतीनि तन्त्रान्तरेऽनुसर्त्तव्यानि विस्तारभयात् परित्यक्तानि।

संचूर्ण्य चार्द्रकद्रावैर्भावयित्वा च भक्षयेत् ।
मधुना शाणमानन्तु रसोह्यग्निकुमारकः ॥
दीप्ताग्निकारकः सामग्रहणीदोषनाशनः ॥

अग्निकुमारोरसः ॥ १११ ॥

शुद्धसूतं समं गन्धं मृतताम्राभ्रटङ्कणम् ।
सामुद्रञ्च यवक्षारं स्वर्जिसैन्धवनागरम् ॥
अपामार्गस्य च क्षारं पलाशवरुणस्य च ।
प्रत्येकं सूततुल्यं स्यादम्लयोगेन मर्द्दयेत् ॥
हस्तिशुण्डीद्रवैश्चाग्नौ मर्द्दयित्वा पुटेल्लघु ।
माषमात्रः प्रदातव्यो रसोयं वड़वामुखः ॥
गृहणीं विविधां हन्ति संग्रहगृहणीं ज्वरम् ।

वड़वामुखोरसः ॥ ११२ ॥

रसगन्धकयोश्चापि जातीफललवङ्गयोः ।
प्रत्येकं शाणमानञ्च श्लक्ष्णचूर्णीकृतं शुभम् ॥
सूर्य्यावर्त्तरसेनैव विल्वपत्ररसेन च ।
शृङ्गाटकसमुद्भूतस्वरसेन च मर्द्दयेत् ॥
चण्डातपेन संशोष्य वटिकां कारयेद्भिषक् ।
विल्वपत्ररसेनैव दापयेद्रक्तिकाद्वयम् ॥
दध्ना च भोजनीयञ्च ग्रहणीरोगनाशनः ।

अग्निकुमाररसे पटुपञ्चकं पञ्चलवणम् ॥ १११ ॥
वड़वामुखरसे सामुद्रं करकचलवणं स्वर्जी स्वर्जिकाक्षारम् | पलाश वरुणस्य चेति पलाशस्य वरुणस्य च क्षारम् | अम्लेनेति काञ्जिकेन ॥ ११२

पाण्डुरोगमतीसारं शोथं हन्ति तथा ज्वरम् ॥
अयञ्च ग्रहणीरोगे कपाटो रस उत्तमः ।

ग्रहणीकपाटोरसः ॥

मुक्ता सुवर्णं रसगन्धटङ्क
मभ्रं कपर्दोऽमृततुल्यभागः ।
सर्वैः समं शङ्खकचूर्णमत्र
भाव्यञ्च खल्लेऽतिविषाद्रवेण ।
गोलञ्च कृत्वा मृदुकर्पटस्थं
संपाच्य भाण्डे दिवसार्द्धकञ्च ।
सर्वाङ्गशीतो रस एष भाव्यो
धूस्तूरवह्नीमूषलीद्रवैश्च
लौहस्य पात्रे परिभावितश्च
सिद्धोभवेत् संग्रहणीकपाटः ।
वातोत्तरायां मरिचाज्ययुक्तः
पित्तोत्तरायां मधुपिप्पलीभिः ।
कफोत्तरायां विजयारसेन
कटुत्रयेणाज्ययुतो ग्रहण्याम् ।
क्षये ज्वरे चार्शसि षट्प्रकारे
सामातिसारेऽरुचिपीनसे च ।
मेहे च कृच्छ्रे गतधातुवर्द्धने
गुञ्जाद्वयञ्चापि महामयोघ्नम् ॥

वृहद्ग्रहणीकपाटः । ११२ ॥

वृहद्ग्रहणीकपाटरसे घनमितिपाठे अभ्रमित्यर्थः अमृतं विषम् ।११२

गिरिजाभवबीजकज्जलीपरिमर्द्दयेदृरसेन शोधिता ।
कुटजस्य तु भस्मना पुनर्द्विगुणेनाथविमर्द्दमिश्रिता ॥
मर्द्दयित्वा प्रदातव्यमस्यगुञ्जाचतुष्टयम् ।
अजाक्षीरेण दातव्यं क्वाथेन कुटजस्य वा ॥
यूषं देयं मसूरस्य वारिभक्तञ्च शीतलम् ।
दध्नासह पुनर्देयं ग्रासादौ रक्तिकाद्वयम् ॥
वर्द्धयेद्दशपर्य्यन्तं ह्रासयेत् क्रमशस्तथा ।
निहन्ति ग्रहणीं सर्वां विशेषात कुक्षिमार्द्दवम् ॥

गृहणीकपाटोरसः ॥ ११४ ॥

हाटकं रजतं ताम्रं यद्यच परिदीयते ।
विजयाख्यातु सा ज्ञेया सर्वरोगनिसूदनी ॥

विजयावटिका ।

कपर्द्दं तुल्यं रसकन्तु गन्धकम् ।
लौहं मृतं टङ्कणकञ्च तुल्यम् ॥
जयारसेनैकदिनं विमर्द्द्य ।
चूर्णेन संवेष्ट्य पुटेच्च भाण्डे ॥
दद्यात तत् पोट्टलिकाभिधानम् ।
वातप्रधानां ग्रहणीं निहन्ति ॥

ग्रहणीकपर्द्दपोट्टली ॥ ११५ ॥

दग्धकपर्द्दकान् पिष्ट्वा त्र्यूषणं टङ्कणं विषम् ।

ग्रहणीकपाटोरसे गिरीजाबीजं गन्धकं, हरबीजं पारदः ।
रक्तादाविति रक्तातिसारादौ ॥ ११४ ॥
ग्रहणीकपर्द्दपोट्टलिकायां कपर्द्दतुल्यमिति वराटभागतुल्यम् ।
इदंपोट्टलिकामपि ग्रहणीकपर्द्दपोट्टलीवत् पचेत् ॥ ११५ ॥

गन्धकं शुद्धसूतञ्च तुल्यं जम्बीरजैर्द्रवैः ॥
मर्द्दयेत् भक्षयेन्माषं मरिचाद्रं लिहेदनु ।
निहन्ति ग्रहणीरोगं पथ्यं तक्रौदनं हितम् ॥

हंसपोट्टली ।

तुल्यं कान्तं रसं तालं माक्षिकं टङ्गणन्तथा ॥
सपादनिष्कं प्रत्येकं पञ्चनिष्कं वराटकम् ।
द्विनिष्कं गन्धकं सर्वं पिष्ट्वा जम्बीरजैर्द्रवैः ॥
अर्द्धभागकरीषेण पुटितं भस्मशोभनम् ।
अद्यात् ग्रहणीगुल्मक्षयकुष्ठप्रमेहके ॥

ग्रहणीकपाटः ॥ ११६ ॥

रसाभ्रगन्धान् क्रमवृद्धियुक्तान् ।
जङ्घारसेन त्रिदिनं विमर्द्द्य ॥
जयन्तिकाभृङ्गकलम्बीनीरै- ।
र्दिनं यवक्षारं सटङ्गणञ्च ॥
चित्रातु गन्धस्य च तुल्यभागम् ।
वातारितैलेन युतं पुटित्वा ॥
गुडूचिका शाल्मलिकारसेन ।
जयारसेनापि विमर्द्द्य शाणम् ॥
मरिचं सार्द्धं मधुनासमेतम् ॥
दद्यीत पथ्यं दधिभक्तकञ्च ।

ग्रहणीकपाटः ॥ ११७ ॥

ग्रहणीकपाटे कान्तं कान्तलौहं अर्द्धभागकरीषेणेति करीषार्द्धभागपूरिते गर्त्ते इत्यर्थः ॥ ११६ ॥

सूतं गन्धं यवक्षारं जयन्त्युग्राभ्रटङ्कणम्।
जयन्तीभृङ्गजम्बीरद्रवैः पिष्ट्वा दिनत्रयम्॥
यामार्द्धं गोलकं स्वेद्यं मन्देन पावकेन च।
शीते जयारससमं शाल्मली विजयाद्रवैः॥
भावयेत् सप्तधा वज्रकपाटः स्याद्रसोत्तमः।
माषद्वयं त्रयं वास्य मधुना ग्रहणीं जयेत्॥
ग्रहणीवज्रकपाटः॥ ११८॥

तारमौक्तिकहेमानि सारश्चैकैकभागिकम्।
द्विभागो गन्धकः सूतस्त्रिभागो मर्द्दयेदिमान्॥
कपित्थस्वरसैर्गाढ़ं मृगशृङ्गे ततः क्षिपेत्।
पुटेन्मध्यपुटेनैव तत उद्धृत्य मर्द्दयेत्॥
बलारसैः सप्तधैवमपामार्गरसैस्त्रिधा।
लोध्रप्रतिविषामुस्ताधातकीन्द्रयवाम्रताः।
प्रत्येक मेतत् स्वरसैर्भावनास्यात्त्रिधात्रिधा॥
माषमात्रो रसो देयो मधुना मरिचैस्तथा।
हन्ति सर्वानतीसारान् ग्रहणीं सर्वजामपि॥
कपाटो ग्रहणीरोगे रसोयं वह्निदीपनः।
ग्रहणीकपाटः॥

गृहणी कपाटे जङ्घारसेन काकजङ्घारसेन। वातारितैलेन एर-ण्डतैलेन॥ ११७॥

गृहणीवज्रकपाटे सारोलौहं, तारादिसर्वं कपित्थकस्वरसैः संमर्द्द्य मृगशृङ्गान्तरे कृत्वा मध्यत्रिपुटेनैव पचेत्। ततः बलारसादि-भिर्भावयेत्॥ ११८॥